आर.एन.आई. सं.58951/94 ISSN 0975 - 0061

# आरण्यकम्

अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका

(Bi-annual Refereed Sanskrit Research Journal)

विश्वविद्यालयानुदानायोगस्य( UGC )यत्नसूच्याम्( Carelist )अन्तर्भुक्ता

संस्कृतप्रसारपरिषद्

आरा (विहारः)

त्रिंशं वर्षम्-द्वितीयोऽङ्कः

सितम्बर 2022

# ‘आरण्यक’स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकी शोधपत्रिका संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्क-मपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् एकशतं (100) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् पञ्चाशत् (50) रूप्यकाणि।
4. आजीवनं ग्राहकताशुल्कं द्विसहस्रं (2000) रूप्यकाणि।
5. शुल्कप्रेषणस्योपायाः-

   **(i) NEFT Banking**

   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784
   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 8102327064
   Email-**nilmanipathak19@gmail.com**

   **(ii) बैंक ड्राफ्ट ‘संस्कृतप्रसारपरिषद्’** इति नाम्ना आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रेषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301
6. आरण्यकस्य बेबसाईट-**www.aranyakam.in**
7. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
8. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
9. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशः ई-मेल संकेतः, दूरभाषसंख्या च उल्लिखिताः स्युः।
10. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
11. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
12. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
13. ‘आरण्यक’सम्बद्धा सर्वविधा जिज्ञासा **प्रो. गोपबन्धु मिश्रः, संस्कृतविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी (उ.प्र.)-221005 इति सङ्केतेन** (चल.) 9450870788 विधेया।
    Email-**gopabandhuh@gmail.com**
14. शोधलेखसम्प्रेषणं तत्सम्बद्धपत्रव्यवहारश्च
    Email-**aranyakam94@gmail.com** इति सङ्केतेन विधातव्यः।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका
विश्वविद्यालयानुदानायोगस्य ( UGC ) यत्नसूच्याम् ( Carelist ) अन्तर्भुक्ता

वर्षाङ्कौ - त्रिंशं वर्षम् - द्वितीयोऽङ्कः

**चैत्रः, वि.सं. २०७९**

**सितम्बर २०२२**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः - विक्रमाब्दः**
**मार्च, सितम्बर**

*प्रत्यङ्कम् - 50 रूप्यकाणि*  *वार्षिकं शुल्कं 100 रूप्यकाणि*
*संयुक्ताङ्कः - 100 रूप्यकाणि*

**परामर्शदात्री समितिः**

डॉ. हरिहर झा, दरभङ्गा

डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना

डॉ. राय अश्विनी कुमारः, बोधगया

❁

संस्थापकः

**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

❁

सम्पादकः

**प्रो.गोपबन्धु मिश्रः**

संस्कृतविभागः

काशीहिन्दूविश्वविद्यालयः, वाराणसी

पूर्वकुलपतिः

श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् (गुजरात)

gopabandhuh@gmail.com

❁

सह-सम्पादकौ

**डॉ. सञ्जय कुमार चौबे**

sanjaychaubey.lbs@gmail.com

**डॉ. सुनीलकुमार प्रधानः**

sunilkumarp435@gmail.com

❁

प्रकाशिका

**संस्कृतप्रसारपरिषद्**

रामेश्वरलीलासदनम्

महावीरस्थानम्

मौलाबाग, आरा (विहारः) 802301

❁

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**

सम्पादकः

# सम्पादकीयम्

**प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः।**
**कियद् वा शक्यमुन्नेतुं स्वतर्कमनुधावता॥**

(वाक्यपदीयम् 2/486)

अत्र प्रज्ञाया लब्धृत्वं विवेकस्य च लभ्यत्वम् अभाणि आचार्येण भर्तृहरिणा। अर्थात्, प्रज्ञाऽस्ति चेत्तत् न पर्याप्तम्, तया विवेको लभ्य इत्यतो विवेकस्य इष्टता। 'याथार्थ्येन वस्तुस्वरूपावधारणं विवेक' इति वाचस्पत्यम्, 'परस्परव्यावृत्त्या, वस्तुस्वरूपनिश्चयो विवेक' इति शब्दकल्पद्रुमः। 'नित्यानित्यवस्तुविवेकस्तावद् ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम्' इति वेदान्तसारः। विवेककारणेनैव कृत्येषु प्रवृत्तिः अकृत्यान् निवृत्तिः सम्भाव्यते, विवेकेनैव वस्तुनः यथार्थस्वरूपावधारणे जाते तत्र हानोपादानबुद्धेः प्रसक्तेः शक्यत्वात्। अतः प्रभुसम्मितवेदादिशास्त्रैः, मित्रसम्मितपुराणेतिहासादिभिः अथवा कान्तासम्मितकाव्यादिभिः यो 'रामादिवत् प्रवर्तितव्यं न रावणादिवदि'ति बोधोऽभीष्टो विद्यते, स विवेकज एव। अतः तादृशविवेकलाभाय प्रज्ञायाः प्रयोगः क्रियते चेत् तस्याः (प्रज्ञायाः) सार्थक्यम्, अन्यथा नेति निष्कृष्टार्थोऽत्र निष्पद्यते।

तत्रैवोपर्युक्तकारिकायां विवेकस्य इष्टतां प्रदर्श्य तदुपायत्वेन भिन्नानि आगमदर्शनान्युपदिष्टानि श्रीमदाचार्येण। नानाविधशास्त्र-शास्त्रान्तरगततत्त्वानुशीलनेन स्वस्य प्रज्ञायां तेजस्विता प्रखरतरा भवति, तेन यो विवेको जायते स न केवलं स्वमतपोषणार्थं भूयः सहायको भवति, अपि तु इतरेषां पुरतः स्वविषयोपस्थानावसरे सर्वेषामपि तेषां प्रज्ञावातायनस्य समुद्घाटने संसाधनविशेषरूपेण स परिचीयते। एतादृशभिन्नागमदर्शनकारणेन यद् आत्मनि ज्ञानस्य वैशद्यम्, विवेकशालित्वं सञ्जायते, तदेव 'निपुणता'शब्देन अन्यतमकाव्यहेतुरूपेणोपपाद्य आचार्यो मम्मटभट्टः काव्यप्रकाशेऽभिव्यनक्ति –

**शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।**
**काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे॥** (का.प्र., प्रथम उल्लासः)

अत्र लोकशास्त्रकाव्याद्यवेक्षणं निपुणतायाः हेतुरूपेण प्रादर्शि आचार्येण, अन्यथा काव्यम् उद्भूतं चेदपि लोके उपहसनीयमेव भविष्यतीत्युक्तम्। आचार्येण भर्तृहरिणाऽपि

उक्तकारिकायाम् भिन्नागमदर्शनानाम् अभावे केवलं स्वतर्कम् अनुधावतः शास्त्रीयस्यापि विदुषः उपहसनीयता 'कियद् वा शक्यमुन्नेतुम्' इति कारिकांशेनोपन्यस्ता विद्यते।

आरण्यकाख्यं शोधपत्रमिदं स्वकलेवरे भिन्नागमदर्शनपुरस्सरं स्वतर्कम् उपस्थापयितुं यतमानान् विदुषः प्रोत्साहयितुं प्रवर्तते। अत एव व्याकरणनये वैदिकस्य अवग्रहस्य सिद्धान्तः प्रयोगाश्च अत्र विमृश्यन्ते। सरस्वतीसरितो विषये वैदिकसन्दर्भेषु नानाविधपुराणेषु च उपलभ्यमानाः उल्लेखाः सविमर्शमत्र स्थानं लभन्ते। कार्तवीर्योदयमहाकाव्ये तन्त्रशास्त्रदृष्ट्या नानाविधप्रसङ्गाः समीक्ष्यन्ते। भारतीयमनीषायां स्वमतमण्डनमपेक्ष्य स्वेतरेषां वास्तविकतया अविरुद्धमपि आपाततः विरुद्धवत् प्रतीयमानं मतं खण्डयितुं प्रबला या युक्तय उपस्थाप्यन्ते, तादृशपरम्परायां विज्ञानमेवात्मेति मतं तत्खण्डन-प्रकारोऽपि शोधपत्रेऽस्मिन् स्थानं प्राप्नोति। संस्कृतसाहित्ये 'गणिका'विषये प्राप्यमाणान् सन्दर्भानाश्रित्य विमर्शात्मकः शोधलेखः प्राकाश्यमायाति। तथैव दाराशिकोहविरचिते समुद्रसङ्गमे सृष्टिव्याख्यानावसरे सृष्टिप्रक्रियाऽत्र सुतरां विमृष्टा। शिवलीलार्णवे महाकाव्ये शैवागमसिद्धान्ताः केन विधिना प्रतिबिम्बिताः सन्तीति अन्तर्विषयिणी शोधदृष्टिरत्र उपस्थापिता विद्यते। एवमेव निम्बार्कवेदान्तगतं मोक्षस्वरूपं तथा च प्रथमानिर्दिष्टम् इति पाणिनीयसूत्रेण उपदिश्यमानम् उपसर्जनसंज्ञास्वरूपं शास्त्रदृष्ट्या व्यापकतया समीक्ष्यते। अङ्केऽस्मिन् 'भेसज्जमञ्जूसा' इति आयुर्वेदग्रन्थस्य तथा च उत्कलीयकविना विरचितस्य 'सूर्यदूतम्' इति खण्डकाव्यस्य समीक्षा ग्रन्थसमीक्षाशीर्षकेण स्थानं लभेते।

एवंप्रकारेण आरण्यकाख्यस्य संस्कृतशोधपत्रस्यास्य आभिमुख्यं द्विविधा पुरस्क्रियते- (1) शोधलेखानां लेखकानां कियद् भिन्नागमदर्शनाख्येनोपायेन प्रज्ञा प्रबुद्धतरा भूत्वा सम्यग् विवेकाय आरण्यकमिदं पाठकान् प्रेरयति, किं च (2) संस्कृतवाङ्मये नानाविधप्रयोगपरम्परायां निहितानां तत्त्वानाम् अन्वेषणाय ताटस्थ्येन किन्तु गौरवपूर्णरीत्या सर्वे विद्वांसः प्रवर्तेरन्निति अभिलषत्येतद् आरण्यकमिति।

स्वाभिमुख्यं पूरयितुम् आरण्यकमिदम् अनुदिनं यद् व्यापकतरदृष्ट्या प्रवर्तितुकाममस्ति तत्र तद्विषये विद्वांसः, अध्यापकाः, शोधच्छात्राः च प्राणाः, प्रमाणं च।

गोपबन्धु मिश्र
सम्पादकः
आरण्यकम्

# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 1. व्याकरणनये अवग्रहविमर्शः | डॉ. सुकुमार चट्टोपाध्यायः<br>एसो.प्रोफेसर, संस्कृतविभागः<br>काशीहिन्दूविश्वविद्यालयः<br>वाराणसी | 1-8 |
| 2. वैदिकपौराणिकसन्दर्भेषु सरस्वतीसरित् | डॉ. शैलेशकुमारमिश्रः<br>असिस्टेंट प्रोफेसर<br>राजकीयसंस्कृतकॉलेज, राँची | 9-17 |
| 3. किञ्चिद् रामायणीयम् | किष्किन्धाकाण्डम् | 18 |
| 4. विज्ञानमेवात्मेति मतप्रतिपादनं न्यायमतेन तत्खण्डनविचारः | डॉ. बी. उमामहेश्वरी<br>सहायकाचार्या, दर्शनविभागाध्यक्षा<br>श्रीसोमनाथसंस्कृतयुनिवर्सिटी,<br>वेरावलम् | 19-23 |
| 5. किञ्चिद् रामायणीयम् | किष्किन्धाकाण्डम् अरण्यकाण्डं च | 24 |
| 6. तन्त्रशास्त्रदृष्ट्या कार्तवीर्योदय-महाकाव्यावेक्षणम् | डॉ. तेजनाथपौडेलः<br>असिस्टेंट प्रोफेसर (सं.)<br>केन्द्रीयसंस्कृतविश्वविद्यालयः,<br>श्रीरणवीरपरिसरः, जम्मूः | 25-30 |
| 7. 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति सूत्रार्थविमर्शः | डॉ. जयदेवदिण्डा<br>अतिथि-अध्यापकः, व्याकरणविभागः<br>लक्ष्मीदेवीशराफआदर्शसंस्कृत-<br>महाविद्यालयः, देवघरः, झारखण्डः | 31-39 |
| 8. किञ्चिद् रामायणीयम् | अरण्यकाण्डम् | 40 |

| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 9. शिवलीलार्णवमहाकाव्ये शैवागम-सिद्धान्ताः | डॉ. संजय कुमार चौबे<br>सहायकाचार्यः, संस्कृतविभागः<br>हरप्रसाद दास जैन महाविद्यालयः<br>आरा, भोजपुर (बिहार)-802301 | 41-50 |
| 10. दाराशिकोह-विरचिते समुद्रसङ्गमे भूतव्याख्यानावसरे सृष्टिक्रिया-विमृष्टिः | श्यामल पण्डा<br>अस्सिटेंट प्रोफेसर<br>उदयनारायनपुर महाविद्यालयः,<br>हावड़ा, पश्चिम बंगाल-711226 | 51-56 |
| 11. संस्कृतसाहित्ये गणिकापरम्परा | ड. शुभ्रजित् सेनः<br>सहकारी अध्यापकः<br>संस्कृतविभागः, गौडवङ्गविश्वविद्यालयः<br>मालदा, पश्चिम बंगाल-732101 | 57-62 |
| 12. निम्बार्कवेदान्ते मोक्षस्वरूपविमर्शः | ड. रुम्पा सरकार<br>गौड़ मोहन राय कालेज<br>मन्तेश्वर, पूर्व वर्धमान<br>पश्चिम बंगाल-732101 | 63-70 |
| 13. संस्कृते दर्शनसंग्रहपरम्परा | अंजली कुमारी<br>शोधच्छात्रा, संस्कृतविभागः<br>पटना विश्वविद्यालयः | 71-76 |
| 14. आयुर्विज्ञानपरम्परायां 'भेसज्ज-मञ्जूसा'-ग्रन्थस्य स्थानं महत्त्वं च | डॉ. प्रफुल्लगडपालः<br>सहायकाचार्यः<br>केन्द्रीयसंस्कृतविश्वविद्यालयः,<br>लखनऊपरिसरः, लखनऊ | 77-82 |
| 15. सूर्यदूतकाव्यम् : एकमालोचनम् | डॉ. देवराज पाणिग्राही<br>एसो. प्रोफेसर, संस्कृतविभागः<br>त्रिपुरा विश्वविद्यालय, त्रिपुरा | 83-90 |


***

# व्याकरणनये अवग्रहविमर्शः

**सुकुमार चट्टोपाध्यायः**

'अव' उपसर्गपूर्वकः ग्रहणार्थकः ग्रह–धातोः अप् प्रत्यये निष्पन्नः 'अवग्रह' शब्दः संस्कृतवाङ्मये पारिभाषिकापारिभाषिकभेदाभ्याम् अनेकार्थकः। अपारिभाषिकार्थे कोशकारेण रुद्रेणोक्तम् –'गजालिके वृष्टिरोधे प्रतिबन्धोऽप्यवग्रहः।'[1] अमरकोषे हस्तिललाटार्थे उक्तम्- 'अवग्रहो ललाटं स्यात्।'[2] वस्तुतः हस्तिनः ललाटस्थानं निग्रहस्थानरूपेण ज्ञायते। अवगृह्यते अस्वतन्त्रः अंकुशादिना गजोऽत्र। अमरकोषस्य टीकाकारेण रायमुकुटेन पदचन्द्रिकायामुक्तम्[3]–''अवगृह्येत अंकुशेनावग्रहः। 'ग्रहवृदृ'–(अ.3.3.58) इत्यप्।'' प्रसङ्गेऽस्मिन् वर्षप्रतिबन्धः अर्थात् अनावृष्टिविघातादिप्राकृतिकविपर्ययः–इत्यर्थे पाणिनिना सूत्रितम्– 'अवे ग्रहो वर्षप्रतिबन्धे।'[4] काशिकाकारेण एतत् सूत्रस्य व्याख्याप्रसङ्गे उदाहृतम्– 'अवग्रहो देवस्य।' रघुवंशे अवग्रहशब्दस्य प्रयोगः साधारणतया 'अनावृष्टि' इत्यर्थे यथा– वृष्टिर्भवति शस्यानामवग्रहविशोषिणाम्[5], 'रावणावग्रहक्लान्तमिति वागमृतेन सः'[6], नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे'[7] इत्यादयः। पुनः कुमारसम्भवे– 'वृषेव सीतां तदवग्रहक्षताम्।'[8] प्रतिबन्धकार्थे एवञ्च अवरोधः तथा बन्धनार्थे रामायणे यथा– 'स रोचयामास परैश्च बन्धं प्रसह्य रक्षोभिरवग्रहञ्च।'[9] प्रतिबन्धार्थे नैषधचरिते– 'अवश्यभवेष्वनवग्रहग्रहाः।'[10] सावग्रहस्य विपरीतः 'निरवग्रहः' पदस्य प्रयोगोऽपि दृश्यते हितोपदेशे– 'चरेच्च निरवग्रहः।'[11] अनुग्रह–शब्दः अवग्रहशब्दस्य विपरीतार्थद्योतकः। अनुग्रहस्य विरुद्धार्थे अवग्रहः 'दण्डः' अर्थस्य बोधकः। भागवतपुराणे यथा–'कर्मण्यवग्रहधियो भगवन् विदामः।'[12] निग्रहस्तथा शासनार्थे शिशुपालवधस्य प्रथमसर्गे यथा– 'स्वयं विधाता सुरदैत्यरक्षसामनुग्रहावग्रहयोर्यदृच्छया।'[13] अभिधानचिन्तामणिग्रन्थे ज्ञानविशेषार्थे अवग्रहपदस्य ग्रहणमस्ति। मालविकाग्निमित्रे स्वभावार्थेऽपि दृश्यते अवग्रहपदस्य प्रयोगः। यथा–'परस्परावग्रहनिर्विकारौ।'[14] एतद्भिन्नम् –अपारिभाषिकरूपेण स्वीकरणम्, ग्रहणम्, अपसारणम्, हरणम् इत्यादीनि पदानि समुपलभ्यन्ते तथा अनादरे, निन्दासूचकवाक्यप्रयोगे, शापार्थे च अवग्रहपदस्य प्रयोगः दृश्यते संस्कृतवाङ्मये।

किन्तु व्याकरणनये पारिभाषिकशब्दरूपेण अवग्रहपदेन मुख्यतया द्विविधोऽर्थः

ज्ञायते–(1) सावग्रहपदस्य पूर्वपदम्, (2) पृथक्करणम्। वैदिकव्याकरणवत् समस्त-प्रातिशाख्ये अवग्रहस्य परिचर्चा अस्ति।

## पारिभाषिकावग्रहस्य स्वरूपम्–

द्वयोः पदयोः पृथक्करणमवग्रहः। व्याकरणानुसारं यदि द्वयोः पदयोः पृथग्-ग्रहणमेवावग्रहशब्देन ज्ञायते तर्हि तत्र प्रयोगस्थलं केवलं द्वयमेव– सन्धिकार्ये तथा समासे। आपातदृष्ट्या सन्धिकार्यं सम्पद्यते पदान्तस्य तथा पदादिस्थितवर्णद्वयस्य मेलनेन। वाजसनेयि-प्रातिशाख्येऽपि अस्ति– ''पदान्तपदाद्योः सन्धिः।''[15] एवञ्च यत्र द्वित्र्यादिपदसमूहस्य एकत्रोच्चारणं भवति स समासः। समासे पूर्वपदस्य तथा उत्तरपदस्य एकपदीकरणे यथा एकीभावस्य स्थितिरवगम्यते तथैव विग्रहवाक्यमाध्यमेन पृथक्करणे शब्दस्वरूपस्य मूलोद्घाटनं भवति। वाजसनेयिप्रातिशाख्यस्य पञ्चमाध्याये आदौ अवग्रहविषयकं सूत्रमुपस्थापितम् –'समासेऽवग्रहो ह्रस्वसमकालः'।[16] सूत्रस्य व्याख्याप्रसङ्गे उवटाचार्येण लिखितम्– 'तत्र समासपदेऽवग्रहो भवति। द्वयोः पदयोः बहूनां वा परस्पराकाङ्क्षया सम्बद्धानाम्।' तैत्तिरीयप्रातिशाख्यानुसारं सावग्रहपदस्य यत्पूर्वपदं तदवग्रहसंज्ञं भवति- 'तस्य पूर्वपदमवग्रहः'।[17] ऋक्प्रातिशाख्यानुसारं अवग्रहस्य मुख्यतया प्रयोजनं ह्रस्वस्वरस्य उच्चारणकालज्ञापनार्थम्। ह्रस्वस्वरस्य उच्चारणकालः मात्राकालः अर्थात् एकमात्रिकः कालस्वरूपमवगन्तव्यम्– 'मात्रा ह्रस्वः।'[18] तदनन्तरं अवग्रहस्य उच्चारणकालविषये सूत्रितम्– 'तावदवग्रहान्तरम्'[19] अत्र अवग्रहशब्दस्यार्थः उवटभाष्यानुसारं नानाग्रहः अर्थात् पदयोः पृथक्करणं भवति। समासवर्तिनोः पदयोः पृथक्करणकाले एकमात्राकालं वेदितव्यम्। यथा– पुरःऽहितम्।

अथर्ववेदीयप्रातिशाख्यानुसारं कौत्साचार्यकृतचतुरध्यायिकायां विरामकालनिरूपण-प्रसङ्गे अवग्रहस्य मात्राकालः अर्थात् एकमात्राकालः विरामकालः व्यवधानं वा निर्धारितम्– 'ऋगर्धर्चपदान्तावग्रहविवृत्तिषु मात्राकालः कालः।'[20] अवग्रहशब्दस्य पारिभाषिकार्थः पृथक्करणम्। चतुरध्यायिकायां तत् स्पष्टीकृतम्–'पूर्वेणावग्रहः।'[21] समासे यदवग्रहः अर्थात् पृथक्करणं भवति तत् ह्रस्वसमकालः मात्राकालः भवति। समासे अर्थात् समस्तपदे पूर्वपदेन परस्य पदस्य पदपाठे पृथक्करणं भवति। अनेन पृथक्करणेन समस्तपदस्य समस्तरूपं न तु विच्छिन्नं तथा बाधितं भवति। एवञ्च तस्य पूर्वोत्तरपदयोः सत्तापि स्वतन्त्ररूपेण न ज्ञायते। एतदपि ध्यातव्यं यत् पदपाठकाले न सर्वत्र अवग्रहः अर्थात् पृथक्करणं भवति। तर्हि प्रातिशाख्ये अवग्रहस्य निषेधकथनमपि दृश्यते। अष्टाध्याय्यां सूत्रचतुष्टये अवग्रहविषयस्योल्लेखः परिदृश्यते। तत्र अवग्रहशब्दस्य पारिभाषिकार्थः

परवर्तिवैयाकरणाचार्यैः स्पष्टीकृतः। सूत्रचतुष्टयं यथा– (1) 'आक्रोशेऽवन्योर्ग्रहः' (अ. 3.3.45), (2) 'अवे ग्रहो वर्षप्रतिबन्धे' (अ. 3.3.51), (3) 'पदास्वैरिबाह्यापक्ष्येषु च' (अ. 3.1.119) तथा (4) 'छन्दस्यृदवग्रहात्' (अ.8.4.26)।

अत्रस्थ घञ्प्रत्ययान्तर्गत 'आक्रोशेऽवन्योर्ग्रहः' सूत्रस्य व्याख्याप्रसङ्गे अवग्रहपदस्य व्याख्याकाले अभिभवार्थे व्याख्यातं पदमञ्जरीकारेण। आक्रोशभिन्नस्थले अवग्रहशब्दस्य विच्छेदार्थे प्रयोगः समर्थितः। काशिकाकारेण व्याख्यातम् – 'आक्रोशः इति किम्? अवग्रहः पदस्य।' अष्टाध्याय्यां यत् वैकल्पिकः प्रयोगः अस्ति घञ्प्रत्ययप्रसङ्गे 'अवे ग्रहो वर्षप्रतिबन्धे' इति सूत्रान्तर्गतपदे तत् केवलं वर्षप्रतिबन्धेऽभिधेये। यथा– अवग्राहो देवस्य। अवग्रहो देवस्य वा। किन्तु तद्भिन्नार्थे घञ्प्रत्ययो न भवति। यथा– अवग्रहः पदस्य। अपि च, अत्रस्थ क्यप्प्रत्ययान्तर्गत 'पदास्वैरिबाह्यापक्ष्येषु च' सूत्रस्य व्याख्याप्रसङ्गे अवग्रहशब्दस्यार्थः काशिकाकारेण स्पष्टीकृतम् –'पदे तावत् प्रगृह्यं पदम्। यस्य प्रगृह्यसंज्ञा विहिता। अवगृह्यं पदं यस्यावग्रहः क्रियते।' पदमञ्जरीकारेणोत्ताम् –'समासे पूर्वपदम्। तत्र हि पदकालेऽवग्रहो विच्छेदः।' न्यासकारेणोक्तम्– 'अवगृह्यत इत्यवगृह्यम्। यस्यावग्रहः क्रियते इति। तत्र समुदायपदेऽवग्रहपदानि विविधान्यवगृह्य विच्छिद्याख्यायन्ते। तेनावयवानामवगृह्यत्वाद् अवगृह्यमित्युच्यते।' तर्हि अवग्रहपदेन पृथक्करणं स्पष्टम्। तत्त्वबोधिनीकारेणापि विच्छेदार्थे अवग्रहपदस्य स्पष्टीकरणार्थमेतद् उक्तम् –'अवगृह्यम् – यस्य पदस्यावग्रहः क्रियते तत् पदम्। अवग्रहो विच्छेदः। अवान्तरपदसंज्ञां सूचयितुं पदपाठकाले किंचित्कालमवसानम्। बालमनोरमाकारेणोक्तम्– ''समस्तपदस्य अवान्तरविच्छेदः अवग्रहः। 'अप्रावेत्यादि पदमितिशिरस्कं प्रग्रहः' इति प्रातिशाख्ये प्रसिद्धम्।

वाच्यान्तरप्रयोगे अवग्रहपदस्य भिन्नः भिन्नः अर्थः ज्ञायते। तद् यथा– कर्मवाच्ये अवग्रह-पदस्यार्थः विच्छेदपूर्वकं पठितं पदम्। अष्टाध्याय्यन्तर्गतस्य अष्टमाध्यायस्य चतुर्थपादे णत्वप्रकरणस्थित –'छन्दस्यृदवग्रहात्' सूत्रस्य व्याख्याप्रसङ्गे काशिकाकारेणोक्तम्– 'ऋकारान्तादवग्रहात् पूर्वपदाद् उत्तरस्य णकारादेशो भवति छन्दसि विषये। यथा– नृमणाः। पितृयाणम्। अत्र हि नृऽमणाः, पितृऽयाणमिति ऋकारोऽवगृह्यते।' अवगृह्यते अर्थात् विच्छिद्य पठ्यते इति अवग्रहः। काशिकाकारमते– 'विषयोपलक्षणार्थम् अवग्रहग्रहणम्। अपदान्ते चावग्रहो नास्ति।'

अवग्रहस्य प्रयोगस्थलं मुख्यतया सन्धि–समास–सुब्विभक्ति–प्रत्यय–उपसर्गयुक्तपदे दृश्यते। सन्धिकार्ये– करणवाच्ये अवग्रहस्य प्रयोगस्थलं मूलतः सन्धिकार्ये। तस्य प्रयोगस्थलं 'एङः पदान्तादति' इत्यनेन यत्र अच्सन्धिस्थले पूर्वपदान्तस्थित एकारे अथवा

ओकारादनन्तर–परवर्तिपदस्य आदौ स्थितस्य अकारस्य यत्र पूर्वरूपैकादेशो भवति तत्र अकारस्य अदर्शनं भवति। अर्थात् एकारस्य तथा ओकारस्य परवर्तिनः अवग्रहस्य सूचनार्थमदृष्टस्य अकारस्य चिह्नरूपेण अवग्रहसूचकप्रतीकचिह्नं (ऽ) भवति। अवग्रहचिह्नस्यार्थः सन्धिकार्ये अदृष्टोऽकारः अथवा लुप्तोऽकारः (ईश्वरचन्द्र विद्यासागरमते)। वाजसनेयिप्रातिशाख्यस्य प्रथमाध्याये 'वर्णस्यादर्शनं लोपः'[22] सूत्रस्य व्याख्याप्रसङ्गे उवटाचार्येण तथा अनन्तभट्टमहोदयेन 'अदर्शनं' पदस्यार्थः अनुपलब्धिः क्रियते। अनन्तभट्टेनोक्तम्– 'दृशिधातुरुपलब्धिवचनः। अनुपलब्धिरदर्शनं वर्णस्य लोपसंज्ञं स्यात्।' यद्यपि एततृस्थले अकारस्य प्रदर्शनस्य अत्यावश्यकता नास्ति, केवलं पूर्वम् अकारस्य अस्तित्वमासीदिति विषयस्य द्योतकरूपेण ज्ञायते तथापि शब्दस्वरूपस्य सुस्पष्टीकरणार्थम्– अवग्रहचिह्नप्रदानेन का बाधा? संस्कृतकवयः काव्ये श्लेषादिस्थले अवग्रहचिह्नं विना शब्दप्रयोगे गौरवमनुभवन्ति, लौकिकव्याकरणानुसारं असन्धिः अर्थात् प्रकृतिभावार्थेऽपि अस्यावग्रहस्य प्रयोगः दृश्यते भर्तृहरिकृतनीतिशतके अवग्रहप्रतीकं विना यथा– 'धिक् तां च तं च मदनं च इमां (चेमां) च मां च।'

सन्धिस्थले अवग्रहस्य उपस्थितिः तत्रैव भवति यत्र उत्तरपदे– आदौ अकारस्य उपस्थितिः दृश्यते। यथा हरे अव = हरेऽव। किन्तु लेखनसमये 'हरेव' इत्येवं रूपमपि प्रचलति। अत्र शंका– हर+ इव = हरेव इत्येवं रूपमपि भवितुमर्हति। एतच्छङ्का-निराकरणार्थं यदि अदृष्ट–अकारस्य प्रतीकरूपेण यथा हस्तचम्पकन्यायानुसारं हस्ते चम्पकपुष्पं पूर्वमासीत् किन्तु पश्चात् पुष्पस्य अभावेऽपि सुगन्धस्य उपस्थितिरनुभूयते तथैव सन्धिकार्यादनन्तरं अकारस्य अदर्शनेऽपि तत्र अकारस्य अस्तित्वज्ञापनार्थं प्रतीकरूपेण अवग्रहचिह्नस्यावश्यकता अस्ति। साधारणतया अच्सन्धिकार्ये यत्र पूर्वपदान्ते एकारः अथवा ओकारः विद्यते तत्रैवावग्रहस्यावश्यकता अस्ति। मम विचारे अवग्रहशब्दस्यार्थः ह्रस्वसमकालः एकमात्रिकं प्रतीकचिह्नम्। तर्हि हत्वा + आदाय हत्वाऽऽदाय भवति, अत्र आदायपदस्थित – आदि आकारस्यार्थः एकमात्रिकः 'अ' + एकमात्रिकः 'अ', तत्स्वरूपस्य द्विवारम् अवग्रह-प्रदर्शनेन (ऽऽ) स्पष्टता भवति।

**समासस्थले–** वाजसनेयिप्रातिशाख्यस्य पञ्चमाध्याये मूलतः अवग्रहविधानं (5.1-23) तथा तस्य निषेधविषयकं (5.24-45) विविधा नियमाः सन्ति। वेदमन्त्रस्य पदपाठकाले समासस्थितपूर्वपदस्य उत्तरपदात् पृथक्करणार्थं अवग्रचिह्नं प्रयुज्यते। तत्र तु उत्तरपदस्यादौ अकारस्य आवश्यकता नास्ति। तर्हि एतत् ध्यातव्यं यत् सन्धिकार्ये अवग्रहस्य प्रयोगस्थले उत्तरपदस्यादौ अ-कारस्य उपस्थितिः अवश्यमेव भवति। किन्तु

समासे अवग्रहः केवलं पदद्वयमध्ये पृथक्करणार्थम्। अत्र उत्तरपदस्यादौ अकारस्य उपस्थितिः न अत्यावशकीयम्।

वाजसनेयिप्रातिशाख्यस्य चतुर्थाध्याये क्रमपाठविधिप्रसङ्गे 'पूर्वस्योत्तरसंहितस्य स्थितोप-स्थितमवगृह्यस्य'[23] इति सूत्रे अवग्रहपदस्य वेष्टनमुक्तम्। तर्हि अत्र समासस्थले तथा समास-भिन्नस्थलेऽपि अवग्रहनिरूपणं क्रियते। अस्य प्रातिशाख्यस्य पञ्चमाध्यायस्य प्रथमसूत्रानुसारं केवलं समासे अवग्रहः अर्थात् द्वयोः पदयोः पृथक्करणं स्यात् – 'समासेऽवग्रहो ह्रस्वसमकालः'[24] किन्तु तदनन्तरं समासेतरस्थलेऽपि अवग्रहनियमाः दृश्यन्ते। अवग्रहविषयकसूत्रसमूहे बहुधा साम्यं दृश्यते वाजसनेयिप्रातिशाख्य (वा.प्र.) तथा च अथर्ववेदीयप्रातिशाख्यस्य लक्षणग्रन्थे शौनकीयचतुरध्यायिकामध्ये। चतुरध्यायिकानुसारं[25] प्रगृह्य प्रग्रहणम् अर्थात् प्रकृतिभावं किन्तु अवगृह्य अवग्रहणम् अर्थात् पृथक्करणम्। समासस्थलस्य कतिपयोदाहरणानि यथा– बहुपदप्रकृतिभूते समासे अर्थात् बहुपदयुक्तसमासे। यत्पश्चात्कालिकं पदं भवति तेन अवग्रहो भवति। यथा– प्रजापतिरिति प्रजाऽपतिः। किन्तु तस्यापवादः यथा– 'सर्पदेवजनेभ्यः' पदं पूर्वेण पदेनावगृह्येते–सर्पऽदेवजनेभ्यः। तूणवध्ममिति पदं उत्तरेण पदेनावगृह्यते– तूणवऽध्मम्। एवञ्च रायस्पोषदे तथा विजावा इति पदद्वयं उत्तरपदेनावगृह्यते– रायस्पोषऽदे, विजाऽवा। वर्णसमासः तथा सङ्ख्यासमासस्थले वैकल्पिकः अवग्रहविधानं दृश्यते। वर्णसमासे यथा–धूम्ररोहित इति धूम्रऽरोहितः एवञ्च सङ्ख्यासमासे यथा– सप्तदशेति सप्तऽदश। किन्तु सङ्ख्यापूर्वपदे तथा उत्तरपदे धाप्रत्यय-युक्तसमासस्थले पृथक्करणं न भवति। यथा–अष्टधा। वाजसनेयिप्रातिशाख्यानुसारं अत्रोल्लिखितानि पञ्चदशपदानि सावग्रहाणि भवन्ति। तद् यथा– त्वायवः, शंयोः, बर्हिर्धा, अस्मयुम्, मृण्मयीम्, सुम्नया, आशुया, साधुया, धृष्णुया, विशालम्, अनुया, मृगयुम्, उभयादतः, अपामार्ग तथा किम्पूरुषम्।

वैकल्पिकावग्रहविधानमपि दृश्यते कतिपयपदसमूहे यथा– पारावतान्, अग्निमारुताः, अधीवासम् इत्यादयः। वाजसनेयिप्रातिशाख्यस्य अवग्रहविषयकाणां षट्चत्वारिंशतः सूत्राणां मध्ये त्रयोविंशतिसूत्रे अवग्रहविधानं तथा द्वाविंशतिसूत्रे अवग्रहस्य निषेधकथनमपि दृश्यते। समासस्थले अवग्रहनिषेधः यथा– प्रतिषेधे नावग्रहः[26] अर्थात् प्रतिषेधवाचिना नञा निपातेन सह समासस्थले अवग्रहो न स्यात् यथा अरक्षसा, अनमीवाः इत्यादयः। एवञ्च द्वापदपूर्वं समासपदं नावगृह्यते'[27] यथा– द्वादश। अपि च, सम्, इदा एताभ्यां परः वत्सरशब्दयुक्त-समासे अवग्रहः न भवति (वा.5.32) यथा संवत्सरः। संख्यापूर्वपदो तथा धाप्रत्ययोत्तरपदयुक्तसमासस्थले अवग्रहो न भवति (वा.प्रा.5.27) यथा– त्रिधा।

द्विवचनान्तानि स्वरान्तपूर्वपदानि द्वन्द्वसमासपदानि नावगृह्यन्ते[28] यथा– इन्द्राग्नी। एवञ्च यदि द्वन्द्वसमासयुक्तस्य पदस्य पूर्वपदं दीर्घान्तं तथा उत्तरपदे आदौ व्यञ्जनं भवति तस्मिन् स्थले अवग्रहः अर्थात् पृथक्करणं न भवति[29] यथा– द्यावापृथिवी। व्याकरणनियमबहिर्भूतसमासात् एतानि पदानि नावगृह्यन्ते–विशौजा, दित्यौही, तुर्यौही, पष्ठौही, दुष्टरः, विष्टरः, विष्टपः, विष्टम्भ इत्यादयः।

**प्रत्ययस्थले–** अतिशयवाचिनः तरप्-तमप्प्रत्यययोः परयोः पूर्वपदेऽवग्रहः भवति।[30] यथा– 'वह्नितमम्' इति पदे वह्निऽतमम्। किन्तु वीतम–हुतम–सूतम–गोपातम–रत्नधातम–वसुधातम–एतानि षट्पदानि तमपः पूर्वेण पदेनावगृह्यन्ते। यथा– रत्नधातममिति पदे रत्नऽधातमम्। तद्वति मत्वर्थीये तद्धिते वतौ परभूते अवग्रहो भवति न्यायसंहितम् अर्थात् व्याकरणशास्त्रोक्तं सन्धियुक्तं वा सन्धिमत् पदं चेद्भवति[31] यथा– मधुमदिति मधुऽमत्। किन्तु मत्वर्थीये वतिभिन्नस्थले अवग्रहो न भवति। यथा– एतावत् पदं परिमाणवाचि तर्हि अत्र पृथक्करणस्य आवश्यकता नास्ति। एवञ्च–शस्, त्वं, त्रा, ताति– एतेषु चतुर्षु तद्धितेषु परेषु पूर्वमवग्रहः भवति।[32] यथा– पुरुत्रेति पुरुऽत्रा। अपि च– प्रत्न–पूर्व–विश्व–इम, ऋतु एभ्यः पञ्चभ्यः 'था-प्रत्ययोऽवगृह्यते।'[33] यथा–प्रत्नऽथा, पूर्वऽथा, विश्वऽथा, इमऽथा इत्यादयः। सुबन्तस्थले ह्रस्वस्वरात्, व्यञ्जनाच्च भकारादौ विभक्तिप्रत्यये परे अवग्रहो भवति।[34] सुब्विभक्तौ तृतीया–चतुर्थी–पञ्चमीस्थले केवलं द्विवचने बहुवचने च भकारादयः प्रत्ययाः भवन्ति–भ्याम्–भ्याम् तथा भिस्–भ्यस्–भ्यस्।[35] यथा– तिष्ठद्भ्यः स्थले तिष्ठत्ऽभ्यः इति। एवञ्च, त्रशयोः प्रत्यययोः परयोः गिरिशब्दोऽवगृह्यते[36] यथा–गिरित्रेति गिरिऽत्र। अपि च वाजसनेयिप्रातिशाख्यानुसारं 'इव' 'कार', 'आम्रेडित', तथा 'अयन' एतेषु प्रत्ययेषु परभूतेषु पदस्थलेषु अवग्रहो भवति।[37] यथा–स्रुचीवेति स्रुचिऽइव, हिङ्कारायेति हिम्ऽकाराय, संसमिति सम्ऽसम्, प्रायनायेति प्रऽअयनाय।

प्रत्ययस्थलेऽपि अवग्रहनिषेधः दृश्यते। समासादनन्तरं तद्धिते उत्पन्नेऽवग्रहो न भवति यथा–त्रैष्टुभेन। कृत्प्रत्ययलोपस्थले अञ्चतेर्धातोः सहतेश्च अवग्रहो न भवति। यथा–प्रत्यङ्। एवञ्च उपसर्गस्थलेऽपि अवग्रहनिषेधः यथा–उद्धृता। चतुरध्यायिकानुसारं हन्, हृ, स्था तथा स्तम्भ एतेषु धातुषु परेषु उद् इत्यस्मात् उपसर्गात् अवग्रहो न भवति (4.2.18)।

अथर्ववेदीयप्रातिशाख्यस्य लक्षणग्रन्थे चतुरध्यायिकायां चतुर्थाध्यायस्य प्रथमे पादे 'पूर्वेणावग्रहः' इत्यतः 'सुभिषक्तमस्तमे' पर्यन्तं (4.1.60-99) चत्वारिंशत्सूत्रे अवग्रहस्य विधानं स्पष्टरूपेण परिदृश्यते। पुनः अवग्रहस्य निषेधकथनमपि चतुरध्यायिकायां (4.2.1-

4.2.28) सुस्पष्टरूपेण प्रतीयते। ग्रन्थानुसारं प्रगृह्यसंज्ञकम् अवग्रहयोग्यं यत् पदं तत् चर्चायां क्रमेण प्रग्रहप्रदर्शनानन्तरम् अवग्रहप्रदर्शनं कर्तव्यम् (4.4.24)। चतुरध्यायिकामते समासे अर्थात् समस्तपदे पूर्वेण परस्यावग्रहः भवति (समासे च 4.1.62)। प्रत्ययत्थलेऽपि अवग्रहविषये उल्लेखनीयसूत्राणि–तद्धिते धा (4.1.66), त्राकारान्ते (4.1.67), थानेकाक्षरेण (4.1.68), तरतमयोः (4.1.69), मतौ (4.1.70) वकारादौ च (4.1.71), मयेऽसकारात् (4.1.77), के व्यञ्जनात् (4.1.78), भिर्भ्यांभ्यः सुः (4.1.84) इत्यादयः।

चतुरध्यायिकायामपि अवग्रहस्य निषेधकथनं दृश्यते। मत्वर्थीयप्रत्यये परे तकारात् सकाराच्च नावगृह्यते न तकारसकाराभ्यां मत्वर्थे 4.2.1)। तुलनीयः भसंज्ञाविधान-प्रसङ्गे पाणिनिना सूत्रितम् – 'तसौ मत्वर्थे' (अष्टाध्यायी 1.4.19)। देवतानां द्वन्द्वे समासे अवग्रहो न भवति यथा– मित्रावरुणा ('देवताद्वन्द्वे च'–चतुर् 4.2.3 तुलनीय अष्टा. 6.3.26 पूर्वपदस्य आनङ्–आदेशप्रसङ्गे)। द्वन्द्वसमासयुक्तपदस्य पूर्वपदं यत्र दीर्घान्तं तथा उत्तरपदे व्यञ्जनादिस्थले अवग्रहो न भवति (4.2.4)। रात्रि इति परे अहो पदं नावगृह्यते (4.2.6)। उपसर्गस्थले सकारादौ कृधातौ परे सति सम्, परि इत्येताभ्यामुपसर्गाभ्यां नावगृह्यते यथा– संस्कृतम्, परिष्कृता इत्यादिस्थले। कतिपय-पदविशेषस्थले अवग्रहो न भवति यथा– षोडशः, समुद्रः, विश्पतिः, विश्पत्नी, जास्पत्यम्, मनुष्यत्, त्रेधा, दिगर्थे आशा इत्यादयः (4.1.16-28)। संज्ञार्थे प्रयुक्तं पदं नावगृह्यते (4.1.23) यथा– न्यग्रोधाः। पुनः अव्ययानां पदानामवग्रहः न भवति (4.2.27)। उद् इत्यस्मात् उपसर्गात् अवग्रहो न भवति यथा हन्, हृ, स्था तथा स्तम्भ एतेषु धातुषु परेषु स्थितिस्थलेषु। यथा– उद्धृता।

**निष्कर्षः–** व्याकरणनये प्रातिशाख्यसमूहे विशेषतः वाजसनेयिप्रातिशाख्यस्य सम्पूर्णे पञ्चमाध्याये षट्चत्वारिंशत्संख्यके सूत्रे तथा चाथर्वप्रातिशाख्यस्य लक्षणग्रन्थे चतुरध्यायि-कायां चतुर्थाध्यायस्य प्रथमे पादे चत्वारिंशत्संख्यके सूत्रे तथा द्वितीये पादे अष्टाविंशति-संख्यके सूत्रे एवञ्च ऋक्प्रातिशाख्ये तथा च तैत्तिरीयप्रातिशाख्ये पृथक्करणार्थे अवग्रहविषयस्य विस्तृतालोचना विषयगाम्भीर्यस्य परिचायिका। यद्यपि प्रातिशाख्यसमूहे अवग्रहस्य चर्चा विस्तारपूर्वकेणास्ति तथापि अत्र संक्षिप्तपरिसरे केवलं किञ्चित् विशेषस्थलस्योपस्थापनं कृतं मया। व्याकरणनये शब्दस्य विश्लेषणद्वारा शब्दसाधुत्वविषये पुष्टिर्भवति। शब्द-परिज्ञाने अवग्रहस्य आवश्यकता सर्वदैव स्वीकरणीया। अवग्रहस्य ह्रस्वसमकालः मात्राकालः तर्हि एकमात्रिकस्य उच्चारणकालबोधसौकर्यार्थमवग्रहप्रतीकप्रदर्शनम् अत्यावशकीयम्।

अनेन प्रतीकेन एकमात्रिकता सुस्पष्टतयावगम्यते। विरामकाले द्योतकरूपेण तथा ह्रस्वसमकालस्य प्रतीकरूपेण अवग्रह (ऽ) चिह्नस्यावश्यकता संस्कृतभाषायां, सर्वत्र विशेषतः सन्धि-समास-प्रत्यय-उपसर्गस्थले स्पष्टतया अनुमीयते।

*

**सन्दर्भाः–**


1. पदचन्द्रिका (अमरकोषस्य टीका) 2.492
2. अमरकोषः 2.492
3. पदचन्द्रिका 2.492
4. अष्टाध्यायी (अ) 3.3.51
5. रघुवंशम् 1.62
6. तदैव 10.48
7. तदैव 12.29
8. कुमारसम्भवम् 5.61
9. रामायणम् 5.44.8
10. नैषधचरितम् 1.20
11. हितोपदेशः 2.98
12. भागवतपुराणम् 4.7.27
13. शिशुपालवधम् 1.71
14. मालविकाग्निमित्रम् 5.14
15. वाजसनेयिप्रातिशाख्यम् (वा.प्रा.) 3.3
16. वा. प्रा. 5.1
17. तैत्तिरीयप्रतिशाख्यम् 1.49
18. ऋक्प्रातिशाख्यम् 1.27
19. तदैव 1.28
20. चतुरध्यायिका (चतुर्) 3.3.40
21. चतुर् 4.1.60
22. वा. प्रा. 1.141
23. तदैव 4.190
24. तदैव 5.1
25. चतुर् 4.4.60
26. वा. प्रा. 5.24
27. तदैव 5.26
28. तदैव 5.28
29. चतुर् 4.2.24
30. तदैव 4.1.64; वा.प्रा. 5.2
31. चतुर् 4.1.70; वा.प्रा. 5.8
32. वा. प्र. 5.19
33. तदैव 5.12
34. वा. प्रा. 5.13
35. चतुर् 4.1.84
36. वा. प्रा. 5.17
37. वा. प्रा. 5.18


*

# वैदिकपौराणिकसन्दर्भेषु सरस्वतीसरित्

**शैलेशकुमारमिश्रः**

सरितः सन्त्यस्माकं राष्ट्रस्य रक्तवाहिन्यः यासु सङ्कटापन्नासु राष्ट्रमपि सङ्कटापन्नं भवति। नदीभिः सह अस्माकमात्मीयता अस्मदीया आस्था वरीवृत्यते। गङ्गावतरणं नाम उत्सवदिनं गङ्गादशहरेति नाम्ना मान्यते। अस्मत्पूर्वपुरुषैः महर्षिभिः वेदेषु पुराणेषु च सरितः मातृरूपेण देवीरूपेण वा आकारिताः आराधिताश्च। गङ्गायमुनानर्मदाप्रभृतीः प्रति अस्माकं यादृशी आस्था विद्यते तादृशी एव आस्था अन्तःसलिलां सरस्वतीं प्रति अप्यस्ति। वैदिकवाङ्मयेषु पुराणेषु सरितः रामायणमहाभारतादिषु च सरस्वतीसरिद्विषये विस्तरेण निगदितमृषिभिः।

बदरीनाथतीर्थस्य पार्श्व एव स्थितं माणाग्रामस्योत्तरे भागे भीमसेतुः वर्तते। अनुश्रुतिरियं वर्तते यत् स्वर्गारोहणाय गच्छतां पाण्डवानां मार्गे तीव्रप्रवाहिणी सरित् आसीत्। द्रौपदी तस्याः सरितः पारे गन्तुं नाशक्नोत्तदा भीमेन एका बृहच्छिला तत्र धारायं स्थापिता यामारुह्य द्रौपदी सौविध्येन पारं गता। एषा एव बृहच्छिला भीमशिला भीमसेतुः वेति नाम्ना विख्याता। अस्याः एव बृहच्छिलायाः पश्चभागे एकस्याः सरितः तीव्रावरणं दृश्यते। तत्रैव शैलक्रोडात् प्रस्फुटिता सती सा तत्रैव अलकनन्दायां विलीयते। लोकश्रुतिरियं वर्तते यदियमेव सरस्वत्याः उद्गमस्थलं वर्तते। अत्र सरस्वतीदेव्याः मन्दिरमपि विराजते। अस्याः सरस्वतीनद्याः विषये महर्षिभिः वेदेषु पुराणेषु वा किं प्रतिपादितमिति अत्र विमर्शनीयं वर्तते।

यथा हि पुराणेषु गङ्गां प्रति श्रद्धातिशयः प्रकटितः तथैव वेदेषु विशेषतः ऋग्वेदे सरस्वतीं प्रति श्रद्धाभावः प्रकटितः। अनेकेषु सूक्तेषु सरस्वती स्तुता, पुण्यतमा नदीयमिति ऋषिर्वक्ति–

**अम्बितमे नदीतमे देवितमे सरस्वति।**[1]

अस्मिन्मन्त्रे ऋषिणा सरस्वती सर्वश्रेष्ठा नदी सर्वश्रेष्ठा देवता सर्वश्रेष्ठा माता चेति समाकारिता। ऋग्वेदे बहुषु स्थानेषु सरस्वत्याः उल्लेखः प्राप्यते। तत्र केषुचित्

स्थानेषु सा देवीरूपा केषुचिच्च स्थानेषु नदीरूपा वर्तते। ऋग्वेदे तस्याः यादृशं स्वरूपं प्रतिपादितं तेनेदं ज्ञायते यत् सरस्वती तीव्रप्रवाहमयी नदी आसीत्। सरस्वत्याः वेगवत्यः धाराः मार्गागतान् शिलाखण्डान् खण्डयन्ति–

**इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः।**
**पारावतघ्नी सुवृक्तिभिः सरस्वती मा विवासेम धीतिभिः।।**[2]

सरस्वत्याः वेगमयः अविच्छिन्नप्रवाहः गर्जन्निव प्रवहति। ऋग्वेदस्य ऋषिः इदमित्थं वर्णयति–

**यस्या अनन्तो अह्रुतस्त्वेषश्चरिष्णुरर्णवः।**
**अमश्चरति रोरुवत्।**[3]

सरस्वत्याः सप्त जलधाराः अस्याः सप्त सहायिकाः नद्यः आसन् इतीत्थं प्रतिपादितम् ऋग्वेदे यत्र ऋषिः निगदति यत् सप्तस्वसृभिर्युक्ता सती सरस्वती स्तुत्या खलु–

**उतः न प्रिया प्रियासु सप्तस्वत्या सुजुष्टा।**
**सरस्वती स्तोम्या भूत्।।**[4]

'सप्तसिन्धवः' 'सरस्वती सप्तथी सिन्धुमाता' (ऋग्वेद 7.36.6) इति ऋग्वेदे प्रयुक्तेन पदद्वयेन अस्याः सप्तसहायिकानां नदीनां प्रमाणं लभ्यते। अनेनेदं सिध्यति यत् सरस्वती काचिद् विशाला प्रवाहमयी च सरिदासीत्।

शुक्लयजुर्वेदे सरस्वत्याः पञ्च सहायिकाः सरितः उल्लिखिताः। तत्र स्पष्टतया उल्लिखितमिदं यत् शतद्रुचन्द्रभागाविपाशादृषद्वतीरावतीप्रभृतयो नद्यः सरस्वतीम् अपिगच्छन्ति–

**पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः।**
**सरस्वती तु पञ्चधा सो देशेऽभवत् सरित्।।**[5]

शुक्लयजुर्वेदस्य विश्रुतो भाष्यकारः महीधरः भाष्ये इदमुल्लिखति यदेताः पञ्च नद्यः स्वीयां सञ्ज्ञां विहाय सरस्वत्याः नाम गृह्णन्ति। अर्थात् एताः पञ्च सरितः सरस्वत्यां समाहिता भवन्ति– **नदीदेवतायाः पञ्च नद्यः दृषद्वतीशतद्रुचन्द्रभागाविपाशेराव-त्यादिका सरस्वतीमपियन्ति अपिगच्छन्ति।**[6]

अत्र मन्त्रे सस्रोतसः पदं ध्यातव्यं वर्तते। एताः एकस्मादेव स्रोतसः निःसृताः सरस्वत्यां च समाहिताः। पूर्वाभिमुखी प्राची सरस्वती पश्चिमाभिमुखी सरस्वती चेति सरस्वत्याः

शाखाद्वयं उल्लिखितं स्कन्दपुराणे–

**ततः सरस्वतीं प्राह देवदेवो जनार्दनः।**
**त्वमेव व्रज कल्याणि प्रतीच्यां लवणोदधे॥**[7]
**यदि पापजनाकीर्णं न वाञ्छसि धरातलम्।**
**पातालतलसंस्था त्वं नय वह्निं महोदधौ॥**
**यदातिश्रमसंयुक्ता वह्निना दह्यसे भृशम्।**
**तदा विभिद्य वसुधां प्रत्यक्षा भव पुत्रिके॥**
**कृत्वा वक्त्रं विशालाक्षि प्राची भव सुमध्यमे।**[8]

सरस्वतीविषयकम् आख्यानमेकं स्कन्दपुराणस्य प्रभासखण्डे प्राप्यते। तत्रैव प्राची प्रतीची इत्येतयोः शाखयोः चर्चा कृतास्ति। तच्चाख्यानमित्थं वर्तते–

दानवानां संहारार्थं देवैः दधीचिमुनेः अस्थिभिः शास्त्राणि निर्ममिरे। कालान्तरे दधीचिसुतः पिप्पलादः एतद् ज्ञातवान् यद् देवानां छलेन तस्य पिता निजदेहं तत्याज। क्रोधाभिभूतः पिप्पलादः देवान् हन्तुं तपश्चक्रे। स स्वीयजङ्घाभ्यां वडवामजनयत्। कालाग्निसदृशं भयङ्करं वडवानलं पिप्पलादः आदिशत् यत् स सर्वान् सुरगणान् भक्षयित्वा भस्मीकरोतु। आतङ्किताः सुराः सर्वे विष्णुशरणं जग्मुः। विष्णुना अभयं प्रदत्तं वडवानलश्च निर्दिष्टः यदेकैकमेव देवान् भक्षयतु सकृदेव सर्वान् नेति देवैः वडवानलश्चोक्तः यत् जलमस्माकमग्रजं वर्तते तस्मात् प्रथमतः धरागतमशेषं जलं भक्षणीयम्। केन यानेन त्वं जलस्थानं गमिष्यसीति विष्णुना पृष्टः वडवानलोऽवोचत्– ''नाहमश्वादिभिः गन्तुकामः अस्मि अपितु कुमारीकरसम्पर्केण गमिष्यामि।''

विष्णुः गङ्गां न्यवेदयत् यत् सा वडवाग्निमिमं सागरं प्रति नयतु यतो हि त्वदतिरिक्ता न काचित् एतत्कार्यार्थं समर्था इति। गङ्गा प्रोक्तवती– ''भगवन्! एनं वडवाग्निं नेतुमहमप्यसमर्था। अस्याः वह्निज्वालाजन्यस्तापः असह्यः खलु? यमुनासिन्धुप्रभृतयोऽपि सरितः विष्णुना एतत्कार्यार्थं निवेदिताः किन्तु न कापि तत्पराऽभूत्। तदा विष्णुना सरस्वतीसरित् आहूता प्रार्थिता च– ''त्वमेव एनं वडवानलं पश्चिमसागरं यावन्नय।'' निजपितुराज्ञां विना नाहं किञ्चिदपि करिष्यामीति वदन्त्यां सरस्वत्यां विष्णुना विरिञ्चिः प्रार्थितः। पश्चाद् ब्रह्मणाऽऽदिष्टा सरस्वती उवाच– ''तात! मया भवदादेशः शिरसा धार्यते किन्तु रौद्रोऽयं वडवानलः मां भक्षयिष्यति कलौ च पृथिव्यां पापिनां स्पर्शः मां मलिनीकरिष्यति।'' सरस्वतीमवबोधयन् ब्रह्माऽवदत्– ''पुत्रि! यदि पापकर्मणां धरायां

नावतर्तुमिच्छसि तर्हि धरायामन्तः गच्छन्ती एनं सागरं यावन्नय। यदा च वह्निज्वालादाहोऽनुभूयते चेत् पृथिवीमुच्छिद्य प्रकटीभव। पूर्वस्यां दिशि च गच्छ। तव तीरे तीर्थानि भविष्यन्ति।''

पितुरादेशात् देवरक्षाकार्यार्थं तत्परा सती सरस्वती गङ्गया पृष्टा– ''सखि! पुनरावयोर्मेलनं कुत्र भविष्यति''? एवं पृष्टा सरस्वती प्रोक्तवती– 'यदा यदा त्वं पूर्वदिशि अवलोकयिष्यसि तदा तदा मां द्रक्ष्यसि।'' इत्थंप्रकारेण सरस्वती वडवानलमादाय पश्चिम-लवणोदधिं प्रति जगाम। प्रतीचीसरस्वती पञ्चस्रोता इत्यभिहिता। हरिणी वज्रिणी न्यङ्कु कपिला सरस्वती च तेषां पञ्चानां स्रोतसां नामानि सन्ति–

**हरिणी वज्रिणी न्यङ्कुः कपिला च सरस्वती।**
**पानावगाहानृणां पञ्चस्रोता सरस्वती॥**[9]

पश्चिमाशायां प्रवहन्ती सरस्वती हर्युषितायां द्वारवत्यां समाविशति–

**तस्मादन्यत् सरस्वत्यां तीर्थं द्वारवती स्मृतम्।**
**तीर्थानां प्रवरं देवि यत्र सन्निहितो हरिः॥**[10]

वर्तमानकालीना द्वारकानगरी एव द्वारवतीतीर्थं विद्यते। एतदपि स्पष्टं भवति यत् उपर्युक्तैः पञ्चस्रोतोभिः निर्मिता एषा प्रतीची सरस्वती पश्चिमदिशायां लवणोदधिं सङ्गच्छति। सोमेशतीर्थाद् दक्षिणपूर्वदिशि सागरं सम्मिलति–

**एवं सरस्वती प्राप्ता प्रभासक्षेत्रमुत्तमम्।**
**ब्रह्मलोकान्महादेवि सर्वपापप्रणाशिनी॥**
**सोमेशाद्दक्षिणाग्नेये सागरस्य समीपतः।**
**संस्थिता तु महादेवी वडवानलधारिणी॥**[11]

अत्र सोमनाथ एव सोमेशतीर्थनाम्ना सङ्केतितः प्रतीयते। प्राची सरस्वती सरस्वत्याः पूर्वाभिमुखी धारा वर्तते या गङ्गायां विलीयते। स्कन्दपुराणानुसारं धारेश्वरतीर्थादागता सरस्वती गङ्गोद्भेदतीर्थं प्राप्नोति यत्र गङ्गासरस्वत्योः सङ्गमो विराजते–

**तत्र तीर्थं पुनस्त्वन्यत्तीर्थं धारेश्वरं स्मृतम्।**
**धारेश्वरात् पुनश्चान्यः गङ्गोद्भेदमिति स्मृतम्॥**
**सारस्वतं तथा गाङ्गं यत्रैकं संस्थितं जलम्।**[12]

सरस्वतीगङ्गयोः सङ्गमस्योल्लेखः रामायणेऽपि वाल्मीकिना कृतः। केकयदेशाद-

योध्यामागच्छन् भरतः सरस्वतीगङ्गासङ्गमं प्राप्नोति–

**सरस्वतीं च गङ्गां च युग्मेन प्रतिपद्य च।**
**उत्तरान्वीरमत्स्यानां भारुण्डं प्राविशद्वनम्।।**[13]

सिद्धेश्वरतीर्थं गच्छन्ती एषा सरस्वती पश्चिमाभिमुखी जायते इति स्कन्दपुराणकारः वर्णयति–

**तीर्थे सरस्वतीतीरे तस्मिन् सिद्धेश्वरं स्मृतम्।**
**सिद्धेश्वरात् पुरस्तस्मात्प्रवृत्ता पश्चिमाभिमुखी।।**[14]

प्राची सरस्वती खलु सुदुर्लभा विशेषतया कुरुक्षेत्रे प्रभासतीर्थे पुष्करक्षेत्रे च–

**प्राची सरस्वती देवि सर्वत्रैषा सुदुर्लभा।**
**विशेषेण कुरुक्षेत्रे प्रभासे पुष्करे तथा।।**[15]

प्राची सरस्वती गङ्गायाः अपि श्रेष्ठतरा निगदिता। महाभारते महर्षिः व्यासः कृष्णमुखेनेदं कथयति यत् गयापुष्करादितीर्थगमनं वा गङ्गास्नानं नैवावश्यकं, प्राचीसरस्वत्यां स्नानमेव सर्वकल्मषनाशकम् अस्ति–

**मा गयां गच्छ कौन्तेय मा गङ्गां मा च पुष्करम्।**
**तत्र गच्छ कुरुश्रेष्ठ यत्र प्राची सरस्वती।।**[16]

स्कन्दपुराणस्य प्रभासखण्डे पञ्चत्रिंशत्तमे षट्त्रिंशत्तमे चाध्याये प्राचीसरस्वत्याः उद्भवो विलोपः तस्याः तीरस्थतीर्थानामपि वर्णनं विस्तरेण प्राप्यते। एतत् सम्भाव्यते यद् ऋग्वेदस्य रचनाकालात्परं केनापि विशिष्टभूपरिवर्तनकारणेन सरस्वत्याः प्राची प्रतीचीति धाराद्वयी जनिता। यजुर्वेदे उल्लिखिता पञ्चभिः सहायिकाभिः सरिद्भिः सह प्रवहन्ती सरस्वती प्रतीचीति नाम्ना विश्रुता स्यात्। प्राची सरस्वती ननु दुर्लभा गङ्गोत्सङ्गसमागतेति पुराणानां विमर्शः अत एव प्राचीसरस्वत्याः उल्लेखः अतीव न्यूनः। सरस्वत्याः लोपः अकस्मादेव न बभूव। सरस्वतीनद्याः स्वरूपं क्वचित् दृश्यं क्वचिच्च अदृश्यमितीत्थं वदति व्यासमहामुनिः महाभारते।

पर्वतप्रदेशात् निःसृत्य सरस्वती सागरे पततीत्युल्लेखः स्कन्दपुराणे महाभारते ऋग्वेदे च प्राप्यते। ऋग्वेदे स्पष्टरूपेण इदमुल्लिखितम्–

**एका चेत् सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात्।**[17]

सरस्वत्याः उद्गमस्थलं महाभारते सङ्केतितम्। वनपर्वणि ऋषिः पुलस्त्यः कथयति यत्

'ज्ञानपावनतीर्थस्य' यात्रायाः अनन्तरं मानवः सौगन्धिकवनं गच्छेत्। तत्र ब्रह्मादिदेवताः तपोधनाः महर्षयः सिद्धचारणकिन्नरगन्धर्वाः विशालाकाराश्च नागाः निवसन्ति। तस्मिन् वने प्रविश्य एव मनुष्यः सर्वपापाद्विमुच्यते। तस्मात् स्थानादग्रे सरिच्छ्रेष्ठायाः पुण्यमय्याः सरस्वत्याः उद्गमो वर्तते यत्र प्लक्षवृक्षमूलात् स्रवति सरिदियम्। तत्र वल्मीकान्निःसृते जले स्नानं कर्तव्यम्–

**सौगन्धिकवनं राजंस्ततो गच्छेत मानवः।**
**तत्र ब्रह्मादयो देवा ऋषयश्च तपोधनाः॥**
**सिद्धचरणगन्धर्वाः किन्नराश्च महोरगाः।**
**तद् वनं प्रविशन्नेव सर्वपापैः प्रमुच्यते॥**
**ततश्चापि सरिच्छ्रेष्ठा नदीनामुत्तमा नदी।**
**प्लक्षाद्देवी स्रुता राजन् महापुण्या सरस्वती।**
**तत्राभिषेकं कुर्वीत वल्मीकान्निःसृते जले॥**[18]

हिमालयक्षेत्रे पिप्पलादाश्रमोपकण्ठे वृक्षमूलात् सरस्वती समुद्भूतेति स्कन्दपुराणकारो वदति–

**एवमुक्ता तदा तेन ब्रह्मणा च सरस्वती।**
**हिमवन्तं गिरिं प्राप्य पिप्पलादाश्रमात्तदा॥**
**उद्भूता सा तदा देवी अधस्ताद् वृक्षमूलतः॥**[19]

प्लक्षमूलात् सरस्वत्याः उद्गम इति स्कन्दपुराणेऽपि उल्लिखितम्–

**ततो विसृज्य तां देवी नदी भूत्वा सरस्वती।**
**हिमवन्तं गिरिं प्राप्य प्लक्षात्तत्र विनिर्गता॥**[20]

या सरस्वती ऋग्वेदे महती प्रवाहमयी सरिदिति वर्णिता सैव महाभारते दृश्याऽदृश्या सञ्जाता–

**दृश्याऽदुश्या च भवति तत्र तत्र सरस्वती।**
**एता दिव्याः सप्त गङ्गास्त्रिषु लोकेषु विश्रुताः॥**[21]

महाभारतस्य प्रसङ्गेनानेन सिध्यति यत् सरस्वत्याः लोपः अकस्मादेव नैव सञ्जातः। भीष्मपर्वणि कैलासवर्णनप्रसङ्गे सञ्जयो वदति यत् ब्रह्मलोकादवतीर्य त्रिपथगामिनी गङ्गा सप्तधारासु विभक्ता। एता आसन् वस्वोकसारा नलिनी सरस्वती जम्बूनदी सीता गङ्गा

सिन्धुश्च। एतास्वेव एका धारा सरस्वतीत्याख्या वर्तते या खलु क्वचिद् दृश्या क्वचिददृश्या च वर्तते–

**तत्र दिव्या त्रिपथगा प्रथमं तु प्रतिष्ठिता।**
**ब्रह्मलोकादपक्रान्ता सप्तधा प्रतिपद्यते।।**
**वस्वोकसारा नलिनी पावनी च सरस्वती।**
**जम्बूनदी च सीता च गङ्गा सिन्धुश्च सप्तमी।।**[22]

महाभारते एव शल्यपर्वणि सरस्वती सप्तनामभिराकारिता। वैशम्पायनः कथयति यत् तपोधनैः महात्मभिः यत्र यत्र सरस्वत्याः आह्वानं कृतं तत्र तत्र सा गता। तस्याः तानि सप्त नामानि सन्ति–

**सुप्रभा काञ्चनाक्षी च विशाला च मनोरमा।**
**सरस्वती चौघवती सुरेणुर्विमलोदका।।**[23]

तत्रैव शल्यपर्वणि सरस्वत्याः एतेषां सप्तानां रूपाणां प्राकट्यस्थलमपि वर्णितम्। पुष्करक्षेत्रे यजता ब्रह्मणा यदा सरस्वत्याः आह्वानं कृतं तदा सा सुप्रभेति नाम्ना प्रकटीभूता। नैमिषारण्ये वेदविषयिकां कथावार्तां कुर्वद्भिः मुनिभिराहूता सती सा काञ्चनाक्षीति नाम्ना समागता। गयदेशे यज्ञे विशालेति नाम्ना कोसलप्रदेशे यजता उद्दालकऋषिणाऽऽकारिता मनोरमेति नाम्ना कुरुक्षेत्रे यजनं विदधतः वशिष्ठस्याह्वाने सुरेणुनाम्ना अथ च हिमालये विमलोदका इति नाम्ना प्रकटीभूता।

महाभारते सरस्वत्याः प्रवाहोऽपि वर्णितः। क्वचित् अदृश्या सरस्वती चापि वर्णिता। वेदव्यासेन विनशनतीर्थस्य उल्लेखः कृतः यत्र सरस्वती अदृश्या वर्तते–

**ततो विनशनं गच्छेन्नियतो नियताशनः।**
**गच्छत्यन्तर्हिता यत्र मेरुपृष्ठे सरस्वती।।**[24]

वनपर्वणि विनशनतीर्थस्योल्लेखं कुर्वता ऋषिलोमशेन सरस्वत्याः अदृश्यतायाः कारणमपि स्पष्टीकृतम्। स कथयति यदत्र निषादराजस्य द्वारं वर्तते। निषादानां संसर्गदोषादात्मानं रक्षितुं सरस्वती अत्र धरागर्भे प्रविष्टा–

**एषा सरस्वती रम्या चौघवती नदी।**
**एतद् विनशनं नाम सरस्वत्या विशाम्पते।।**
**द्वारं निषादराष्ट्रस्य येषां दोषात् सरस्वती।**
**प्रविष्टा पृथिवी वीरा मा निषादा हि मां विदुः।।**[25]

पुनश्च ऋषिः सरस्वत्याः प्रकटनस्योल्लेखमपि करोति। स कथयति यदिदं हि चामसोद्भेदनाम तीर्थं वर्तते यत्र सरस्वती प्रकटीभूताः समुद्रगाः सर्वाः पवित्राः सरितः अस्याः सम्मुखं समायताः–

**एष वै चमसोद्भेदो यत्र दृश्या सरस्वती।**

**यत्रैनामभ्यवर्तन्त सर्वाः पुण्याः समुद्रगाः॥**[26]

महाभारतस्य एभिः प्रसङ्गैः सरस्वत्याः दृश्यताऽदृश्यता च सिद्धे।

वामनपुराणस्य विविधवृत्तान्तेषु अपि सरस्वतीसरिदेषा दृश्याऽदृश्येति वर्णिता। अथ चेयं पश्चिमामाशां प्रयाता तत्रैव ऋषयो लोमहर्षणमुनिं पृष्टवन्तः–

**कथमेषा समुत्पन्ना नदीनामुत्तमा नदी।**

**सरस्वती महाभागा कुरुक्षेत्रप्रवाहिनी॥**

**प्रयाता पश्चिमामाशां दृश्यादृश्यगतिः शुभा॥**[27]

जिज्ञासमानानां मुनीनां समाधानं विदधता ऋषिणा प्रोक्तं यत् ऋषिभिः स्तुता सरस्वती कुरुक्षेत्रं प्रविवेश। तत्र रन्तुकं गत्वा कुरुक्षेत्रं समाप्लाव्य पश्चिमाशां प्रयाता–

**इत्यृषेर्वचनं श्रुत्वा मार्कण्डेयस्य धीमतः।**

**नदी प्रवाहसंयुक्ता कुरुक्षेत्रं विवेश हा।**

**तत्र सा रन्तुकं प्राप्य पुण्यतोया सरस्वती।**

**कुरुक्षेत्रं समाप्लाव्य प्रयाता पश्चिमां दिशम्॥**[28]

कुरुक्षेत्रस्य आद्यं नाम ब्रह्मसरः इत्यासीत् ततः रामह्रद इति ख्यातम्। कुरुनाम्ना ऋषिणा कृष्टः इति हेतोः कुरुक्षेत्रमिति नाम सञ्जातम् –

**आद्यं ब्रह्मसरः पुण्यं ततो रामह्रदः स्मृतः।**

**कुरुणा ऋषिणा कृष्टः कुरुक्षेत्रं ततः स्मृतम्॥**[29]

एभिर्बहुविधैः वैदिकैः पौराणिकैश्च साक्ष्यैः सरस्वतीसरिद्विषये कानिचित्तथ्यानि स्पष्टीभवन्ति। सरस्वत्याः उद्गमो हिमालयः वर्तते। एषा सुविशाला वेगवती नदी आसीत्। अस्याः सप्त सहायिकाः नद्यः आसन्। तासु सप्तसु पञ्चनदीनां धाराः सङ्गम्य इयं सोमनाथाद्दक्षिणपूर्वदिशि पश्चिमसागरं सम्मिलति। सरस्वत्याः सैषा धारा प्रतीची सरस्वतीति नाम्ना अभिहिता। अस्याः अपरा पूर्वाभिमुखी धारा गङ्गायां विलीना बभूव या खलु

प्राची सरस्वतीत्यभिहिता। सरस्वतीसम्बद्धानि यानि स्थलानि पौराणिकसाहित्ये वर्णितानि तेषु इदानीं कुरुक्षेत्रं द्वारका च प्रमुखानि वर्तन्ते। सिन्धुसभ्यतायाः विनाशस्य यानि भौगोलिककारणानि स्युः तान्येव सरस्वत्याः लोपेऽपि हेतुत्वेन स्युरिति सम्भाव्यते। अथ च सिन्धुसंस्कृतेः विनाशः सरस्वतीलोपश्च समसामयिकावित्यपि सम्भावना स्यात्। इत्थं हि सरस्वतीसरिद्विषयकाणि बहुविधानि तथ्यानि वेदेषु पुराणेषु रामायणमहाभातप्रभृतिग्रन्थेषु समुपलभ्यन्ते येषामनुशीलनेन अनुसन्धानेन च सिन्धुसरस्वतीसंस्कृतिविषयकाणि नूत्नानि रहस्यानि निरावृतानि भविष्यन्तीति दिक्।

*

**सन्दर्भाः–**


1. ऋग्वेदे 2.41.16
2. तत्रैव 6.61.2
3. तत्रैव 6.61.8
4. तत्रैव 6.61.10
5. शुक्लयजुर्वेदे 34.11
6. तत्रैव 34.11 मन्त्रे महीधरभाष्यम्
7. स्कन्दपुराणे (प्रभासखण्डे) 33.13
8. तत्रैव 33.26,27,28
9. तत्रैव 33.54
10. तत्रैव 35.75
11. तत्रैव 34.31,32
12. तत्रैव 35.46,47
13. वाल्मीकिरामायणे (अयोध्याकाण्डे)-71.5
14. स्कन्दपुराणे (प्रभासखण्डे) 35.51
15. तत्रैव 35.109
16. तत्रैव 36.30
17. ऋग्वेदे 7.95.2
18. महाभारते (वनपर्वणि) 84.4,5,6,7
19. स्कन्दपुराणे (प्रभासखण्डे) 35.21.22
20. तत्रैव 33.40-41
21. महाभारते (भीष्मपर्वणि) 6.50
22. तत्रैव 6.47-48
23. तत्रैव 38.4
24. तत्रैव (वनपर्वणि) 82.111
25. तत्रैव 130.3-4
26. तत्रैव 130.5
27. वामनपुराणे 32.1,2
28. तत्रैव 33.1-2
29. तत्रैव 32.24


*

## किञ्चिद् रामायणीयम्

सुग्रीवस्याज्ञया प्रथमवारं भिक्षुरूपेण रामलक्ष्मणौ उपागम्य वानरोत्तमः हनुमान् जिज्ञासते– **कौ युवाम् ?**

- राजर्षिदेवप्रतिमौ • तापसौ संशितव्रतौ
- वरवर्णिनौ • मृगगणान् अन्यांश्च वनचारिणः त्रासयन्तौ
- पम्पातीररुहान् वृक्षान् वीक्षमाणौ
- शुभजलाम् इमां नदीं शोभयन्तौ तरस्विनौ
- धैर्यवन्तौ • सुवर्णाभौ • चीरवाससौ
- निःश्वसन्तौ वरभुजौ • इमाः प्रजाः पीडयन्तौ
- सिंहविप्रेक्षितौ वीरौ • महाबलपराक्रमौ
- शक्रचापनिभे चापे गृहीत्वा शत्रुनाशनौ
- श्रीमन्तौ • रूपसम्पन्नौ • वृषभश्रेष्ठविक्रमौ
- हस्तिहस्तोपमभुजौ • द्युतिमन्तौ नरर्षभौ • राज्यार्हौ
- अमरप्रख्यौ • पद्मपत्रेक्षणौ • जटामण्डलधारिणौ
- अन्योन्यसदृशौ • इह देवलोकात् आगतौ
- यदृच्छया वसुन्धरां सम्प्राप्तौ चन्द्रसूर्यौ
- विशालवक्षसौ • देवरूपिणौ मानुषौ
- सिंहस्कन्धौ • महोत्साहौ • गोवृषौ इव समदौ

सुग्रीवसचिवस्य हनुमतः रामलक्ष्मणाभ्यां सह प्रथममेलनावसरे **हनुमतो वैशिष्ट्यं** रामस्य मुखेन (लक्ष्मणं प्रति) — हनुमान् कपीन्द्रस्य सुग्रीवस्य सचिवः

- वाक्यज्ञः • वाक्यकुशलः मधुरैः वाक्यैः स्नेहयुक्तः
- न अनृग्वेदविनीतः • न अयजुर्वेदधारी
- न असामवेदविद्वान् • नूनम् (एतेन) कृत्स्नं व्याकरणं बहुधा श्रुतम्
- बहु व्याहरता अनेन न किंचिद् अपशब्दितम्
- मुखे नेत्रयोः ललाटे भ्रुवोश्च न क्वचित् दोषः संविदितः।
- एतस्य वाक्यम् अविस्तरम् असन्दिग्धम् अविलम्बितम् अद्रुतम् उरःस्थं कण्ठगं मध्यमस्वरं वर्तते।
- एतस्य वाक् संस्कारक्रसम्पन्ना अद्रुता अविलम्बिता कल्याणी हृदयहारिणी चित्रा त्रिस्थानव्यञ्जनस्था।

**आधारः - रामायणम्, किष्किन्धाकाण्डम् 3 सर्गः**

# विज्ञानमेवात्मेति मतप्रतिपादनं न्यायमतेन तत्खण्डनविचारः

**डॉ. बी. उमामहेश्वरी**

**प्रस्तावना**

'**क्षणिकविज्ञानमेव आत्मा**'[1] इति बौद्धानां मतम्। वस्तुतः बौद्धाः सौत्रान्तिक-वैभाषिक-योगाचार-माध्यमिकेति भेदात् चतुर्विधाः। विज्ञानव्यतिरिक्तं किञ्चिद्वस्तु अस्ति तदपि प्रत्यक्षसिद्धमेवास्ति अन्यत्रमाणिकं वस्तु नास्ति इति सौत्रान्तिकाः। वैभाषिकास्तु प्रत्यक्षं व्यतिरिच्य अनुमानेनापि वस्तुनः तत्त्वमङ्गीकुर्वन्ति। ज्ञानभिन्नं वस्तु नास्त्येव, तदपि ज्ञानं क्षणिकं तस्मात्ते क्षणिकविज्ञानवादिनः योगाचाराः। सर्वं शून्यमेवेति सर्वशून्य-वादिनः माध्यमिकाः। तत्र योगाचारमतस्य प्रतिपादनं खण्डनञ्च न्यायदर्शनानुसारं विचार्यते।

ननु विज्ञानमेव आत्मा, तस्य स्वतःप्रकाशकत्वात्,[2] इति योगाचाराः कथयन्ति। ज्ञानत्वस्य प्रमेयत्वव्यापकतया सर्वस्यापि विज्ञानत्वम्। वस्तुतः एतेषां मते सर्वमेव वस्तु विज्ञानस्वरूपं भवति। आत्माऽनात्मेति सर्वमपि वस्तु विज्ञानमेव। आत्मनः निरूपकत्वादत्र आत्मनः विज्ञानस्वरूपमिति। वस्तुमात्रस्यैव तन्मते विज्ञानरूपत्वात्। यद्यत्प्रमेयं तत्तद्विज्ञानम्, इत्युक्तौ यत्र यत्र प्रमेयं तत्र तत्र विज्ञानमिति प्रमेयत्वस्य व्यापकत्वं विज्ञानस्य अथवा सत्त्वस्य। एवं सति विप्रतिपत्तिः, विज्ञानत्वं सत्त्वस्य व्यापकमिति विधिकोटिः बौद्धानां, निषेधकोटिः नैयायिकानाम्। यत्र यत्र प्रमेयत्वं सर्वेषु पदार्थेषु प्रमेयत्वमिति सर्वेषु पदार्थेषु विज्ञानत्वमेवास्त्यतः अन्याभावं गृहीत्वा तादृशाभावाऽप्रतियोगित्वमेव विज्ञानत्वेऽस्तीति विज्ञानस्य व्यापकत्वम्। तच्च विज्ञानं क्षणिकम्। क्षणिकत्वं नाम द्वितीयक्षणवृत्तिध्वंस-प्रतियोगित्वम् इति बौद्धमते।

तद्विज्ञानं द्विविधम्–प्रवृत्तिविज्ञानम्, आलयविज्ञानमिति भेदात्। तत्र प्रवृत्तिविज्ञानं नाम अहमिति ज्ञानाद्भिन्नम् अयं घटः पट इति सविषयकं विज्ञानम्, आलयविज्ञानं नाम अहमहमिति ज्ञानं निर्विषयकं विज्ञानम्। (आङ् मर्यादायामिति उपसर्गात् लीङ्

श्लेषणे धातोः मरणपर्यन्तं यदहमहमिति प्रतीतिः तदेव)। यदालयविज्ञानं तदेवात्मा। तस्य आलयविज्ञानस्य भावत्वादेव क्षणिकत्वम्। तत्र नैयायिकानां प्रश्नः, आत्मनः क्षणिकविज्ञानरूपत्वे सुखादिसमवायि-कारणत्वानुपपत्तिः स्यात्, यतो हि ज्ञानोत्पत्तिक्षणे सुखाद्युत्पत्तौ विज्ञानस्य पूर्ववृत्तित्वाऽभावेन कारणत्वाभावात्, विज्ञानोत्पत्तिद्वितीयक्षणे च सुखाद्युत्पत्तिस्वीकारे सुखाद्युत्पत्तिकाले विज्ञानस्यैव नाशादिति। तत्र बौद्धानां समाधानम्– ज्ञानसुखादिकं तु तस्यैव विज्ञानस्यैव आकारविशेषः अर्थात् यथा सुखादयः नैयायिकमते आत्मनः विशेषगुणाः भवन्ति तथैव अत्र क्षणिकविज्ञानस्यैव आकारविशेषाः। 'अहं सुखीत्या'द्यनेकाकारं विज्ञानमेव भासते। अत्र आकारविशेषत्वं नाम तदभिन्नत्वे सत्यपि तद्भिन्नत्वेन भासमानत्वं तथा च ज्ञानसुखादीनां आत्मनः अभिन्नत्वेन तेषां कार्यकारणभावप्रसक्तिरपि नास्तीत्यतः न कार्यकारणभावदोषोऽपीति। तत्र पुनः नैयायिकानां प्रश्नः – ज्ञानसुखादीनाम् आत्माऽभिन्नत्वे अहं सुखीत्यादिसर्वानुभवसिद्धसुखाद्यधिकरण-त्वावगाहिप्रत्ययः न स्यात्, अभेदे आधाराधेयभावस्य असम्भवात् इति। तत्र समाधानं बौद्धानाम् – आधाराधेययोरैक्येऽपि आधारतावच्छेदकाऽधेयतावच्छेदकयोर्भेदस्य आधाराधेयभावनियामकत्वात्, तादात्म्यस्य च तादात्म्येन अधिकरणत्वाऽनियामकत्वेऽपि स्वरूपत्वेन अधिकरणत्वनियामकत्वात् आधाराधेयभावः सम्भवतीति।

एवं सति ज्ञानादीनाम् आत्मनः आकारविशेषत्वेन बौद्धमते आत्मनो विकारत्वप्राप्त्या अनित्यत्वं स्वीकृतम्।

तर्हि तत्र शङ्क्यते नैयायिकैः–एवं सति 'सुषुप्तौ आत्मा न सिद्ध्येत' अर्थात् जाग्रदवस्थायां स्वप्नावस्थायां न विज्ञानानि भवन्ति, सुषुप्त्यवस्थायां विज्ञानानि भवन्ति वा? सुषुप्त्यवस्थायां तु ज्ञानमेव न भवति किल? विज्ञानमेवात्मेति चेत् सुषुप्तौ विज्ञानाभावात् तादृशविज्ञानोत्पादकसामग्र्याः अभावात् (क्षणिकविज्ञानस्याङ्गीकृतत्वात्) विज्ञानोत्पत्त्यभावः, तदात्मनः अभावः स्यात् इति। एतत्तु न सम्भवतीति।

**समाधानम्–** पूर्वपूर्वोत्पन्नविज्ञानानामुत्तरोत्तरोत्पन्नविज्ञानेषु सङ्क्रान्तत्वात्, पूर्वपूर्वोत्पन्न-विज्ञानस्य उत्तरोत्तरविज्ञानं प्रति हेतुत्वात् सुषुप्तावपि आलयविज्ञानधारा निराबाधा[3] वर्तते इति। अर्थात् बौद्धमते कार्यकारणयोरेकाधिकरणत्वस्य अनियमात् कारणत्वं केवलं **कार्यपूर्व-वृत्तिमात्रमिति सिद्धान्तात्** पूर्वपूर्वविज्ञानस्य अव्यवहितोत्तरोत्तरविज्ञानं प्रति कारणत्वात्, प्रवृत्तिविज्ञानस्य आलयविज्ञानं प्रति हेतुत्वस्वीकारात् स्वप्नावस्थायाः अन्तिमक्षणे एवं गाढसुषुप्त्यवस्थायाः प्रारम्भे प्रवृत्तिविज्ञानम् आलयविज्ञानं प्रति कारणत्वात् गाढसुषुप्तौ अहमिति आलयविज्ञानधारा निराबाधा सञ्चरत्येवेति। एवञ्च प्रवृत्तिविज्ञाने घटस्य पटस्य

वा नीलादीनां प्रत्यक्षे तत्तद्विषयसमर्थानाम् इन्द्रियाणां तत्तत्सन्निकर्षाणां च सामग्री अपेक्षिता भवति, किन्तु अहमिति ज्ञाने वस्तूनाम् इन्द्रियाणां च आत्मना सह सम्बन्ध एव नास्ति, अतः सुषुप्तौ तादृशसामग्र्याः अनपेक्षितत्वात्, आलयविज्ञानधारायाः तत्र सुषुप्तावपि सत्त्वात् विज्ञानस्य सत्त्वादात्मनः सत्त्वात् आत्मनोऽभावः इति आरोपः कर्तुं न शक्यते इति।

पुनः शङ्क्यते नैयायिकैः–ननु विज्ञानस्य क्षणिकत्वेन अर्थादात्मनः क्षणिकत्वेन घटविज्ञानं यज्जातं तत्तु नष्टमपि, तर्हि येन विज्ञानेन घटः अनुभूतः तस्य भिन्नत्वात् यदुत्पद्यमानं विज्ञानं तस्य नूतनत्वात् कथं पूर्वानुभूतस्य स्मृतिः स्यात्? इति चेत्, उच्यते– यथा '**मृगमदवासनावासितवसन इव**'[4] अर्थात् मृगस्य मदः कस्तूरी, तस्य वासना सुगन्धः, तेन वासितं सुगन्धितं वसनं पटः, येन पटेन सह योगः प्राप्तः तस्मिन्नपि सुगन्धः संचरति, एवं तत्पटात् संयुक्ते पटान्तरे, पटान्तराच्च संयुक्तान्यपटे सञ्चरति, तद्वत् पूर्वपूर्वविज्ञानजनिताः संस्काराः उत्तरोत्तरे विज्ञाने सङ्क्रमिता भवन्ति सम्प्रति यस्मिन् विज्ञाने अनुभवः जातः तस्मिन्नेव विज्ञाने संस्कारोऽपि जायते। तादृशसंस्कारविशिष्टसंस्कारेण उत्पद्यमाने विज्ञाने संस्कारोऽपि आगच्छति। यथा श्वेततन्तुभिः जायमाने पटे श्वेतरूपगुणः अगच्छति तथा अङ्गीक्रियते। संस्कारात्मकगुणः यथा नैयायिकैरङ्गीकृतः आत्मनि तथैव अस्माभिरपि क्षणिकविज्ञाने स्वीक्रियते इति चेत्, नैयायिकाः खण्डयन्ति, विज्ञानं सविषयकं निर्विषयकं वा? ज्ञानं चेत् सविषयकमेव। सविषयकत्वे तज्ज्ञानं जगद्विषकं वा यत्किञ्चिद्विषयकम्? इति। तत्रोक्तं जगद्विषयकत्वे विनिगमकं न स्यात्, विज्ञानव्यतिरिक्त-विषयाभाादिति एको दोषः, एवमेव ज्ञानं सविषयकत्वे सुषुप्तावपि ज्ञाने विषयाऽवभासः आपद्येत, वस्तुतः तत्र सुषुप्तौ विषयः नास्तीत्यतः सविषयत्वं कथम्? सविषयत्वाभावे ज्ञानत्वं कथम्? ज्ञानत्वाभावे ज्ञानं कथम्? ज्ञानं नास्तीति चेत् आत्मा नास्तीत्येव तर्हि सुषुप्तौ आत्मा नास्तीति दोषः तदवस्थ एवेति।

**समाधीयते बौद्धैः –** तदानीं निराकाराचित्सन्ततिः अनुवर्तते[5] इति। सुषुप्तिकाले निर्विषयिणी क्षणिकधारा अनुवर्तते अतः न विषयावभासप्रसङ्गः इति। पुनस्तन्मतं दूषयति नैयायिकः, ज्ञानं चेत्सविषकमेव भवेत्, निर्विषयकं चेत् तस्य स्वप्रकाशाभावात् ज्ञानत्वमेव न स्यात्, यतः ज्ञानं सर्वमपि सविषयकम्, निर्विषयकचित्सन्ततेः विज्ञानत्वे प्रमाणाभावात्। अन्यथा घटादीनामपि ज्ञानत्वापत्तिः निर्विषयाणामपि ज्ञानत्वापत्तिः स्यादिति। यत्र विषयता-निरूपकत्वं नास्ति तत्र ज्ञानत्वं नास्ति, विषयाकतानिरूपकत्वं ज्ञाने इच्छायां कृतौ अतः तत्रैव सविषयकज्ञानत्वं, घटादौ सविषयकज्ञानत्वं नास्ति अतः तत्र ज्ञानत्वमपि नास्ति इति।

ननु बौद्धमते सर्वमपि प्रमेयं विज्ञानम्, तथा च घटादीनामपि ज्ञानत्वापत्तिः, इष्टैवेति चेत्, पुनः वारयन्ति नैयायिकाः–विज्ञानभिन्नत्वेन अनुभूयमानस्य घटपटादिविषयाजास्य ज्ञानस्य बाधितुम् अशक्यत्वात् इति। पुनर्बौद्धाः स्वमतं दर्शयन्ति– '**अहिकुण्डलमि**'त्यत्र कुण्डलं सर्पात् भिन्नः न, अपि तु आकारविशेषः, (तदभिन्नत्वे सति तद्भिन्नत्वेन भासमानत्वं तदाकारत्वम्) एवमेव ज्ञानस्यैवाकारविशेषः स्वरूपविशेषः घटः तद्भिन्नः न इति, यथा पटः तन्तूनां स्वरूपविशेषो न तु तन्तुसत्ता अतिरिक्तसत्ता, तस्मात् न अपलापो न वा विज्ञानव्यतिरिक्तत्वमिति। तर्हि अयं घटाद्याकारः विज्ञानादतिरिक्तो न वा? यद्यतिरिक्तः तर्हि विज्ञानादतिरिक्ताकारस्वीकारे 'विज्ञानव्यतिरिक्तो घटः' इति यन्न्यायमतं तत्रभवतां मतमपि समायातं स्यात्, एवं 'सर्वं विज्ञान'मिति बौद्धमतस्य हानिश्च।

यदि विज्ञानादनतिरिक्तं तर्हि समूहालम्बने नीलपीते घटपटौ इति समूहालम्बनज्ञाने जाते तत्र घटपटयोः ऐक्यं स्यात्। नीलः पीतः स्यात् पीतश्च नीलः स्यात्, यतो हि ज्ञानव्यतिरिक्ताकारस्य स्वरूपस्य अविशेषात् अभिन्नत्वात्, नीलस्य ग्रहणे नीलाभिन्नं ज्ञानं भवति, तदभिन्नं पीतः, तदभिन्नाभिन्नस्य तत्स्वरूपत्वात् नीलाभिन्नज्ञानाभेदपीतस्य नीलरूपत्वं, पीताभिन्न–ज्ञानाभिन्ननीलस्य पीतरूपत्वं च स्यात्, एवमेव घटाभिन्नज्ञानाभिन्नघटस्य पटत्वं पटाभिन्नज्ञानाभिन्नघटस्य पटत्वमित्येवं रूपेण अव्यवस्था भवेत्।

अस्तु विज्ञानस्यैव आकारविशेषः नीलः, एवं विज्ञानस्यैव आकारविशेषः पीतः इति। नीले नीलत्वरूपापोहधर्मः वर्तते, एवमेव पीते पीतत्वरूपापोहधर्मः अङ्गीक्रियते। अपोहो नाम अतद्व्यावृत्तिः[6] नीले अनीलव्यावृत्तिरूपापोहः अनीलमित्युक्ते पीतः, तद्व्यावृत्तिः तद्भेदः, अनीलपीतभेदः पीते न भवति, अपि तु नीले एव भवति अतः अनीलव्यावृत्तिरूपः अपोहात्मकः कश्चन धर्मः तस्यैव नीलत्वमिति स च नीले अङ्गीक्रियते, एवं अपीतव्यावृत्तिरूपः अपोहात्मकः कश्चन धर्मः पीतत्वात्मकः स च पीते अङ्गीकृत्य नील–पीतयोः भेदः सम्भवति विज्ञानस्वरूपत्वेऽपि इति बौद्धानां समाधानम्।

तत्र नैयायिकाः– तर्हि विरुद्धधर्मयोः असमानाधिकरणधर्मयोः नीलत्वपीतत्वयोः विज्ञानात्मके धर्मिणि कथम् एकत्र समावेशः? इति।

बौद्धाः संवदन्ति– समूहालम्बनज्ञाने नीलत्वं पीतत्वमिति भिन्नतया ग्रहणं न भवति अपि तु चित्रत्वं, चित्त्वं वा स्वीक्रियते, तर्हि न पूर्वोक्तदोषः इति।

एवं सति विरुद्धानामपि सामानाधिकरण्यस्वीकारे नीलत्वपीतत्वे विरुद्धे इत्याकारकस्य यथार्थानुभवस्य प्रमात्वेन उपपादयितुं न शक्येत। एवं पूर्वपूर्वविज्ञानजनितसंस्काराणाम् उत्तरोत्तरविज्ञाने वासनासङ्क्रमोऽपि भवितुं नार्हति। एवं सति पूर्वालयविज्ञानस्य उत्तरालयविज्ञानं

प्रति हेतुत्वात् पूर्वालयविज्ञाननिष्ठसंस्कारः उत्तरालयविज्ञाने यथा सङ्क्रमते तथा मातापुत्रयोरपि वासनासङ्क्रमापत्तिः[7]; पुत्रस्य मात्रानुभूतस्मरणापत्तिः स्यात्। किन्त्वेतन्न सम्भवति वासनायाः भावनात्मकसंस्कारात्मिकायाः गुणत्वाद् गुणे च गुणानङ्गीकारात् उत्तरत्र गमनात्मकसङ्क्रम-क्रियायाः असम्भवात् इति।

पुनस्तत्र बौद्धैः समाधीयते–सङ्क्रमः न क्रिया किन्तु उत्तरस्मिन्नुत्पत्तिरेव इति।

नैयायिकैः तत्खण्ड्यते–तदुत्पादकाभावादिति अर्थात् वासनोत्पादकाभावात् संस्कारस्य संस्काराऽहेतुत्वात्, अनुभवस्यैव संस्कारोत्पादकत्वात् उत्तरविज्ञानेषु च अनुभवाभावात् उत्तरस्मिन्नुत्पत्तिः खपुष्पायत इति।

पुनर्बौद्धाः वदन्ति–संस्कारं प्रति ज्ञानत्वेनैव हेतुत्वात् चितामेव ज्ञानानामेव उत्पादकत्वं सम्भवतीति चेत्।

तत्खण्डयन्ति नैयायिकाः–चितामेवोत्पादकत्वे अर्थात् ज्ञानानामेवोत्पादकत्वे ज्ञानानां प्रतिक्षणभिन्नानाम् आनन्त्यात् तज्जन्यसंस्काराणामपि आनन्त्यापत्तिः इति। तत्र बौद्धैः समधीयते– यादृशज्ञानव्यक्त्युत्तरं स्मरणम् अनुभवसिद्धं तज्ज्ञाननिष्ठसंस्कारानुकूला काचित् शक्तिः अतिशयविशेषः पूर्वज्ञानव्यक्तौ स्वीकरणीया तथा च सति सा शक्तिरेव संस्कारोत्पादिका भवति, अतो न संस्काराऽऽनन्त्यमिति।

नैयायिकास्तन्मतं खण्डयन्ति–**कार्यानुकूलशक्तौ मानाभावात्**[8], प्रतिक्षणम् उत्पद्यमानानां ज्ञानव्यक्तीनां भेदेन तद्गतशक्तेरपि भिन्नतया ज्ञानभेदेन अनन्तशक्तिः तत्प्रागभावादिकल्पनागौरवाच्च क्षणिकविज्ञानस्य न कथञ्चिदपि आत्मत्वं सम्भवतीति।

*

**सन्दर्भाः–**

1. न्यायसिद्धान्तमुक्तावली, पृ.163
2. तत्रैव।
3. तत्रैव, पृ.164
4. तत्रैव।
5. तत्रैव।
6. दिनकरी, पृ.412
7. न्यायसिद्धान्तमुक्तावली, पृ.166, का.मु. दिनकरी, पृ.412
8. तत्रैव, पृ.167

*

## किञ्चिद् रामायणीयम्

**पम्पा कीदृशी आसीत् ?**

पद्मोत्पलझषाकुला (01), वैदूर्यविमलोदका, फुल्लपद्मोत्पलवती (03), विविधैः द्रुमैः शोभिता (03), चित्रकानना, बहुविधैः पुष्पैः व्यवकीर्णा, शीतोदका, शिवा (06), नलिनैः संछन्ना, अत्यर्थशुभदर्शना, सर्पव्यालानुचरिता, मृगद्विजसमाकुला (07), प्रसन्नसलिला, पद्मनीलोत्पलयुता, हंसकारण्डवाकीर्णा, सौगन्धिकान्विता (63), जले तरुणसूर्याभैः षट्पदाहतकेसरैः पङ्कजैः समन्ताद् अभिसंवृता (64), चक्रवाकयुता, चित्रप्रस्थवनान्तरा, सलिलार्थिभिः मातङ्गमृगयूथैः शोभते (65)

**पम्पायाः गिरिप्रस्थाः तत्रत्याः वृक्षा लताश्च**

**गिरिप्रस्थाः** सर्वतः संप्रपुष्पितैः रम्यैः निष्पत्रैः किंशुकैः प्रदीप्ताः इव (75)

**पम्पातीररुहाः** मधुगन्धिनः मालतीमल्लिकाकरवीराश्च पुष्पिताः (76)

**सुपुष्पिताः** केतक्यः, सिन्धुवाराः, वासन्त्यः, माधव्यः, गन्धपूर्णाः कुन्दगुल्माः, चिरिबिल्वाः, मधूकाः, वञ्जुलाः वकुलाः, चम्पकाः, तिलकाः, नागवृक्षाः, नीपाः, वरणाः, खर्जूराः, पद्मकाः, नीलाशोकाः, लोध्राः, सिंहकेसरपिञ्जराः, अङ्कोलाः, कुरण्टाः, चूर्णकाः, पारिभद्रकाः, चूताः, पाटलयः, कोविदारः, मुचुकुन्दार्जुनाः, केतकोद्दालकाः, शिरीषाः, शिंशपाः, धवाः, शाल्मल्यः, किंशुकाः, रक्ताः कुरबकाः, तिनिशाः, नक्तमालाः, चन्दनाः, स्यन्दनाः, हिन्तालाः, तिलकाः, नागवृक्षाः (77-83)

**आधारः - रामायणम्, किष्किन्धाकाण्डम्, 1 सर्गः**

**रावणेनावहृता सीता पतिं रामं प्रशंसन्ती -** ''अहं राममनुव्रता'

**रामः कीदृशः ?**

- महागिरिः इव अकम्प्यः
- महोदधिः इव अक्षोभ्यः
- न्यग्रोधपरिमण्डलः
- महाभागः महाबाहुः महोरस्कः
- सिंहसंकाशः नृसिंहः
- राजवत्सः
- पृथुकीर्तिः
- महेन्द्रसदृशः
- सर्वलक्षणसम्पन्नः
- सत्यसन्धः
- सिंहविक्रान्तगामी
- पूर्णचन्द्राननः
- जितेन्द्रियः

**आधारः - रामायणम्, अरण्यकाण्डम्, 47 सर्गः**

# तन्त्रशास्त्रदृष्ट्या कार्तवीर्योदयमहाकाव्यावेक्षणम्

**डॉ. तेजनाथपौडेलः**

संस्कृतसाहित्ये वाङ्मये च प्रायः सर्वे एव कवयः स्वस्याराध्यदेवं प्रणम्य स्वकाव्यारम्भे तेषां मङ्गलाचरणं कुर्वन्ति इतीयं परम्परा वैदिककालादेव प्रचलिता विद्यते। कार्तवीर्योदयमहाकाव्येऽपि महाकविसुकृतिदत्त इमां परम्परामनुपालयन् कार्तवीर्योदयमहाकाव्ये भगवत्याः तारिण्याः मङ्गलाचरणं कृतवान् वर्तते। महाकाव्यमेतत् वि.सं. १८८० तमे वर्षे नेपालदेशे लब्धजनुषा महाकविसुकृतिदत्तपन्तेन लिखितं सप्तदशसर्गात्मकं काव्यं वर्तते, अस्य नायकः पुराणप्रसिद्धः कार्तवीर्यः नायिका च कनकप्रभा। एतयोः नायक-नायिकयोः शृङ्गारवर्णनं प्रामुख्येन वर्तते अस्मिन् काव्ये, शान्तरसश्च प्रमुखो रसः। श्रीमद्भागवत–देवीभागवत–मत्स्य–वायु–हरिवंश–पद्म–स्कन्द–मार्कण्डेय–ब्रह्माण्ड–विष्णु–ब्रह्मवैवर्तादिषु अनेकेषु पुराणेषु वाल्मीकिरामायणे महाभारते च कार्तवीर्यस्योल्लेखः बहुत्र प्राप्यते। अतः पुराणादिप्रथितस्य कार्तवीर्यस्य पौराणिकदृष्ट्या महत्त्वं तु वर्तत एव। एतदतिरिक्तं तन्त्रशास्त्रे कार्तवीर्यः विशेषाराध्यदेवरूपेण समाराध्यते। तत्र कार्तवीर्योपासनापद्धतिः, कार्तवीर्यदीपदान-पद्धतिः इत्यादयः पद्धतय एव प्रचलिताः सन्ति। अतः तन्त्रशास्त्रे कार्तवीर्यः बहुत्र सविशेषं समाराधितः। महाकाव्यस्यास्य लेखकः सुकृतिदत्तोऽपि तन्त्रशास्त्रस्य समुपासकः आसीत्। तस्य ''तारिणीवरिवस्या'' ''मकरन्दस्तुतिः'' इत्यादयः तन्त्रशास्त्रस्य ग्रन्था अपि प्रकाशिताः वर्तन्ते। अतस्तन्त्रविद्यासम्बन्धित्वादनेन महाकविना पुराणादिषूपवर्णितः सकलनायकोचितगुणगणान्वितः, सद्वंशः, सुक्षत्रियः, कीर्तवीर्य एव काव्यनायकत्वेनावलम्बितः। महाकाव्येऽस्मिन् यथाप्रसङ्गं वेदव्याकरण–दर्शन–ज्योतिषादिशास्त्राणां सिद्धान्ताः सारगर्भितरूपेण प्रतिपादिताः विवेचिताश्च सन्ति। इतः परं प्रकृतमनुसृत्य प्रकृतमहाकाव्यं तन्त्रशास्त्रीयदृष्ट्यावेक्षणं क्रियते–

महाकविसुकृतिदत्तः कार्तवीर्योदयमहाकाव्यस्य मङ्गलपूर्वकपरिसमाप्तिकामनया विघ्नशमनाय च स्वकीयाया अभीष्टदेवतायाः भगवत्याः तारिण्याः (तारायाः) मङ्गलगानं करोति।

कटाक्षास्तारिण्याः मम विदधतां विघ्नशमनम्।[1]

तन्त्रशास्त्रीयसिद्धान्तानुसारं तारा हि धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयप्रदायिनी ब्रह्मोपेन्द्रमहेश्वरादिभिर्मन्त्रद्रष्टृभिः ऋषिभिः मानुषैश्च सदा साधिता देवतेति। महाकविसुकृतिदत्तेनापि महाकाव्यस्य मङ्गलाचरणे अयमेव विषयः उपस्थापितः।

**कृपापारावारोल्लसदमदकल्लोतसुभगाश्**
**चतुर्वर्गस्तोमार्पणपणकृतामोङ्कृतिकलाः ।**
**हरब्रह्मादीनां प्रतिदिनमलङ्काक्षिततराः**
**कटाक्षास्तारिण्याः मम विदधतां विघ्नशमनम्।।**[2]

श्रीतारायाः करुणापूरितं कृपाकटाक्षं विघ्नशमनाय संप्रार्थ्य नानाविधकाव्योचितगुणौघैरलङ्कृता कार्तवीर्योदयाख्येयं कृतिः श्रीताराया एव चरणकमलयोः समर्पिता।

**नागेन्द्रनेत्रनवभूमितविक्रमाब्दे वैशाखमासि सितपक्षतृतीयतिथ्याम्।**
**श्रीकार्तवीर्यचरितोदयकाव्यमेतत् श्रीतारिणीकरुणया परिपूर्णतासीत्।।**[3]

श्रीतारा श्रीतारिणी वा द्वितीयमहाविद्यात्वेन साधकैर्मनीषिभिः ब्रह्मादिदेवताभिः वशिष्ठादिमहर्षिभिः अनेकैस्सिद्धैश्च सूपासिता देवता इति प्रसिद्धम्। तत्कृपाकटाक्षलेशे सिद्धिस्तोममवाप्य इह लोके सुखं परत्र च कैवल्यं प्राप्तवन्तस्तत्साधनतत्पराः साधकाः इति तन्त्रशास्त्रवचनम्– **'उग्रापत्तारणाय स्वयं फलरूपा उग्रतारा माता नीलसरस्वती मेरोः पश्चिमे कूले चोलनाख्ये महति ह्रदि जज्ञे'** इति स्वतन्त्रवचनम्। इत्थंभूतैस्तन्त्रवचनैः श्रीतारायाः उग्रापत्तारकत्वं, वाक्प्रदत्वं, कैवल्यदायकत्वञ्च प्रकाश्यते। कुब्जिकातन्त्रादिष्वनेकेषु ग्रन्थेषु श्रीतारायाः एवंविधानि महात्म्यानि प्रतिपातानि सन्ति।

1. (क) **लीलया वाक्प्रदा चेयं तेन नीलसरस्वती।**
**तारकत्वीत्सदातारा सुखमोक्षप्रदायिनी।**
**उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्तिता।**[4]

(ख) **कलौ कृष्णत्वमासाद्य शुक्लापि नीलरूपिणी।**
**लीलया वाक्प्रदा चेति तेन नीलसरस्वती।।**
**तारकत्वात् सदा तारा तारिणी च प्रकीर्तिता।**[5]

(ग) **दासगेहे च योत्पन्ना सती नाम्नेति कीर्तिता।**
**कैवल्यदायिनी यस्मात् तस्मादेकजटा स्मृता।।**
**तारकत्वात् सदा तारा लीलया वाक्प्रदानतः।**
**नीलसरस्वती प्रोक्ता उग्रत्वादुग्रतारिणी।।**

( घ )	**वाचामीश्वरी भक्तकल्पलतिका सर्वार्थसिद्धीश्वरी।**
**गद्यप्राकृतपद्यजातरचनासर्वार्थसिद्धिप्रदा ।।**[6]

इत्थं विविधवैशिष्ट्यसंयुतास्ति भगवती तारा। तदुपासनेन साधकः कवितां विद्याञ्च यथेच्छं लब्ध्वा सर्वशास्त्रविद् भवेदिति तन्त्रशास्त्रवचनात् प्रकृतेऽपि महाकाव्ये कार्तवीर्योदयमहाकाव्यप्रणेता सुकृतिदत्तः स्वाभीष्टकृतौ प्रकृतमहाकाव्यस्य रचनायां सहस्रार्जुनचरितोद्गाने महत्साफल्यमवाप्तवान् एवञ्च तन्त्रग्रन्थकृतां गद्यपद्यमयी वाणी मुखरिता सर्वेषामाह्लादकरी सञ्जातेति नात्र सन्देहलेशः। उक्तञ्च ताराहस्ये -

**ब्रह्मा विष्णुरुमापतिस्त्रिभुवने सृष्टिं स्थितिं प्रालयं**
**ध्यात्वैवं जगदम्बिकां वितनुते मोक्षप्रदां तारिणीम्।**
**भक्त्या तद्गतमानसो यदि जनस्तारां भजेत् यत्नतः**
**स क्षेमङ्करमेतदेव लभते तत्त्वागतो यात्यधः।।**[7]

महाकविसुकृतिदत्तेनास्मिन् काव्ये यत्र तत्र भगवत्यास्तारायाः स्तुतिव्याजेन ब्रह्मविष्णुमहेश्वरवन्दितं तारायाश्चरणयुगलं मनोगतमन्धकारं नाशयतु इति याचमानः सन् तदीयो महिमा प्रकाशितो वर्तते। यथा कार्तवीर्योदये– 9.1/10.1/11.1/12.1/13.1/14.1/15.1/16.1/ एवं कविना जीवनस्यावसानेऽहं तारिणीपदं प्राप्स्यामीति दृढो विश्वासोऽप्यभिव्यक्तः–

**ज्येष्ठाभ्यां मयि तारिणीपदगते दायप्रदेयो ध्रुवम्।**[8]

एतेन पन्तमहोदयस्य तारिणीसमुपासकता प्रमाणिता भवति। पुनश्च यथाहं महता परिश्रमेण महाकाव्यमिदं रचितवान् तथैवायासेनास्य परशीलनकर्तरि जनेऽपि भगवत्याः तारायाः करुणादृष्टिपातः स्यादिति कामयते महाकविः–

**मयीव परिशीलनश्रमयुतेऽस्य मर्त्यान्तरे।**
**पतन्तु करुणादृशो भुवनतारिकाया द्रुतम्।।**[9]

महाकाव्ये इत्थं तन्त्रशास्त्रीयाः देव्याः तारण्याः स्तुतिवन्दनान्तरं तन्त्रशास्त्रीयदेवस्य कार्तवीर्यस्य चरितं महाकाव्येऽस्मिन् वर्णितं वर्तते। तन्त्रसम्प्रदाये कार्तवीर्योपासनापद्धतिः, कार्तवीर्यसपर्या, कार्तवीर्यदानविधिः, पञ्चरात्रपद्धतिः इत्यादयः तन्त्रपद्धतयः प्रचलिताः सन्ति। अतस्तन्त्रविद्यासम्बन्धितत्त्वानामादानेन महाकविनानेन पुराणादिषूपवर्णितः सद्वंशः सुक्षत्रियः कार्तवीर्य एव काव्यनायकत्वेनालम्बितः। तस्य शौर्यवीर्यपराक्रमवर्णने एव महाकविना

स्वकीयो धीवैभवः व्ययीकृतः। परन्तु सर्वमिदं विनिवेद्यापि महाकविः श्रीकार्तवीर्यसहस्रार्जुनस्य तन्त्रसाधनासाधकत्वविषये किमपि नैवोवाचेति चिन्तनीयो विषयः। तन्त्रशास्त्रेषु कार्तवीर्यार्जुनो नृपो भगवतः विष्णोः सुदर्शनचक्रांशभूत इति बहुत्र निर्देशो लभ्यते। यथा मेरुतन्त्रे–

**सुदर्शनयस्यांशभूतः श्रीकार्तवीर्यार्जुनो नृपः।**
**यः सुदर्शनचक्रस्यावतारः क्षितिमण्डले॥**
**सर्वेष्टसिद्धये ध्यायेत् कार्तवीर्यार्जुनेश्वरम्।**
**चौरमदविभञ्जानां मारीमदविभञ्जनः॥**
**अरिमदविभञ्जानो दैत्यमदविभञ्जनः।**
**दुःखनाशो दुष्टनाशो दुरितामयनाशकः॥**[10]

इत्यत्र कार्तवीर्यः सर्वेष्टसिद्धिः दुःखशोकादिदमकः दुरितादिनाशकः इति वर्णितः। प्रकृतमहाकाव्येऽपि सुकृतिदत्तेन कार्तवीर्यः चिन्तनमात्रेणैव सकलदुःखविभञ्जकरूपेण चित्तशुद्धिप्रदायकरूपेण च वर्णितोऽस्ति। यथा–

**यच्चिन्तनं हरति चेतसि जातमात्रं दुर्ध्यानमाशुवितनोत्यपि चित्तशुद्धिम्।**
**संशोधयन्निह गिरं निजकीर्तनम्मे स्वेच्छामयो हि स हरिः कृतवीर्यजन्मा॥**[11]

तन्त्रसाधकाः कार्तवीर्यस्य यन्त्रं विनिर्माय तन्त्रसाधनां कुर्वन्तीति मेरुतन्त्राख्ये ग्रन्थे वर्णितमस्ति। तदनुसारं कार्तवीर्यार्जुनयन्त्रं हि–

**स्तम्भे पार्थिवैः रौप्यैः शान्तौ वश्ये च तैजसैः।**
**उच्चाटने वायवीयैर्विद्वेषे चापि नाभसैः॥**
**मारणे तैजसैः क्षान्तौ वातैः पुष्टौ च पार्थिवैः।**[12]

इति वचनानुसारं कार्तवीर्यार्जुनयन्त्रं निर्माय साधकाः यथाकामनानुसारं कार्तवीर्यस्याराधनं कुर्वन्ति। तस्याः साधनायाः महात्म्यमपि तत्रैवोल्लतिखितमस्ति।

**साधकश्च सदैव स्यात् पुक्षवान् रोगवर्जितः।**
**यशस्वी दीर्घजीवी च सकलात्रानुरञ्जकः॥**
**वाक्सिद्धिश्चापि तेजस्वी प्रतापी विजितेन्द्रियः।**
**शत्रूपद्रवमापन्ने ग्रामे च पुटभेदने॥**
**संस्थापयेदिदं यन्त्रं वैरिभीतिनिवृत्तये॥**[13]

इत्यादितन्त्रशास्त्रीयवचनैः श्रीकार्तवीर्यार्जुनदेवो दुष्टप्रशमनाय, अरिविमर्दनाय, बलपराक्रमवर्धनाय चोपास्यते इति सिद्धम्। तदानुकूल्येन सुकृतिदत्तेनापि कार्तवीर्यस्य

भगवतोऽष्टासु दिक्षु क्षेमङ्करीप्रभृतिभिः शक्तिभिः सम्पन्ना वीरा विलसन्ति, बाह्यभागे च कार्तवीर्यं कामयमाना इन्द्रादयो देवा विराजन्ते इति वर्णितम्।

**अष्टासु दिक्षु जयशब्दमघोषयन्तः क्षेमङ्करीप्रमुखशक्तियुताश्च वीराः।**
**बाह्ये पुरन्दरमुखा विवुधास्सहस्राः श्रीराजराजशुभचिन्ततो व्यराजन्॥**[14]

कुलार्णवतन्त्रे कार्तवीर्यस्य स्वरूपं वर्णयन् रत्नसिंहासनस्थम् अनेकाभिरमरस्त्रीभिः परिवेष्टितं भुशुण्डी–पाश–खेटकादिभिरुपशोभितं सर्वैश्वर्यविधायकञ्च वर्णितमस्ति।

**माहिष्मत्यां मन्त्रिमध्ये समासीनमलङ्कृतम्।**
**नानासुरस्त्रीप्रवृतं सिंहासनगतं सदा बहुभिः॥**
**शरचापासिगदामुद्गरशूलकान्।**
**भुशुण्डीपाशखेटादीन् दधतं सुप्रसन्नकम्॥**
**परचक्रस्तेन राजभयं ध्यानमुदीरितम्।**
**त्रैलोक्ये भीषणं ध्यायेदयुताश्वरथस्थितम्॥**[15]

तत्प्रभावितेन सुकृतिदत्तेनापि हेमसिंहासनगतस्य कार्तवीर्यस्य हनुमदादिपरिवेष्टिता अतिमानान्विता स्थितिः निरूपिता।

**हेमाद्रिशृङ्गमिव तुङ्गतरं विचित्रं सिंहासनं समधिरोहति राजसिंहे।**
**वामे प्रभञ्जनसुतस्थितिमाप पार्श्वे दक्षे गुरुश्च पुरतः कनकप्रभास्तः॥**[16]

एवं तन्त्रशास्त्रे कार्तवीर्यार्जुनदेवस्य प्रसादाय दीपदानविधिः क्षेमङ्करः सद्यः फलदश्च भवतीति अनेकत्र वर्णितं प्राप्यते।

**नित्यमेव तु यो दद्यात्कार्तवीर्याय दीपकम्।**
**शत्रवस्तस्य नश्यन्ति नात्र कार्या विचारणा॥**
**व्याधयश्चाधयश्चैव विलीयन्तेऽचिरादपि।**
**जीवेद् वर्षशतं मन्त्री पापानि क्षयमाप्नुयुः॥**[17]

तत्रापि दीपानाम् ऋजुत्वेन वक्रत्वेन च साधकस्य शकुनापशकुने च विचार्येते। श्रीकार्तवीर्याराधना हि गुरोरनुज्ञया तन्त्रोक्तविधिना एव कर्तव्या अन्यथा नानेकफलदेति तन्त्रशास्त्रमर्यादा। इत्येवं प्रकारेण तन्त्रशास्त्रे कार्तवीर्योपासनामन्त्रतन्त्रयन्त्राणि परिवर्णितानि सन्ति। उड्डामरतन्त्रे कार्तवीर्यस्य स्मरणमात्रेण गतं नष्टञ्च लभ्यते इति वर्णितमस्ति।

**कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान्।**
**यस्य स्मरणमात्रेण गतं नष्टञ्च लभ्यते॥**[18]

अनेन सुकृतिदत्तकविवरोऽपि तदुपासक एवासीदिति निगदितुं शक्यते।

वर्णनैरेतैः निष्कर्षेणेदं वक्तुं शक्यते यत् प्रकृतमहाकाव्ये पण्डितवर्येण सुकतिदत्तपन्तेन तन्त्रशास्त्रीयदेवस्य कार्तवीर्यार्जुनस्य प्रोज्ज्वलं वीर्यप्रदञ्च चरितं वर्णितं तत्पराक्रमगाथा च गीता, तन्त्रशास्त्रीयाः सिद्धन्ताश्चोपस्थापिताः सन्ति। अतः प्रकृतमहाकाव्ये तन्त्रशास्त्रस्य भूरितरः प्रभावः वर्तत इति निश्चयेन वक्तुं शक्यते।

*

**सन्दर्भाः–**


1. कार्तवीर्योदये 1.1
2. तत्रैव 1.1
3. तत्रैव 17.35
4. ताराभक्तिसुधार्णवे 2.4
5. कुब्जिकातन्त्रे 1.8
6. उड्डामरतन्त्रे 2.8
7. ताराहस्ये 3.9
8. कार्तवीर्योदये 17.28
9. तत्रैव 17.37
10. मेरुतन्त्रे 5.59-61
11. कार्तवीर्योदये 1.4
12. मेरुतन्त्रे 6.9.11
13. मेरुतन्त्रे 6.9.11
14. कार्तवीर्योदये 16.64
15. कुलार्णवतन्त्रे 8.43
16. कार्तवीर्योदये 16.63
17. कार्तवीर्यदीपदानपद्धतिः 1.3-43
18. उड्डामरतन्त्रे 5.3


*

# ‘प्रथमानिर्दिष्टं समास उपसर्जनम्’ इति सूत्रार्थविमर्शः

**डॉ. जयदेवदिण्डा**

**उपोद्घातः**

कृत्तद्धितसमासैकशेषसनाद्यन्तरूपपञ्चवृत्तिषु समासोऽन्यतमः। समासत्वञ्च पाणिन्यादिसङ्केतसम्बन्धेन समासपदवत्त्वम्। अनेकपदस्यैकपदीभवनम् इति सम्पूर्वकस्य अस्यतेः समसनमिति व्युत्पत्तौ ‘भावे’ (पाणिनिसूत्रम्, 3.3.18) इत्यनेन भावे, समस्यतेऽनेकपदमिति व्युत्पत्तौ ‘अकर्तरि च कारके संज्ञायाम्’ (पाणिनिसूत्रम्, 3.3.19) इत्यनेन कर्मणि, समस्यतेऽस्मिन्निति व्युत्पत्तौ ‘हलश्च’ (पाणिनिसूत्रम्, 3.3.121) इत्यनेन अधिकरणे वा घञ्प्रत्यये समासशब्दो निष्पद्यते। शब्दानां साधुत्वासाधुत्वविवेचने अन्यतम उपायस्तावत् समासः। लघुनोपायेन समासप्रक्रियासाधनाय उपसर्जनसंज्ञाया माहात्म्यं पाणिनिशब्दशास्त्रेऽपरिमितम्। उपसर्जनसंज्ञाविधायकं सूत्रद्वयमष्टाध्याय्यां विद्यते–‘प्रथमानिर्दिष्टं समास उपसर्जनम्’, ‘एकविभक्ति चापूर्वनिपाते’ चेति। प्रबन्धेऽस्मिन् ‘प्रथमानिर्दिष्टं समास उपसर्जनम्’ इति सूत्रम् अल्पीयसा वचसा उपस्थाप्यते।

**1. सूत्रार्थः**

‘प्रथमानिर्दिष्टं समास उपसर्जनम्’ (पाणिनिसूत्रम्, 1.2.43) इति पदत्रयात्मकम् उपसर्जनसंज्ञाविधायकसूत्रम्। प्रथमानिर्दिष्टं समासे उपसर्जनमिति सूत्रगतपदच्छेदः। प्रथमया प्रथमाविभक्त्या निर्दिष्टं प्रथमानिर्दिष्टम् इति ‘कर्तृकरणे कृता बहुलम्’ (पाणिनिसूत्रम्, 2.1.32) इत्यनेन सूत्रेण तृतीयातत्पुरुषमासः। अत्र कर्तरि विद्यमानेन ‘प्रथमया’ इति तृतीयान्तपदेन ‘निर्दिष्टम्’ इति क्तप्रत्ययान्तेन कृदन्तेन समासः। समासे प्रथमनिर्दिष्टम् उपसर्जनं भवतीति सूत्रगतपदान्वयः। भट्टोजिदीक्षितेन सूत्रस्यास्य ‘‘**समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्याद्**’’[1] इत्यर्थः विहितः। तेन समासाधिकारे पठितेषु सूत्रेषु यत् किञ्चित् सूत्रं सूत्रांशो वा प्रथमाविभक्त्यन्तो दृश्यते तस्योपसर्जनसंज्ञा विधीयते। अत्र ‘समासे’ इति पदे यदि ‘सति सप्तमी’ स्वीक्रियते तर्हि अस्यार्थः स्यात् समासे सति प्रथमान्तस्य उपसर्जनसंज्ञा भवतीति। एतदर्थस्वीकारे असम्भवदोषोऽस्ति। समासे सति

'**सुपो धातुप्रातिपदिकयोः**' (पाणिनिसूत्रम्, 2.4.71) इत्यनेन प्रथमाया लुप्तत्वात् प्रथमान्तं पदमेव असम्भवम्। समासे कृते तत एव प्रथमोत्पद्यते, न तु तदवयवात्। उक्तञ्च कैयटेन– ''**समासे किं प्रथमानिर्दिष्टं भवितुमर्हति? यस्मात् समासे प्रथमा विधीयते। न च तथाभूतस्य सम्भवः। समासे हि कृते तत एव प्रथमोत्पद्यते, न तु तदवयवात्।**''[2] इति। समासे इत्यत्र 'समासे चिकीर्षिते' इत्यर्थस्वीकारे अन्तर्वर्तिविभक्त्याश्रये अलौकिकविग्रहवाक्ये विद्यमानस्य प्रथमानिर्दिष्टस्य उपसर्जन-संज्ञास्वीकारेऽपि दोष एव। कष्टश्रितः इत्यस्य अलौकिकविग्रहे कष्ट अम् श्रित सु इत्यादौ प्रथमानिर्दिष्टस्य श्रितशब्दस्य उपसर्जनसंज्ञायां, तस्य '**उपसर्जनं पूर्वम्**' (पाणिनिसूत्रम्, 2.2.30) इत्यनेन पूर्वनिपाते श्रितकृष्णः इत्यनिष्टापत्तिः। अस्मिन्नर्थे सूत्रे निर्दिष्टपदं व्यर्थं भवतीति अपरोऽपि दोषः। अत्र श्रित सु इति प्रथमान्तपदमेवास्ति तदर्थं सूत्रे निर्दिष्टपदम् अनावश्यकम्। तदेव उक्तं प्रदीपव्याख्याने कैयटेन– ''**अन्तर्वर्तिन्या च विभक्त्या प्रथमानिर्दिष्टत्वे आश्रीयमाणे कष्टश्रित इत्यत्र श्रितशब्दस्यैवोपसर्जनसंज्ञा स्यान्न कष्टशब्दस्य, निर्दिष्टग्रहणं चानर्थकं स्यात्। समासे प्रथमान्तमुपसर्जनमिति वक्तव्यं स्यात्।**''[3] इति भाष्यप्रदीपः। अत एव अयमर्थः सूत्रस्यास्य नोचित इति मत्वा भट्टोजिदीक्षितः समासे इत्यस्य समासशास्त्रे इत्यर्थं कृतवान्। समासशास्त्रे इत्यस्य समासघटितशास्त्रे इत्यर्थकरणे सूत्रस्यास्य प्रवृत्तिः 'समासेऽङ्गुलेः सङ्गः' (पाणिनिसूत्रम्, 8.3.80) इत्यादौ समासघटितशास्त्रे प्रथमान्तसङ्गपदस्य पूर्वनिपातापत्तिः स्यादिति नागेशभट्टः अस्यार्थं कृतवान् समाससंज्ञाविधायकशास्त्रे इति। निगदितञ्च लघुशब्देन्दुशेखरे– ''**ननु समासगतेऽन्तर्वर्ति-विभक्त्याश्रये प्रथमान्तत्वे आश्रीयमाणे कष्टश्रितादौ श्रितस्य पूर्वनिपातापत्तिः, निर्दिष्टपदञ्च व्यर्थमत आह समासशास्त्रे इति। समाससंज्ञाविधायके शास्त्रे इत्यर्थः।**''[4] इति। तथा च समासविधायकशास्त्रे यत् प्रथमान्तं पदं तेन निर्दिष्टं यत् समासस्थितपदं तस्य उपसर्जनसंज्ञा भवति। 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इति नियमात् कथं संज्ञाविधावत्र तदन्तविधिरिति चेदुच्यते यत्र प्रत्ययस्य संज्ञा तत्रैव निषेधः, प्रकृतेऽस्मिन् प्रत्ययस्य संज्ञाभावात् न निधेषः। अस्या उपसर्जनसंज्ञायाः फलं तावद् 'उपसर्जनं पूर्वम्' (पाणिनिसूत्रम्, 2.2.30) इति। तथाहि यस्य पदस्य उपसर्जनसंज्ञा भवति तस्य पूर्वं प्रयोगो भवति। अत एव वृत्तावुक्तं भट्टोजिदीक्षितेन– ''**समासे उपसर्जनं प्राक् प्रयोज्यम्।**''[5] इति।

नन्वत्र शङ्कोदेति कथं पुनः 'समासे' इत्युच्यमाने समासशास्त्रं ग्रहीतुं शक्यम्? अत्र समाधानत्रयम् आकरग्रन्थेषु परिलक्ष्यते। प्रथमं तावत् सूत्रेऽस्मिन् समासपदं समासविधायके

लाक्षणिकम्।[6] द्वितीयं तावत् 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वाच्यः' इत्येनेन सत्यभामाशब्दात् ठाजादिप्रत्ययाभावेऽपि पूर्वोत्तरपदयोः क्रमेण लोपे यथा सत्यभामा, भामा, सत्या इत्यादिरूपं भवति तथैव अत्रापि समासशास्त्रे इत्यत्र प्रत्ययाभावेऽपि शास्त्रपदस्य लोपे 'समासे' इति। तात्पर्यन्तु समासशास्त्रे एव। तृतीयन्तु भाष्यकृता प्रतिपादितम्। 'तादर्थ्यात्ता-च्छब्द्यम्' इति नियमाद्यथा प्रदीपार्था मल्लिका 'प्रदीपः' इति इन्द्रार्था स्थूणा 'इन्द्रः' इति तथैव समासार्थं शास्त्रं समासः इति। उक्तञ्च भाष्यकृता– ''**प्रथमानिर्दिष्टं समास उपसर्जनमिति चेदनिर्देशात् प्रथमायाः समासे संज्ञाप्रसिद्धिः। प्रथमानिर्दिष्टं समास उपसर्जनमिति चेदनिर्देशात् प्रथमायाः समासे उपसर्जनसंज्ञाया अप्रसिद्धिः। नहि कष्टादीनां समासे प्रथमां पश्यामः। सिद्धं तु समासविधाने वचनात्। सिद्धमेतत्। कथम्? समासविधाने प्रथमानिर्दिष्टमुपसर्जनसंज्ञं भवतीति वक्तव्यम्। तत्तर्हि वक्तव्यम्? न वा तादर्थ्यात्ताच्छब्द्यम्। न वा वक्तव्यम्। किं कारणम्? तादर्थ्यात्ताच्छब्द्यं भवति। समासार्थं शास्त्रं समास**''[7] इति। तस्मात् सूत्रेऽस्मिन् पठितं समासपदं तादर्थ्यात् समासार्थशास्त्रस्य बोधकं भवति।

## 2. उदाहरणम्

कृष्णं श्रितः इत्यत्र समासविधायकं सूत्रं तावत्– 'द्वितीया श्रितातीतपतितगतात्यस्त-प्राप्तापन्नैः' (पाणिनिसूत्रम्, 2.1.24) इति। समासविधायकशास्त्रेऽस्मिन् प्रथमान्तपदं तावत् द्वितीयेति तेन निर्दिष्टं पदं कृष्णं श्रितः इत्यत्र कृष्णम् इति। सूत्रेणानेन द्वितीयान्तस्य कृष्णपदस्य उपसर्जनसंज्ञायां, तस्य पूर्वनिपाते कृष्णश्रितः इति। 'तृतीया तत्कृतार्थेन गुणवचनेन' (पाणिनिसूत्रम्, 2.1.37) इत्यत्र तृतीयेति पदं प्रथमान्तम्। अतः धान्येनार्थो धान्यार्थः इत्यत्र तृतीयान्तधान्यशब्दस्य उपसर्जनसंज्ञकत्वेन पूर्वनिपातः। 'चतुर्थी तदर्थार्थबलिहितसुख-रक्षितैः' (पाणिनिसूत्रम्, 2.1.36) इत्यत्र चतुर्थीति पदस्य प्रथमान्तत्वेन यूपाय दारु युपदारु इत्यत्र यूपपदस्य उपसर्जनसंज्ञायां पूर्वनिपातः। 'पञ्चमी भयेन' (पाणिनिसूत्रम्, 2.1.37) इत्यत्र पञ्चमीति पदं प्रथमान्तम्, तेन वृकेभ्यो भयं वृकभयम् इत्यत्र पञ्चम्यन्त-वृकपदस्योपसर्जनसंज्ञा। 'षष्ठी' (पाणिनिसूत्रम्, 2.2.8) सूत्रे षष्ठीति पदं प्रथमान्तम्, एतेन राज्ञः पुरुषो राजपुरुषः इत्यत्र षष्ठ्यन्तराजपदस्य उपसर्जनसंज्ञेति तस्य पूर्वनिपातः। 'सप्तमी शौण्डैः' (पाणिनिसूत्रम्, 2.1.40) इत्यत्र सप्तमीति पदं प्रथमान्तम्। अतः अक्षेषु शौण्डः अक्षशौण्डः इत्यत्र सप्तम्यन्तस्य अक्षपदस्य उपसर्जनसंज्ञायां पूर्वनिपातः। एवञ्च 'अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्य-यौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु' (पाणिनिसूत्रम्, 2.1.9) इति अव्यय-

संज्ञाविधायकसूत्रे यत् प्रथमान्तपदम् 'अव्ययम्' इति तेन निर्दिष्टं हरि ङि अधि इत्यत्र 'अधि' इति, तस्य उपसर्जनसंज्ञायां पूर्वनिपाते अधिहरि इति भवति। एवञ्च उपसर्जनसंज्ञाबोधाय प्रथमान्तं पदं सूत्रेऽन्वेष्यं, तद्बोध्यं पदञ्च अलौकिकविग्रहवाक्ये द्रष्टव्यं, तस्यैव उपसर्जनसंज्ञा भवतीति।

**3. उपसर्जनसंज्ञाया अन्वर्थत्वविचारः**

ननु समासविधायकशास्त्रे प्रथमानिर्दिष्टस्य उपसर्जनसंज्ञास्वीकारे राज्ञः कुमारीं श्रितः इति राजकुमारीश्रितः इति वाक्यसंस्कारपक्षे, परिनिष्ठितविभक्त्या समासः इति पक्षे च राज्ञः इति षष्ठ्यन्तशब्दः 'षष्ठी' (पाणिनिसूत्रम्, 2.2.8) इति समासशास्त्रे प्रथमानिर्दिष्टः, कुमारीम् इति द्वितीयान्तशब्दश्च 'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' (पाणिनिसूत्रम्, 2.1.24) इति समासशास्त्रे प्रथमानिर्दिष्टः। तेन प्रथमानिर्दिष्टत्वात् उपसर्जनत्वेन उभयोरपि पर्यायेण पूर्वनिपातापत्तिः। इष्टश्च राजन्शब्दस्य पूर्वनिपातः, कुमारीशब्दस्य पूर्वनिपातापत्तिस्तु अनिष्टा।

अत्रोच्यते यद् उपसर्जनमिति महासंज्ञा। संज्ञा च नाम यतो न लघीयः। कुतः एतत्? लघ्वर्थं हि संज्ञाकरणम्। तत्र महासंज्ञाकरणे एतत्प्रयोजनम्– अन्वर्थसंज्ञा यथा विज्ञायेत। अन्वर्थत्वञ्चास्य उपसृजति उपश्लिष्यति विशेष्यमिति उपसर्जनमिति अप्रधानमुपसर्जनम् इति यावत्। समासविधायकशास्त्रे प्रथमान्तं यत् पदं तेन निर्दिष्टम् अप्रधानम् उपसर्जनं भवतीति सूत्रार्थः सम्पद्यते। प्रधानमप्रधानमिति च सम्बन्धिशब्दावेतौ। सम्बन्धिशब्दस्य नित्यसापेक्षत्वात् कस्यापेक्षया अप्रधानमिति विवक्षया यं प्रति यदप्रधानं तं प्रति तदुपसर्जनम् इति मन्तव्यम्। राज्ञः कुमारी श्रितः इत्यत्र कुमारीशब्दो हि श्रितं प्रत्यप्रधानं, न तु राजानं प्रतीति 'राज्ञः' इति पदं प्रति तस्य उपसर्जनत्वाभावान्न तस्य पूर्वनिपातापत्तिः। एवञ्च राज्ञः पुरुषस्य इत्यत्र द्वयोरपि 'षष्ठी' (पाणिनिसूत्रम्, 2.2.8) इत्यत्र प्रथमानिर्देशेऽपि पुरुषमपेक्ष्य राज्ञोऽप्रधानत्वात्, तद्वाचकस्य 'राज्ञः' इति षष्ठ्यन्तपदस्य उपसर्जनत्वं न तु राजानं प्रति पुरुषस्य। पुरुषार्थो राजापेक्षया प्रधानमेवात्र इति अप्रधानस्यैवात्र राज्ञः पूर्वनिपातः।

ननु समासविधायकशास्त्रे प्रथमानिर्दिष्टम् अप्रधानम् उपसर्जनम् इति अन्वर्थसंज्ञास्वीकारे पूर्वकायः इत्याद्यसिद्धिः। अत्र हि कायस्य पूर्वम् इत्यर्थे काय ङस् पूर्व सु इत्यलौकिकविग्रहे 'पूर्वपराधरोत्तरमेकदेशिनैकाधिकरणे' (पाणिनिसूत्रम्, 2.2.1) इत्यनेन समासः। सूत्रेऽस्मिन् 'पूर्वापराधरोत्तरम्' इत्यत्र पूर्वपदस्य प्रथमानिर्दिष्टत्वेऽपि कायनिरूपितप्राधान्याभावेन उपसर्जनसंज्ञाभावात् पूर्वनिपातानापत्तिः। नह्यत्र दोषः। नागेशानुसारम्– "**समासशास्त्रस्थ-**

**प्रथमानिर्दिष्टशब्दगताप्राधान्यस्याश्रयणेनादोषात्।''**[8] इति। तथाहि समाससंज्ञा-विधायकशास्त्रस्थितं यद् अप्रधानं प्रथमान्तं पदं तन्निर्दिष्टो यः अलौकिकविग्रहवाक्यस्थः शब्दः तस्य उपसर्जनसंज्ञा भवतीति सूत्रार्थकरणे अदोषः।

ननु 'सहयुक्तेऽप्रधाने' (पाणिनिसूत्रम्, 2.3.19) इति सूत्रेण सहयुक्तेऽप्रधाने एव तृतीया भवति। यस्य द्रव्यगुणक्रियाभिः सह शाब्दः सम्बन्धः तत्प्रधानं भवति। यस्य द्रव्यगुणाक्रियाभिः सह सम्बन्धः सहार्थकशब्दबलात् प्रतीयते तदप्रधानम्। द्रव्येण सह उदाहरणं यथा– शिष्येण गोमान् गुरुः। गुणेन यथा– पुत्रेण सह स्थूलः पिता। क्रियया यथा– पुत्रेण सह आगतः पिता। येन सह शब्दान्वयः तस्य प्राधान्यादेव तदनुसारेणैव द्रव्यगुणक्रियावाचकेषु शब्देषु लिङ्गवचनानि परिवर्तन्ते, न तु अप्राधान्यानुसारेण। तेन 'द्वितीया श्रितातीतपतित' इत्यादिसूत्रेषु द्वितीयादिपदानां सहार्थेनायुक्तत्वात् प्राधान्यात् प्रथमान्तत्वं, श्रितादिपदानां च सहार्थेन युक्तत्वाद् अप्राधान्यात् तृतीयान्तत्वम्। तेन समासशास्त्रे यत् प्रथमान्तं न तदप्रधानं, यदप्रधानं तत्र प्रथमान्तमिति समासशास्त्रस्थमप्रधानं प्रथमान्तं पदं न क्वापि लभ्यते इति नागेशाशयेन न कस्यापि उपसर्जनसंज्ञा।

अत्र समाधानं नागेशेन उच्यते– **''सहयुक्ततृतीयान्तार्थस्य शब्दगुणान्वय-त्वाभावरूपाप्राधान्येऽपि तत्समभिव्याहृतप्रथमाद्यन्तार्थे तदधीनत्व-रूपाप्राधान्यप्रतीतेः''**[9] इति। तृतीयान्तशब्दस्य सहार्थेन प्रत्यक्षसम्बन्धेन साहित्य-प्रतियोगितया प्राधान्यं भवति, प्रथमान्तशब्दस्य च अनु पश्चात्सम्बन्धेन साहित्यानुयोगितया अप्राधान्यं भवति। अत्र समासशास्त्रे यद् अधीनत्वरूपम् अप्रधानभूतं प्रथमान्तपदं, तेन निर्दिष्टं यत् पदं समासे, तस्यैव उपसर्जनसंज्ञा भवति। एवं हि कायस्य पूर्वम् इत्यत्र अर्थतः पूर्वशब्दस्य प्राधान्येऽपि 'पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे' (पाणिनिसूत्रम्, 2.2.1) इति समासशास्त्रे स्थितस्य 'एकदेशिना' इति तृतीयान्तपदापेक्षया 'पूर्वापराधरोत्तम्' इति प्रथमान्तपदस्य अधीनत्वरूपं यदप्रधानत्वं तस्य समस्तपदे तेन अप्रधानप्रथमान्तशब्देन निर्दिष्टपदेऽपि आश्रयणेन पूर्वशब्दस्य अप्रधानत्वं मत्वा उपसर्जनसंज्ञा भवत्येव। यथा– समानवयोगुणयुक्तयोः चैत्रमैत्रयोर्विषये राज्ञा 'चैत्रेण सह मैत्रः सभां गच्छेत्' इत्थमानिर्दिष्टं चेन्मैत्रस्य चैत्राधीनत्वात् मनसि क्षोभो जायते यदहमप्रधानीकृत इति। इत्थमत्रापि समासविधायकसूत्रेषु तृतीयान्तार्थाधीनत्वरूपम् अप्राधान्यं ग्राह्यम्। प्रकृतेऽपि 'द्वितीया श्रितातीत' इत्यादिसूत्रेषु 'द्वितीया' इति पदं श्रिताद्यधीनत्वादप्रधानं यतो हि श्रितादिकं विना द्वितीयान्तं पदं समासस्यावयवो न भवितुमर्हति, अथ च द्वितीयान्तं विनापि परमश्चासौ श्रितश्च इति 'परमश्रितः' इत्यादौ श्रितादिकं समासस्यावयवो भवितुमर्हति। एवं 'पूर्वापराधरोत्तरमेक-

देशिनैकाधिकरणे' (पाणिनिसूत्रम्, 2.2.1) इत्यत्र 'पूर्वम्' इति पदम् एकदेशिवाचककाय पदाधीनम् अस्ति। यतो हि पूर्वपदं विनापि 'कायावयवः' इत्यादौ एकदेशिवाचककायपद-घटकसमासः भवितुमर्हति। एवमेव पूर्वं कायस्य इत्यत्र 'पूर्वापराधरोत्तरम्' इति सूत्रेण समासो भवति। अत्र च पूर्वादिपदे प्रथमान्तत्वं, किञ्च एकदेशिपदाधीनत्वरूपम् अप्राधान्यं सुलभं भवति। तथा च प्रथमानिर्दिष्टस्य 'पूर्वम्' इति पदस्य उपसर्जनसंज्ञायां न कापि आपत्तिः।

'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति सूत्रस्य समासशास्त्रे यः अप्रधानभूतः प्रथमान्तशब्दः तेन निर्दिष्टं यत् पदं समासे, तस्यैव उपसर्जनसंज्ञा भवतीत्यर्थस्य समर्थने नागेशेन भाष्यप्रमाणमपि उपस्थापितम्। नागेशानुसारेण 'राज्ञः कुमारीं श्रितः' इति 'राजकुमारीश्रितः' इत्यत्र कुमारीशब्दस्य राजापेक्षया पूर्वप्रयोगापत्तिवारणाय प्रवृत्तस्य 'यस्य शब्दस्य समासविधौ यत्प्रथमानिर्दिष्टं तं प्रति तदुपसर्जनमिति वक्तव्यम्' इति वार्तिकस्य प्रत्याख्यानाय यद् भाष्ये 'यं प्रति यदप्रधानं तं प्रति तदुपसर्जनसंज्ञकम्' इत्युक्तं तस्य 'यं शब्दं प्रति यत्प्रथमानिर्दिष्टमप्रधानं, तं शब्दं प्रति तत्प्रथमानिर्दिष्टवाच्यं पदमुपसर्जनम्' इत्यर्थकरणमेवोचितमस्ति। अन्यथा सति हि वार्तिके राजापेक्षया कुमारीशब्दस्य पूर्वप्रयोगो न स्यात्, वार्तिकस्य प्रत्याख्याने कृते सूत्रस्य कुमारीशब्दस्य पूर्वप्रयोगापत्तिस्तथैव स्यात्। अतः फलभेदात् वार्तिकस्य कृतं प्रत्याख्यानम् असङ्गतं स्यात्, यतो हि फलैक्ये एव प्रत्याख्यानं सङ्गतं भवति। अतः सूत्रस्यापि तादृश एव अर्थः करणीयो येन प्रत्याख्यातस्य वार्तिकस्याभावेऽपि कश्चित् फलभेदो न स्यादिति।

उपसर्जनसंज्ञायाः शब्दगतसाहित्यानुयोगित्वरूपलौकिकस्य अप्रधानत्वस्य स्वीकारे बहुव्रीहिसमासे उपसर्जनसंज्ञा न भवति। 'अनेकमन्यपदार्थे' (पाणिनि 2.2.24) इति बहुव्रीहिसमासविधायकशास्त्रे तृतीयान्तं पदमेव नास्ति। तेन सूत्रस्थितेन 'अनेकम्' इति पदेन गृहीतेषु प्रथमान्तेषु कस्यापि अप्रधानत्वाभावेन तैः निर्दिष्टेषु कस्यापि उपसर्जनसंज्ञा न भवति। तेन चित्रगुः इत्यत्र बहुव्रीहिसमासे चित्रा गावो यस्य सः इत्यत्र उपसर्जनसंज्ञाभावात् 'गोस्त्रियोरुपसर्जनस्य' (पाणिनिसूत्रम् 1.3.48) इत्यनेन गोशब्दस्य ह्रस्वता न स्यात्। अत्रोच्यते बहुव्रीहिस्थले अन्वर्थत्वविरोधात् नानेन उपसर्जनसंज्ञा परन्तु 'एकविभक्ति चापूर्वनिपाते' (पाणिनिसूत्रम् 1.2.44) इत्यनेन उत्तरपदे उपसर्जनसंज्ञा भवति। तेन 'चित्रगुः' इत्यत्र गोशब्दस्य ह्रस्वविधानं सम्भवति। द्वन्द्वसमासेऽपि उपसर्जनसंज्ञा न प्रवर्तते। द्वन्द्वे उभयपदार्थप्रधानत्वात् अप्रधानमुपसर्जनम् इत्यभियुक्तोक्तेः उपसर्जनत्वमेव द्वन्द्वे नावगम्यते। उपसर्जनत्वे तु समेषां पदानां प्रथमानिर्दिष्टत्वाद् अव्यवस्थापत्तिः। कैयटमते

तु समासार्थेऽवयवार्थस्य अप्राधान्यादनेकमित्यस्य अनुवृत्त्या प्रथमानिर्दिष्टत्वाच्च कुक्कुटमयूर्यावित्यत्र मयूरीशब्दस्य उपसर्जनत्वम्। द्वन्द्वश्च प्रथमान्तानामेवेति सिद्धान्तानुसारं समासापेक्षया तत्र नियतविभक्तिकत्वम् अस्त्येवात 'एकविभक्ति चापूर्वनिपाते' (पाणिनिसूत्रम् 1.2.44) इत्युसर्जनत्वमिति रीत्या वा द्वन्द्वसमासेऽप्युसर्जनत्वात् प्राप्तह्रस्ववारणाय 'द्वन्द्वे च' इति वार्तिकवचनम्।

**4. हरदत्तमतखण्डनम्**

उपसर्जनसंज्ञाया अन्वर्थत्वस्वीकारे पूर्वकायः इत्यादौ उद्धृतदोषस्य निवारणाय सूत्रार्थः कृतः समासशास्त्रे यदप्रधानं तेन निर्दिष्टं यत्पदं समासे तस्य उपसर्जनसंज्ञा भवतीति। पूर्वकायः इत्यत्र कायापेक्षया पूर्वस्य अर्थगतप्राधान्येऽपि तत्र समाससूत्रस्थशब्दगतमप्राधान्य-माश्रित्य अप्रधानमुपसर्जनम् इत्यर्थानुकूलमुपसर्जनं नागेशेन स्वीकृतम्। परन्तु दोषस्यास्य निराकरणाय पदमञ्जर्यादिषु एवं दृश्यते यदन्वर्थत्वं तु सति सम्भवे व्यवस्थापकम् इति। अयमाशयः अन्वर्थसंज्ञा तत्रैव यत्र सः अर्थः सम्भवति, तत्र प्रवृत्तिनिमित्तमपेक्ष्य प्रवर्तते, यत्र तु सोऽर्थो न सम्भवति तत्र अन्वर्थसंज्ञापि प्रवृत्तिनिमित्तं निरपेक्ष्य प्रवर्तते। यथा– कर्मप्रवचनीयसंज्ञा अन्वर्थसंज्ञा। तेन कर्म क्रियां प्रोक्तवन्तः इति व्युत्पत्त्या यद्यपि क्रिया-वाचकस्यैव कर्मप्रवचनीयसंज्ञा भवति तथापि क्वचित् 'सुः पूजायाम्' (पाणिनिसूत्रम् 1.4.94) इत्यादिस्थलेषु स्वादीनां क्रियावाचकत्वाभावेऽपि कर्मप्रवचनीयविधानसामर्थ्यात् सुसिक्तमित्यादौ 'सु' इत्यस्य कर्मप्रवचनीयत्वं सुसिद्धं भवति। तेन कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाबाधात् 'उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्' (पाणिनिसूत्रम् 8.3.65) इत्यनेन षत्वं न भवति। एवं सति सम्भवे उपसर्जनसंज्ञायाः अन्वर्थत्वस्वीकारे पूर्वकायादिस्थलेषु अपि अर्थतः कायापेक्षया अप्राधान्यस्य अभावेऽपि पूर्वादिरुपसर्जनसंज्ञा भवत्येव पूर्वादिपदेषु प्रथमाविधानसामर्थ्यात् इति न दोषः। उक्तञ्च हरदत्तेन पदमञ्जर्याम्– **''अन्वर्थत्वं तु सति सम्भवे व्यवस्थापकम्''**[10] इति। तात्पर्यमिदं यत् लौकिकोपसर्जनत्व विशिष्टस्य शास्त्रीयमुपसर्जनत्वं स्वीकार्यम्, यत्र उभयं न सम्भवति तत्र केवलं शास्त्रीयमेव ग्राह्यमिति।

परन्तु नागेशेन मतमिदं निराकृतम्। निराकरणाय नागेशेनात्र चत्वारः हेतव उपन्यस्ताः। एतन्मते प्रथमानिर्देशसामर्थ्यात् पूर्वकायादिषु उपसर्जनसंज्ञा इति हेतुर्न संगतोऽस्ति। कारणं हि 'पूर्वापराधरोत्तरम्' इत्यादिस्थलेषु प्रथमान्तत्वेन निर्देशो व्यर्थो नास्ति। व्यर्थं सत् ज्ञापयति। प्रथमाविभक्तेरभावात् निर्विभक्तिकं स्यात्। निर्विभक्तिकोच्चारणानौचित्यात् प्रथमान्तनिर्देशस्तत्र आवश्यक एव। ननु निर्विभक्तिकस्य उच्चारणानौचित्यात् द्वितीया

विभक्तिरेव भवतु, कुतः प्रथमा विभक्तिश्चेत् द्वितीयान्ताद्यपेक्षया साधुत्वाय प्राथम्यात् प्रथमातिक्रमणे मानाभावात् प्रथमाया एव औचित्यम् इति द्वितीयहेतुः। किञ्च पूर्वादयः समस्यन्ते इत्यत्र प्रथमा एव अन्वेति इति अन्वितविभक्तिं परित्यज्य अनन्वितविभक्ति-परिकल्पनेऽपि मानाभावः इति तृतीयहेतुः दर्शितः। लघुत्वाच्चेति चतुर्थो हेतुरस्ति। प्रथमाविभक्तौ लघुत्वमपि अस्ति। तथाहि प्रातिपदिकार्थमात्रापेक्षया प्रथमाविभक्तिर्भवति, अन्यासां विभक्तीनां तु प्रातिपादिकार्थेन सह कर्मादीनाम् अतिरिक्तानाम् अपेक्षा विद्यते इति प्रथमोच्चारणे लाघवमपि दृश्यते। अतः प्रथमान्तपदोच्चारणं व्यर्थं नास्ति तर्हि तन्निर्देशस्य ज्ञापकत्वकथनं नोचितम्। इत्थं पूर्वादिपदेषु प्रथमाविभक्तिसामर्थ्यात् तेषामप्रधानत्वेऽपि उपसर्जनसंज्ञा भवति इति मतं निराकृतं नागेशेन।

**5. उपसंहृतिः**

पाणिनिना उपसर्जनसंज्ञाविधायकं सूत्रद्वयम् अष्टाध्याय्याम् उपनिबद्धम्। एकञ्च 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (पाणिनिसूत्रम् 1.2.43) अपरञ्च 'एकविभक्ति चापूर्वनिपाते' (पाणिनिसूत्रम् 1.2.44) इति। प्रबन्धेऽस्मिन् 'प्रथमानिर्दिष्टं समास उपसर्जनम् ' (पाणिनिसूत्रम् 1.2.43) इति सूत्रं प्रतिपादितम्। कौशाम्ब्या निष्क्रान्तः इत्यर्थे 'निरादयः क्रान्ताद्यर्थे पञ्चम्याः' इत्यनेन वार्तिकेन समासः। अत्र समासविधायकशास्त्रे 'निरादयः' इत्यस्य प्रथमानिर्दिष्टत्वात् उपसर्जनसंज्ञकत्वेऽपि कौशाम्बीशब्दस्य पञ्चमीनिर्दिष्टत्वेन प्रथमा-निर्दिष्टत्वाभावात् उपसर्जनत्वाप्राप्तौ, तस्य उपसर्जनसंज्ञाविधानाय 'एकविभक्ति चापूर्वनिपाते' (पाणिनिसूत्रम् 1.2.44) इति सूत्रारम्भः। एकैव विभक्तिर्यस्य तदेकविभक्ति नियतविभक्तिकं इति यावत्। एवञ्च विग्रहे यन्नियतविभक्तिकं तस्य पूर्वनिपातभिन्नकार्ये कर्तव्ये उपसर्जनसंज्ञा भवति। निष्क्रान्तः निष्क्रातं निष्क्रान्तेन निष्क्रान्ताय निष्क्रान्तात् निष्क्रान्तस्य निष्क्रान्ते इति विग्रहेषु समासे निष्कौशाम्बिः निष्कौशाम्बिं निष्कौशाम्बिना इत्यादयः स्थितयः। अत्र कौशाम्बीशब्द एव विग्रहे नियतविभक्तिकः इति तस्य उपसर्जनत्वमनेन विधीयते। तेन कौशाम्बीशब्दस्यानेन उपसर्जनत्वेऽपि न पूर्वनिपातः। अत्रेदमवधेयं यत् प्रथममुपसर्जनं लौकिकं शास्त्रीयम् इत्युभयरूपम्। द्वितीयं केवलं शास्त्रीयमिति शम्।

*

**सन्दर्भाः–**


1. 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति सूत्रवृत्तौ भट्टोजिदीक्षितः।
2. महाभाष्ये द्वितीयखण्डे 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति सूत्रे भाष्यप्रदीपः, पृ.38
3. तदेव।
4. लघुशब्देन्दुशेखरे 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति सूत्रे नागेशः, पृ.788
5. 'उपसर्जनं पूर्वम्' इति सूत्रवृत्तौ भट्टोजिदीक्षितः।
6. 'अत्र समासपदं तद्विधायके लाक्षणिकम्' इति सूत्रस्यास्य तत्त्वबोधिन्यां ज्ञानेन्द्रसरस्वती।
7. महाभाष्ये द्वितीयखण्डे'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति सूत्रभाष्यम्, पृ.38-39
8. लघुशब्देन्दुशेखरे 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति सूत्रे नागेशभट्टः, पृ.789
9. तत्रैव, पृ.79
10. 'पदमञ्जर्यां 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति सूत्रव्याख्यायां हरदत्तः, पृ.292


*

## किञ्चिद् रामायणीयम्

**यत् रावणः सीतां प्रधर्षयितुमिच्छति तत् कीदृशम् अशक्यं कर्म - तत् सीतामुखेन रावणं प्रति -**

- जम्बूकः दुर्लभां सिंहीम् इच्छति
- आदित्यस्य प्रभां स्प्रष्टुम् इच्छति
- बहून् काञ्चनान् पादपान् पश्यति
- मृगशत्रोः तरस्विनः क्षुधितस्य सिंहस्य आशीविषस्य वदनात् दंष्ट्राम् आदातुम् इच्छति
- पाणिना पर्वतश्रेष्ठं मन्दरं हर्तुम् इच्छति
- कालकूटविषं पीत्वा स्वस्तिमान् गन्तुम् इच्छति
- सूच्या अक्षि प्रमृजति
- जिह्वया क्षुरं लेढि
- शिलां कण्ठे अवसज्य समुद्रे तर्तुम् इच्छति
- पाणिभ्यां सूर्याचन्द्रमसौ उभौ हर्तुम् इच्छति
- प्रज्वलितम् अग्निं वस्त्रेण आहर्तुम् इच्छति
- अयोमुखानां शूलानाम् अग्रे चरितुम् इच्छति

**रामरावणयोः अन्तरं सीतायाः मुखेन -**

| **रामः** | | **रावणः** |
|---|---|---|
| सिंहः | (वने) | शृगालः |
| समुद्रः | | स्यन्दनिका |
| सुराग्यः | | सौवीरकः |
| काञ्चनम् | | सीसलोहम् |
| चन्दनवारि | | पङ्कः |
| हस्ती | (वने) | बिडालः |
| वैनतेयः | | वायसः |
| मयूरः | | मद्गुः |
| हंसकः | (वने) | गृध्रः |
| सहस्राक्षसमप्रभावः | | मक्षिकया अवकीर्णम् आज्यम् |

**आधारः - रामायणम्, अरण्यकाण्डम्, 47 सर्गः**

संग्राहकः - सम्पादकः

# शिवलीलार्णवमहाकाव्ये शैवागमसिद्धान्ताः

**डॉ. संजय कुमार चौबे**

महाकविनीलकण्ठदीक्षितः संस्कृतसाहित्यस्य रचनाकारेषु मूर्धन्यं स्थानं बिभर्ति। कविरसौ नैकानि काव्यानि व्यरचयत्। सप्तदशशताब्द्यां जनिं लब्धस्यैतस्य शिवलीलार्णव-महाकाव्यं नितरामेव प्रशस्यं काव्यगुणसम्पन्नं च विद्यते। ''**शास्त्रेषु दुर्ग्रहोऽप्यर्थः स्वदते कविसूक्तिषु।**''[1] इति वचनानुसारं शास्त्रगताः दुर्ग्रहा अपि विषयाः कविसूक्तिषु आस्वादनीयतामुपयान्ति। अस्मादेव सरलतया शास्त्रतत्त्वपरिज्ञानाय सम्यक्तया तन्मर्म च बोधयितुं कवयः स्वकाव्येषु तेषां प्रतिपादनं कुर्वन्ति। तस्मिन्नेव क्रमे महाकविनील-कण्ठदीक्षितेन शिवलीलार्णवमहाकाव्यस्य प्रणयनं शैवागमसिद्धान्तस्य प्रचाराय प्रसाराय च विहितम्। असौ महाकविः स्वमहाकाव्ये सर्वत्र शिवस्याराधनतत्परः शिवैकनिष्ठो दृश्यते। तस्य लेखनी शैवागमतत्त्वनिरूपणे श्लाघ्यतामुपयाति। सः नैजमहाकाव्ये शिवस्य लीलाः वर्णयन् नैकत्र शैवागमसिद्धान्तानां निदर्शनं करोति। तेषामेव सिद्धान्तानामत्रोपस्थापनं क्रियते–

**पशुपतिः/पाशुपतम्**

शैवागमे पाशुपतमते ब्रह्मण आरभ्य स्थावरान्तप्रभृतयः समस्ताः प्राणिनः 'पशु' पदेन व्यवह्रियन्ते। एते च पशवः संसारे मायाजाले आबद्धाः भवन्ति। शिवः एतान् मलमायादिपाशैः बध्नाति तेषां नियामकश्च भवति। अतः 'पति' शब्देन ज्ञायते।[2] इत्थं शिवः संसारस्य प्राणिनां नियामकत्वात् पशुपतिरिति नाम्ना प्रथते। महाकविनीलकण्ठः उक्तं तथ्यमेव ध्यायन् शिवमनेकत्र पशुपतिसंज्ञयाभिव्यनक्ति। यथा–

**पशुपतिरथ पाण्ड्यकन्यकायै विचकिलपुष्पमयीं वितीर्य मालाम्।**
**पुनरपि स तया समर्प्यमाणं हृदि चकमे निभृतं मधूकमालाम्॥**[3]

एकविंशे सर्गे पशुपतिसम्बोधने शिवस्यात्यन्तमेव लोकरक्षकत्वं प्रतीयते–

**औत्सुक्यात्ताड्यमाने त्वयि जगदखिलं ताड्यते वेत्रयष्ट्या।**
**भक्तस्यैकस्य रक्षा भवति पशुपते! सर्वलोकस्य शिक्षा॥**[4]

एवमेवान्यत्रापि पशुपतिशब्दप्रयोगे तस्य वैशिष्ट्यमेव जायते।[5] अन्यच्च विविधेषु प्रसङ्गेषु पाशुपतमतपरिपोषणमपि दरीदृश्यते। तद्यथा–

'चर पाशुपतव्रतम्'[6] 'पशुपतैर्महर्षिभिश्च'[7] 'पाशुपतव्रती महेन्द्रः'[8] 'ब्रह्मर्षयः पाशुपताः महान्तः'[9] 'अध्यासितं पाशुपतैर्महद्भिः'[10] 'पाशुपतं गणय सिद्धमस्त्रं तत्'[11] 'पाण्ड्यः स्वयं पाशुपतापचारात्'[12] इति। वस्तुतः पाशुपतं भगवतः पशुपतेः शिवस्याराधने सरणिः आहोस्वित् तत्सान्निध्यप्रापणे साधनमस्ति।[13] कविः उक्तस्थलेषु शिवाराधनमेव विधत्ते, अत एव तस्य पाशुपतमते श्रद्धा दृष्टिगता जायते।

**त्रिविधाः पाशाः**

जीवानाम् उत् पशूनां बन्धनं पाशः। एषः त्रिविधः–अविद्या कर्म माया चेति। अविद्या अनादिरूपा अथ च सर्वजीवेषु एकैव विद्यते। अविद्या आणवमलनामान्तरेणापि कथ्यते। एषा अज्ञानरूपा भवति यतोहि अनया जीवनस्य स्वाभाविकं शुद्धेच्छाज्ञानक्रियात्मकं स्वरूपम् आव्रियते। जीवैः कृतं कार्यमेव कर्म उच्यते। एतत् सूक्ष्मम् अदृष्टस्वरूपञ्च वर्तते। कर्म स्वकीयफलभोग्यार्थं जीवादीनां शरीराद्यैः भोग्यपदार्थैश्च आत्मानं सम्बध्नाति। एतत् चैतन्यजीवजडपदार्थानां सम्बन्धस्य हेतुः अस्ति। माया अशुद्धप्राकृतजगतः उपादानकारणमस्ति। एषा जीवेभ्यः शरीरादिभोगायतनम् इन्द्रियादि भोगसाधनं भोग्यपदार्थान् चोपादत्ते।[14] इत्थं त्रयः पाशाः त्रीणि मलानि वा सन्ति, येभ्यो विनिवृत्तिः जीवानां मोक्षप्राप्तौ आवश्यकी वर्तते।[15] महाकविनीलकण्ठः एतेषां त्रयाणां बन्धनानामुल्लेखं कुर्वन् वक्ति–

**बद्धस्य दुष्परिहरैर्मलकर्ममायाबन्धैस्त्रिभिर्मम चिरादपि दीनबन्धो।**
**बन्धं हरिष्यसि किलेति धृतक्षणस्य बन्धं तुरीयमपि हा कथमद्य दत्से॥**[16]

अत्र वातपुरीशनामाख्यो द्विजः विपत्तौ भगवन्तं शिवं सम्बोधयति यत् हे दीनबन्धो! मया मल (आणवमल = अविद्या) कर्मभ्यः मायादिभ्यः बन्धनेभ्यः मुक्त्यर्थं चिरादा-शीर्लब्धासीत् किन्त्वद्य विपत्तिं प्रदाय त्वया तुरीयो (चतुर्थः) बन्धः कथं दत्तः? इति।

एवमेव द्वितीयसर्गे '**अपास्तबन्धैरधुनापि जीवैः**'[17] इति वचनेनापि बन्धनत्रयाणां बोधः जायते।

**शिवशक्त्योरविनाभावः**

शैवदर्शनदृष्ट्या शिव एव एकमात्रं तत्त्वमस्ति, तस्य च शक्तिः शिवा वर्तते। तत्र शिवमन्तरा शक्तेः शक्तिमन्तरा शिवस्य च सत्तैव नास्ति। द्वयोः अविनाभावसम्बन्धः वर्तते। शिवाद्वैतसिद्धान्ते शक्तिशक्तिमतोरविनाभावाख्यः सम्बन्धः स्वीक्रियते, तस्मात्

शिवशक्त्योरपि अविनाभावसम्बन्धः एव प्रतिपाद्यते –

**न शिवेन विना शक्तिर्न शक्तिरहितः शिवः।**
**पुष्पगन्धवदन्योन्यं मारुताम्बरयोरिव॥**[18]

नीलकण्ठदीक्षितोऽपि द्वयोरिममेव सम्बन्धं स्वीकरोति। सः कथयति यत् हे देवि! मीनाक्षि! शिवाविनाकृतायां त्वयि प्रार्थनाया अवसर एव पृथक् न प्राप्यते, तत् भवती पृथक् यदि कृतासि चेदिमपराधं मनसि मावधारयतु–

**वचनावसरो न लभ्यते नस्त्वयि मीनाक्षि! शिवाविनाकृतायाम्।**
**इति देवि! पृथक् कृतासि किञ्चित् तमिमं मा कुरु मानसेऽपराधम्॥**[19]

एवमेव सः कालिदासस्य वागर्थाविव[20] अर्धनारीश्वररूपशिवस्य स्वरूपमवधारयन् ब्रूते –

**सव्यं वपुः शब्दमयं पुरारेरर्थात्मकं दक्षिणमामनन्ति।**
**अङ्गं जगन्मङ्गलमैश्वरं तदर्हन्ति काव्यं कथमल्पपुण्याः॥**[21]

अत्र शिवस्यार्थरूपं दक्षिणात्मकं वपुः शब्दमयात्मकं (वाक्) च सव्यं वपुर्वर्तते। द्वयोश्च सम्बन्धः अविच्छिन्नरूपः, अतः द्वयोः मेलनेनैव काव्यजगतः सृष्टिर्जायते। इत्थमेव एकविंशे सर्गे शिवाद्वैतस्यापि निदर्शनं विहितमस्ति। यथोक्तम् –

**वेत्राहतिं विभक्तुं विश्वात्मकता प्रदर्शिता भवता।**
**करगतकबलग्रासे पुनरभिनीतं शिवाद्वैतम्॥**[22]

**षडध्वानः पञ्च कलाश्च**

सृष्टिक्रमविभागो नाम अध्वा। काश्मीरशैवदर्शनेऽयं द्विविधः शुद्धः अशुद्धश्चेति।[23] कलातत्त्वभुवनवर्णपदमन्त्राः एतेऽध्वानः सन्ति। सृष्टिप्रक्रियायां शब्दस्य वर्णपदमन्त्ररूपे तथा चार्थस्य कलातत्त्वभुवनरूपे विस्तरो जायते। अयमेव विस्तरः षडध्वात्मकसंसारनाम्ना व्यवह्रियते। दीक्षासमये देशिकः आचार्यो वा शरीरस्थानामेतेषां षड्विधानामध्वनां शुद्धिं करोति।[24] एवमेव पञ्च कलाः अपि शोधयति।

**निवृत्तिः सम्प्रतिष्ठा स्याद् विद्याशक्तिरनन्तरम्।**
**शान्त्यतीतेति विज्ञेया नाददेहसमुद्भवाः॥**[25]

निवृत्तिः सम्प्रतिष्ठा विद्या शान्तिः शान्त्यतीताश्चैताः पञ्च कलाः सन्ति।[26] पञ्च कलाः एव कलाध्वनामान्तरेण विद्वद्भिः कथिताः। षडध्वनां पञ्चकलादीनाञ्च अभावे

कोऽपि देशिकः शिष्यं शोधयितुमसमर्थो भवति। शिवलीलार्णवे यदा कुब्जपाण्ड्यः दुर्दीक्षया दूषितो भवति तदा सर्वज्ञः सम्बन्धनामाख्यो देशिकः तं शोधयति। यथोक्तम्–

**षडध्वनः पञ्च कलाश्च तस्य संशोधयन् देशिकसार्वभौमः।**
**दुर्दीक्षया दूषितमप्ययत्नात् सम्भावयामास शरीरकोशम्॥**
**शरीरमाविश्य स तस्य नाडी सन्धानमार्गेण गुरुः पुनानः।**
**जातिं समुद्धृत्य दयासमुद्रश्चक्रे शिवज्ञाननिधानमेनम्॥**[27]

शुद्ध्यनन्तरं कुब्जपाण्ड्यः शैवमार्गमनुस्मरन् पृथ्वीं पालयति। शैवभक्ते राजनि समस्ताः प्रजा अपि शिवव्रतपरायणाः शिवमन्त्रलीनाः शैवागमज्ञानसुधारसज्ञाः जाताः–

**शिवव्रतस्थाः शिवमन्त्रसक्ताः शिवागमज्ञानसुधारसज्ञाः।**
**प्रजा बभूवुः सकलास्तदानीं प्रजेश्वरे शैवपदाधिरुढे॥**[28]

महाकविनीलकण्ठः षडध्वनामन्ते शिवस्य शाश्वतं पदं मनुते। यथोक्तं तेन–

**षण्णामप्यध्वनामन्ते शाश्वतं पदमैश्वरम्।**
**इति श्रुत्वैव सिद्धान्तमध्वान्तं तदयं व्यधात्॥**[29]

### त्रिविधलिङ्गानि

वीरशैवदर्शने आहोस्वित् लिङ्गायते त्रीणि लिङ्गानि स्वीकृतानि सन्ति। इष्टलिङ्गं प्राणलिङ्गं भावलिङ्गञ्चेति। तत्रेष्टलिङ्गं सकलं स्थूलं वा, प्राणलिङ्गं सकलनिष्कलं सूक्ष्मं वा भावलिङ्गञ्च निष्कलं परमस्वरूपं वा विद्यते।[30] एतेषां लिङ्गानामेतेषु रूपेष्वेव उपासना विधीयते। एतेषु इष्टलिङ्गं बाह्येन्द्रियगोचरं प्राणलिङ्गं मनोगोचरं भावलिङ्गञ्चागोचरं भवति।[31] एतेषां लिङ्गानामाराधनया भोगः मोक्षः सांसारिकबन्धेनेभ्यो मुक्तिश्च लभ्यते।[32] शिवलीलार्णवे वृत्रहत्यापापभयात् पलायितः इन्द्रः पाशुपतव्रतं चरन् शिवस्य त्रिविधानि लिङ्गानि आन्तरैः बाह्यैश्च वस्तुभिः अर्चयति। यथोक्तम् –

**त्रिविधानि शाम्भवानि लिङ्गान्यर्चयद्वस्तुभिरान्तरैश्च बाह्यैः।**
**लभते स्म न शान्तिमात्मनोऽयं क्वचिदप्येषु कुतो हि पातकस्य॥**[33]

अत्र त्रिविधलिङ्गानां वर्णनेन कवेः लिङ्गायते वीरशैवदर्शने वा नैपुण्यमवलोक्यते।

### पञ्चाक्षरः षडक्षरश्च

पञ्चाक्षरः (नमः शिवाय) महामन्त्रो विद्यते। ऊँकारश्च शिवस्य वाचकः तस्य देहः। नकारादिपञ्चाक्षराणि तस्य सद्योजातवामदेवादिवक्त्राणि सन्ति। पञ्चाक्षरमन्त्रे यदा ऊँकारः युज्यते, तदायं षडक्षरः (ऊँ नमः शिवाय) इत्युच्यते।[34] महाकविनीलकण्ठः पञ्चाक्षरस्य

महत्त्वं वर्णयन्नाह–

**विश्वस्य दीर्घां श्रवणादिभङ्गीं वीतोद्यमाः स्मश्चिरमीश! मोक्षे।**
**सम्प्रत्यवाबुद्ध्यत वाक्यशेषपञ्चाक्षरीयं मधुरा विनेति॥**[35]

अत्र कविः स्वीकरोति यत् वेदादिपाठेन मोक्षप्राप्तेर्विधिः दीर्घोऽस्ति। मोक्षस्य सहजोपायः पञ्चाक्षरस्य जपः मधुरायां निवासश्च वर्तते। एवमेव षडक्षराणामपि वैशिष्ट्यं ख्यापित-मस्ति–

**तं भस्मरुद्राक्षषडक्षराणां तत्त्वावबोधैकनिधिं महान्तम्।**
**आराध्य केचित् कलिमध्यजैषुः पचेलिमप्राक्तनपुण्ययोगात्॥**[36]

**चितिः ( वाक्तत्त्वम् )**

नीलकण्ठः भगवत्याः मीनलोचनाया वर्णनप्रसङ्गे कथयति–

**सा वक्ति सा वाचयति सा चेतयति सा चितिः।**
**सा गतिः सा गमयति सैवेयं मीनलोचना॥**[37]

अत्र मीनलोचना चितिः अर्थात् वाग्रूपा वर्तते। वाक्तत्त्वमेव चितिक्रियारूपं मन्यते। काश्मीरशैवदर्शने शिवाद्वैते तत्त्वतः चिद्रूपः परमतत्त्वः शिवः चितिं वाक्तत्त्वेन सम्बोधयति– ''**चितिः प्रत्यवमर्शात्मा परा वाक्।**''[38] वस्तुतः चितिं वाक्तत्त्वमभिख्यापनेन तस्याभिप्रेतार्थो विद्यते यत् सा प्रत्यवमर्शेन विश्वस्याभिपालनं करोति। यथोक्तम्– ''**वक्ति विश्वमभिलपति प्रत्यवमर्शेन इति च वाक्।**''[39] अमुमेवाशयमधिकृत्य नीलकण्ठः 'सा वक्ति-सा चितिः' एवं रूपेण तां मीनलोचनां प्रत्यपादयत्।

**सर्वज्ञता**

शैवदर्शने पूर्णज्ञानसम्पन्नः शिवः सर्वज्ञः तस्य च शक्तिः सर्वज्ञता– ''**सर्वज्ञतास्य शक्तिः।**''[40] महाकविनीलकण्ठः सत्कवीनां महत्त्वं शिवादप्यधिकं प्रकटयति। तन्मते सत्कवीनां विकसिता प्रतिभा यज्जानाति तत् सर्वज्ञताशक्तिसम्पन्नः शिवोऽपि न जानाति। तद्यथा–

**सदर्थमात्रग्रहणात्प्रतीता सर्वज्ञता सापि शशाङ्कमौलेः।**
**प्राप्ता विकासं प्रतिभा कवीनां व्याप्नोति यद्वेत्ति न तच्छिवोऽपि॥**[41]

**शैवगङ्गा**

**गाङ्गेयैः शैवगाङ्गेयैः कमलैः कमलास्पदैः।**
**एकदन्तं चतुर्दन्तः सिन्धुरं सिन्धुरोऽर्चयत्॥**[42]

इति नीलकण्ठोक्तपद्ये शैवगाङ्गेयैरित्यत्र मूलशिवगङ्गापदं शैवदर्शनरीत्या पारिभाषिकं

वर्तते। शिवालयस्य समीपं यज्जलं भवति तत् शिवगङ्गाजलं प्रख्यायते। यथोक्तम् –

**महालयसमीपे तु यत्तोयं परितिष्ठते।**
**शिवगङ्गेति विज्ञेया तत्र स्नात्वा लभेत माम्।।**[43]

शिवगङ्गासम्बद्धमेव जलं शैवगङ्गाजलं, तैः शैवगाङ्गेयैः शिवगङ्गासम्बन्धिभिः शिवालयसमीपस्थैः पवित्रैः जलैः स सिन्धुरः सिन्धुरं गणेशमर्चयत्।

**द्वादशान्तैकविभावनीयम्**

नीपकाननस्य कीदृशं वैभवं वैशिष्ट्यञ्चेति वर्णनप्रसङ्गे कविः कथयति यत् –

**यद् द्वादशान्तैकविभावनीयं त्र्यय्यन्तदृश्यं कथमस्तु तन्नः।**
**इत्यध्यवस्यैव तदावसन्ति ब्रह्मर्षयः पाशुपता महान्तः।।**[44]

अर्थात् यद् द्वादशान्तैकविभावनीयं त्र्यय्यन्तदृश्यं परमतत्त्वमस्ति तदस्माकं कथं स्यादिति विचार्यैव महान्तः पाशुपताः ब्रह्मर्षयः तत्र नीपकानने निवसन्ति।

अत्र 'द्वादशान्तैकविभावनीयम्' 'पाशुपताः' इति पदद्वयेन कविः शैवदर्शनं प्रति सङ्केतयति। शैवदर्शने नैकत्र द्वादशान्तशब्दः प्रयुज्यते। कारणागमे क्रियापदे शाम्भवव्रतीनां नित्यकरणीयप्रसङ्गेऽयं शब्दः प्रयुक्तोऽस्ति। तत्रोक्तम् –

**गुरूपदिष्टमार्गेण द्वादशान्तेऽथवा हृदि।**
**दिव्यरूपमरूपं वा चिन्तयेन्मामनन्यधीः।।**[45]

अत्र द्वादशान्ते दिव्यरूपधारिणमरूपिणं वा शिवं स्मर्तुं निर्देशः वर्तते। को नाम द्वादशान्त इति जिज्ञासायाम् अनाहतचक्रहृदयस्थाने द्वादशदलकमलस्य द्वादशकर्णिकाया अन्तरं परमशिवतत्त्वस्य वासो भवति।[46] स एव द्वादशान्तः तेन विभावनीयं तत्त्वम् अर्थात् परमशिवतत्त्वप्राप्तये पाशुपताः तत्र नीपकानने वासं चक्रुरिति कवेस्तात्पर्यम्।

**अनुत्तरम्**

**अनाहतोद्भूतमपास्तभेदमाद्यं शिवस्यौपयिकं विधातुः।**
**नादाभिधं पारगमध्वनां तदनुत्तरं ज्योतिरनुस्मरामः।।**[47]

अत्र कविः शैवदर्शनस्य विविधतत्त्वमेकीकृत्य प्रतिपादयति। सः अनुत्तरं ज्योतिः स्मरति। तच्च अनाहतोद्भूतम् अपास्तभेदं शिवस्य औपयिकं नादाभिधम् अध्वनां पारगं चास्ति। अविद्यमानमुत्तरमन्यत् यस्मिन् तदनुत्तरम् अर्थात् यस्मादुत्तरमधिकं कस्यचित् तत्त्वस्य सत्ता नास्ति तत् परमतत्त्वं अनुत्तरनाम्ना व्यवह्रियते। अनुत्तरे च शिवात्मके

चैतन्ये आनन्दशक्तेर्विश्रान्तिः।[48] अत्र तदेवानुत्तरं ज्योतिः स्मरति कविः, तच्च कीदृशम्? तर्हि अनाहतोद्भूतम् अर्थात् अनाहतहृत्स्थं द्वादशदलं पद्मं ततः उद्भूतं शिवस्यौपयिकं नादसंज्ञकम् अध्वनां सृष्टिक्रमे शुद्धाशुद्धाध्वनां पारे गन्तुं समर्थं तत्।

**प्रसादः**

कविः उपमाप्रयोगेऽपि शैवदर्शनस्य तत्त्वमुपस्थापयति। चतुर्थसर्गे राज्ञः प्रासादस्य निर्मलत्वं प्रसादस्य नैर्मल्येन तुलयति। सिद्धान्तशिखामणिग्रन्थे **'नैर्मल्यं मनसो लिङ्गं प्रसाद इति कथ्यते।'**[49] इत्युक्तमस्ति। तत्र चित्तस्य निर्मलत्वं प्रसाद इत्यभिहितमस्ति। चित्तस्य मनसो नैर्मल्यं शिवसमर्पितानां वस्तूनां सेवनेनापि जायते। नीलकण्ठः उक्तमाशयमवधाय एव पद्यमिदं प्रणीतवान् –

**प्रासादः शुशुभे तत्र भवने धरणीपतेः।**
**भक्त्या महेशितुर्वृद्धः प्रसाद इव निर्मलः॥**[50]

अत्र भगवतः भक्त्या वृद्धः निर्मलः प्रसाद इव राज्ञः प्रासादः शुशुभे।

**प्रणवः/ऊँकारः/तारः**

शैवसिद्धान्ते ऊँकारस्य महत्त्वं वरीवर्ति। एषः परमेश्वरशिवस्य वाचकः, तस्य देहः।[51] गणकारिकारीत्या दुःखनिवृत्तिप्रयोजने ऊँकारः ध्येयत्वेनाभिधीयते। यथोक्तम्–

**दुःखान्तनिवृत्तिध्यानैकविषयत्वमोङ्कारत्वम्।**[52]

शिवलीलार्णवे महाकविनीलकण्ठः ऊँकारस्य विविधरूपं प्रस्तौति। सः द्वाविंशे सर्गे शिवस्याभिख्याम् ओङ्कारत्वेन विदधाति। तद्यथा–

**ये ये जना यद्यदिहार्थयन्ते तत्तन्निरस्तोपधि तेषु तेषु।**
**ओमित्यलोभादनुजानतः किमोमित्यभिख्यैव तवेयमासीत्॥**[53]

तथा च ऊँकारस्य प्रणवतारादिपर्यायेणापि गणयति–

**अस्ति वाग्ब्रह्म तत् किञ्चिदखिलोत्पत्तिकारणम्।**
**प्रणवोङ्कारतारादिपर्यायगणघोषितम् ॥**[54]

नीलकण्ठदृष्ट्या प्रणवस्य तारस्य वा प्रभावः शब्देन वर्णयितुमशक्यः। यतोहि प्रणवः व्यापकः तस्मात् प्रसूताः सर्वाः गिरश्च व्याप्याः। यथोक्तम् –

**प्रभावं तस्य तारस्य ब्रूयां शब्देन केन वः।**
**तत्प्रसूता गिरः सर्वास्तद्व्याप्या व्यापकस्तु सः॥**[55]

**बिन्दुः**

शैवागमे बिन्दुः नित्यः व्यापकोऽमूर्तश्च स्वीक्रियते। एषः नादादिरूपे आत्मनां सम्यक् ज्ञानस्य कारणं भवति, मायां परित्यज्य सर्वेषां वस्तूनामुपादानकारणं जडश्चास्ति।[56] महाकविः नीलकण्ठः एतस्य बिन्दुतत्त्वस्योपस्थापनमत्यन्तमेव दार्शनिकरीत्या कुरुते–

**समस्तदिव्यागमसम्प्रतीते तारात्मके तत्र महेशलिङ्गे।**
**अर्धेन्दुरर्धेन्दुतयैव दृष्टो बिन्दुस्तु सिन्धुः स्तिमिता जटाग्रे।।**[57]

**नादः**

नादः परब्रह्मणो बोधको विद्यते।[58] शैवमतसम्प्रदायेऽस्य महत्त्वं भृशमवलोक्यते। शिवलीलार्णवे कविनीलकण्ठः परमज्योतिस्स्वरूपस्य तस्य परमतत्त्वस्य विशेषणं नादात्मकेन विधाय परब्रह्मणो नादेनाभेदात्मकतां साधयति। एवमेव सः कथयति यत् नादतत्त्वमवबुध्य नन्दितुं शिवात्परोऽन्यः कश्चित् न समर्थः। यथा–

**नापरोऽस्ति चतुरो महेश्वरान्नादतत्त्वमवबुध्य नन्दितुम्।।**[59]

नीपकाननस्यातिशयबोधने कविः पाण्ड्यार्पितायां नानारहस्यागमबोधनीयायां वेत्रनिपातरेखायां नादात्मकध्वन्यात्मकतायाः सम्भावनां प्रकटयति। तद्यथा –

**पाण्ड्यार्पिता भात्यधुनापि यस्मिन्नृज्वायता वेत्रनिपातरेखा।**
**नानारहस्यागमबोधनीयां नादात्मतामस्य विवृण्वतीव।।**[60]

इत्थं चिति-पञ्चकला-त्रिविधपाश-सर्वज्ञता-नाद-बिन्दु-प्रभृतिशैवागमतत्त्वानामुल्लेखेन वक्तुं शक्यते यत् शिवलीलार्णवमहाकाव्यं न केवलं काव्यसम्पद्दृष्ट्या प्रत्युत शैवागम-सिद्धान्तप्रतिपादनदृष्ट्यापि स्वमहिमानं प्रकाशयतीति शम्।

*

**सन्दर्भाः–**


1. सभारञ्जतशतकम्, पद्यम् 14
2. (क) ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः। पशवः परिकीर्त्यन्ते संसारवशवर्तिनः।।
   तेषां पतित्वात् विश्वेशः शिवः पशुपतिः स्मृतः। मलमायादिभिः पाशैः स बध्नाति पशून् पतिः।।
   चन्द्रज्ञानागमः, क्रियापादः प्रथमपटलम्, पद्यम् 10-11

   (ख) पश्यनात् पाशनाच्च पशवः। पाशा नाम कार्यकारणाख्याताः कलाः ताभिः पाशिताः बद्धाः सन्निरुद्धाः शब्दादिविषयपरवशा भूत्वावतिष्ठन्ते। कौण्डिन्यभाष्यम्, पृ.5
3. शिवलीलार्णवः 7.59
4. शिव. 21.97
5. शिव. 4.91, 21.90
6. शिव. 3.35
7. शिव. 3.50
8. शिव. 3.38
9. शिव. 21.41
10. शिव. 21.17
11. शिव. 21.100
12. शिव. 21.103
13. पाशुपतम्। पशुपतिर्वास्मिन् चिन्त्यत इति पाशुपतम्। पशुपतिप्रापकत्वात् वा पाशुपतम्, पाशुपत शैव धर्म एवं दर्शन,पृ.69
14. भारतीय दर्शन, आलोचना और अनुशीलन, पृ.336
15. वही, पृ.336
16. शिव. 21.28
17. शिव. 2.50
18. सिद्धान्तशिखामणिसमीक्षा, पृ.97
19. शिव. 3.78
20. रघुवंशम् 1.1
21. शिव. 1.15
22. शिव. 21.95
23. (क) शाम्भवाः शाक्ता मन्त्रमहेश्वराः मन्त्राः इति शुद्धोऽध्वा। इयति साक्षात् शिवः कर्ता। तन्त्रसारः, पृ.75

    (ख) अशुद्धं (मायाप्रभृतिकं) पुनरध्वानमनन्तापरनामेधोरेशः सृजति, ईश्वरेच्छावशेन प्रक्षुब्ध-भोगलोलिकानामणूनां भोगसिद्ध्यर्थम्। तन्त्रसारः, पृ.75
24. चन्द्रज्ञानागमः, 'षडध्वशुद्धिकल्पितम्' इत्यस्य टिप्पणी, पृ.10
25. शारदातिलकः, प्रथमपटलम्, 26 कारिका
26. ख्याताः कलाः यद्यपि तत्र लिङ्गे पञ्चैव सिद्धाः शिवशासनेषु। शिव. 2.53
27. शिव. 22.30, 31
28. शिव. 22.33
29. शिव. 4.90
30. प्रथमं भावलिङ्गं तु द्वितीयं प्राणलिङ्गकम्। तृतीयमिष्टलिङ्गं स्यादित्येवं त्रिविधं मतम्।।
    निष्कलं भावलिङ्गं स्याद् भावग्राह्यं परात्परम्। प्राणलिङ्गं मनोग्राह्यं भवेत्सकलनिष्कलम्।।
    सकलं दृक्कलाग्राह्यमिष्टलिङ्गं प्रकीर्तितम्। इष्टसिद्धिकरं सम्यगनिष्टपरिहारकम्।।
    चन्द्रज्ञानागमः, तृतीयपटलम्, पद्यम् 23.25

31. लिङ्गधारणचन्द्रिका, पृ.22
32. चन्द्रज्ञानागमः, तृतीयपटलम्, 42-45
33. शिव. 3.40
34. पञ्चाक्षरो महामन्त्रः प्रणवेन युतः शिवे। षडक्षर इति प्रोक्तो मन्त्रराजाह्वयः परः।।
ॐकारः मम देहः स्यान्नकाराद्यास्तथैव च। सद्यादिपञ्चवक्त्राणि क्रमादेवं वरानने।।
पञ्चब्रह्मात्मको मन्त्रः प्रणवाद्यः षडक्षरः। सूक्ष्मागमः, चतुर्थपटलम्, पद्यम् - 35.37
35. शिव. 22.57
36. शिव. 22.6
37. शिव. 14.52
38. ईश्वरप्रत्यभिज्ञा कारिका, 1.5.13
39. अभिनवगुप्तः, ईश्वरप्रत्यभिज्ञा 1.5.13
40. षट्त्रिंशत्तत्वसन्दोहः, कारिका - 9
41. शिव. 1.20
42. शिव. 4.34
43. कारणागमः, (क्रियापादः) तृतीयपटलम्, पद्यम् - 23
44. शिव. 2.41
45. कारणागमः, तृतीयपटलः, पद्यम् - 3
46. वीरशैवाचारप्रदीपिका, पृ.104, मराठी अनुवादे प्रदत्ते स्पष्टीकरणम्।
47. शिव. 1.7
48. अनुत्तर एव विश्रान्तिः आनन्दः। तन्त्रसारः (अभिनवगुप्तः), आह्निकम् 3, पृ.12
49. सिद्धान्तशिखामणिः, 11.6, पृ.194
50. शिव. 4.104
51. सूक्ष्मागमः, चतुर्थपटलम्, पद्यम् - 36
52. गणकारिका, पृ.11
53. शिव. 22.58
54. शिव. 14.42
55. शिव. 14.45
56. एतेषु षट्त्रिंशत्तत्त्वेषु बिन्दुर्नित्यो व्यापकोऽमूर्तः परमेश्वरस्य नित्याधिष्ठेयः शब्दार्थात्मकनादादिद्वारेणात्मनां सम्यक् ज्ञानस्य कारणं भवति, अमोहकश्च, मायीयव्यतिरिक्तसमस्तवस्तूनामुपादानं जडश्च। सिद्धान्तप्रकाशिका, पृ.14
57. शिव. 2.46
58. तन्त्रसारः, पृ.12
59. शिव. 10.67
60. शिव. 2.45

*

# दाराशिकोह-विरचिते समुद्रसङ्गमे भूतव्याख्यानावसरे सृष्टिक्रियाविमृष्टिः

**श्यामल पण्डा**

**उपोद्धातः**

निखिलविश्वस्य वाङ्मयेषु प्राचीनतमेष्वन्यतमा सर्वदेशव्यापिका सभ्यमात्रगौरवास्पदीभूता भाषा संस्कृतभाषा। तद्भाषया विरचितस्य साहित्यस्य प्रचारे प्रसारे च भूमावस्यां युगपद् विद्यमानानां नैकेषां धर्माणामवदानन्तु अनस्वीकार्यम्। महम्मदीयधर्मस्तु न व्यतिक्रमो विषयेऽस्मिन्। वङ्गीयसाहित्यं प्रति महम्मदीयनरपतीनां महम्मदीयकवीनाञ्चानुरागस्तु सुविदितः। तत्र लक्षणीयो विषयो यद् महम्मदीयानाम् उत्साहेन परिपुष्टं वङ्गीयसाहित्यं महम्मदीयसंस्कृतेः प्रचारे न व्यापृतमपितु हिन्दुसंस्कृतेः अनुकूलविश्लेषणे परिपूर्णम्। भारतीयसंस्कृतिं प्रति महम्मदीयीनामनुरागः प्रादेशिकसाहित्येन अभिव्यक्तो नासीदिति विषये संस्कृतसाहित्येऽपि तन्निदर्शनं दरीदृश्यते, यस्य प्रकृष्टमुदाहरणन्तु सप्तदश–ईशवीयाब्दे शाहजहानज्येष्ठ-पुत्रदाराशिकोहविरचितः समुद्रसङ्गमः इति ग्रन्थः। तेनैव फारसीभाषायां विरचितस्य मज्म-उल-वहरेन इति ग्रन्थस्य संस्कृतरूपान्तरमिदं ग्रन्थकुसुमम्। अत्र वेदान्तः सूफी चेति द्वयोर्दर्शनयोः समन्वयसाधने यत्नः कृतो ग्रन्थकृता। तन्नये द्वयोर्धर्मयोः विरोधः आपाततः प्रतीयते परिभाषाभेदादतिरिक्तः कोऽपि भेदश्च स्वरूपावाप्तौ न दृश्यत इति। सादृश्यमिदमव-बोधयितुं तेन ग्रन्थे द्वाविंशतिः विषयाः उपस्थापिताः। तत्र आदौ अनासिरपरपर्यायभूतव्याख्या भूतनिरूपणं वा। भूतनिरूपणमाध्यमेन ग्रन्थकारेण पूर्वोक्तयोर्दर्शनयोः सृष्टिप्रक्रियायाः वर्णनं विहितम्। प्रसङ्गतः अत्र प्राप्यन्ते सूफीनां मतानि, कोराणस्य (Quran) उद्धृतयः क्वचित् भारतीयदर्शनस्य भिन्नानि च तत्त्वानि।

निबन्धस्यास्य आलोचनायामादौ समुद्रसङ्गमानुसारं ग्रन्थकृतः स्वमतं प्रस्तुतम्, ततः तुलनात्मिका चर्चा च चर्चिता मया।

### भूतनिरूपणे चिदाकाशः अजन्यो नित्यश्च

#### दाराशिकोहमतम्

**उन्सुर** इति शब्दस्य बहुवचने **अनासिर** अर्थात् भूतसमूहः। तेनोक्तं भूतानि पञ्चेति। तत्र आदौ **उन्सुरअअजम-**पदाभिधेयम्, द्वितीयं **बाद-**पदाभिधेयम्, तृतीयम् **आतश-**पदाभिधेयम्, चतुर्थम् **आब-**पदाभिधेयम् पञ्चमन्तु **षोक-**पदवाच्यम्। एतानि भूतानि भारतीयदर्शने आकाशः, वायुः, तेजः, जलं, पृथिवी इति नाम्ना परिगण्यन्ते मुनिभिः। एतेषां भूतानां सहावस्थानं हि जीवितम्, वियोगस्तु मृत्युरेव। पञ्चभूतेष्वादिभूत आकाशः त्रिविधः, तत्र समस्ते भूते व्यापकत्वेन स्थितो भूताकाशः, ब्रह्माण्डे व्याप्तत्वात् चित्ताकाशः, सर्वव्यापकत्वात् चिदाकाशः। चिदाकाशः उत्पत्तिविनाशरहितः सृष्टेः मूलं नित्यञ्च।

#### तौलात्मिकी समीक्षा

भूतानां भेदे द्वयोर्धर्मयोः मतन्त्वभिन्नम्। द्वयोर्धर्मयोरेव पञ्च भूतानि स्वीकृतानि। चिदाकाशस्य नित्यत्वे छान्दोग्योपनिषद्याम्नातम् –

''**अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्यकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशपरायणम्।**''[1] इति।

अर्थात् अस्य लोकस्य क आश्रयः? उच्यते–आकाशः। सृष्टौ तस्मात् सर्वं जायते प्रलये तस्मिन्नेव विलीयते, यतो हि आकाश एव महान् परश्च।

अत्र चिदाकाश एव परमात्मा न तु भूताकाशः। श्रुतौ ब्रह्मसूत्रेऽपि च तत्त्वमिदं प्रतिपादितम्। कोराणेऽपि कथितमस्ति –

''**परब्रह्मणः मुखरूपचिदाकाशातिरिक्तं पार्थिवं सर्वं नश्यति।**'' (अनूदितम्)

अनेन ज्ञायते यत् चिदाकाशोऽविनाशीति। मायोपाधिविशिष्टं सगुणं ब्रह्मैव ईश्वर इति सृष्टिविषये अद्वैतवादिनः शङ्करस्य मतम्। सगुणब्रह्मण एव जगतः सृष्टिः, न तु निर्गुणब्रह्मणः। जीली इति सूफीवादिनो नये अनभिव्यक्तं निर्गुणं ब्रह्म स्रष्टा न, स्रष्टा भवति केवलं सगुणः ईश्वर एव। अत्र द्वयोर्मध्ये मूलतया प्रभेदो यत् अद्वैतवेदान्ते ब्रह्मैव सत्यं जगत् ईश्वरश्च मिथ्येति। जीली-मते तु ईश्वरः जगच्च निर्गुणपरमात्मेव सत्यमिति। इत्थं दाराप्रतिपादितं चिदाकाशरूपं ब्रह्म नित्यमिति सत्यम्। यद्यपि युक्तिरियं महम्मदीयदर्शने सर्वथा न ग्रहणयोग्या।

### आकाशात् प्रथमं जायते इश्क माया वेति पदार्थः

**दाराशिकोहमतम्**

समुद्रसङ्गमे ग्रन्थकृता ग्रथितं यत् चिदाकाशात् आदौ जातम् 'इश्क' प्रेम वा। भारतीयदर्शने यत् माया इति। सृष्टिविषये तेन गणितं भगवद्वाक्यम् – **'अहं गुप्ताकारः स्थितस्ततः प्रसिद्धः स्यामितीच्छया सृष्टिं कृतवानिति।'**[2] इति।

**तौलात्मिकी समीक्षा**

अत्र प्रतिपादितं प्रेम वेदान्ते माया न। तयोर्मध्ये नास्ति किमपि सादृश्यम्। मायायाः वर्णनं प्राप्यते श्वेताश्वेतरोपनिषदि –

**''अस्मान्मायी सृजते विश्वमेतत्।**
**तस्मिंश्चान्यो मायया सन्निरुद्धः॥**
**मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्॥''**[3] इति।

ब्रह्म मायया जगदिदं सृजति, तस्मिन् जगति तद् जीवरूपेण अविद्यया निरुद्धं भवति। प्रकृतिस्तु माया परमेश्वरो मायाधीश इति जानीत।

अद्वैतमते माया ब्रह्मणः विशेषा शक्तिः, यस्मात् ब्रह्म मिथ्याजगत् सृजति। सृष्टेरुद्देश्यं किमिति दर्शनशास्त्रस्य चिरन्तनप्रश्नः। वेदान्ते जगतः सृष्टिः ईश्वरस्य लीलामात्रम्।

**'लोकवत्तु, लीलाकैवल्यम्।'**[4] इति।

लीलारूपा क्रीडा न अभावजा परन्तु किमपि प्रयोजनं विना परमेश्वरः क्रीडायां प्रवर्तते। सृष्टिरियम् अनन्तानन्दस्य मूर्तः प्रकाशः।

तथाह्याम्नातम् – **''आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति।''**[5] इति।

अत आनन्दाद् विश्वचराचरस्य सृष्टिः, आनन्दे तस्य स्थितिः, आनन्दे एव तदीयो लयः।

हल्लाज इति सूफिनो मते वेदान्तप्रपञ्चितेश्वरस्य लीलावादस्य आभासो भासते। तन्नये जगदिदं परमेश्वरस्य प्रेमानन्दयोरभिव्यक्तिः। आनन्दात् विश्वसृष्टिः न तु अभावात्। मतवादोऽयं शुद्धाद्वैतवादस्य प्रवर्तकं वल्लभाचार्य्यं स्मारयति। तेनोक्तं सृष्टेः पूर्वम् ईश्वरो निःसङ्गो विराजते इति। एवं यतो हि लीला कथमपि एकेन न सम्भवति, तस्मात्सङ्गरूपेण मानवमसृजत्स परमेश्वरः।

उपर्युक्तादालोचनात् स्पष्टतो ज्ञायते यत् दारा–कथितायां सृष्टिप्रक्रियायां महम्मदीयदर्शनस्य इश्क इत्यनेन भारतीयदर्शनस्य मायायाः नास्ति किमपि सादृश्यम्। सृष्टेर्विषये आपातदृष्ट्या सादृश्यं काशते इत्येतत्तु हल्लाज-वल्लभाचार्ययोर्मतमाश्रित्य वक्तुं पार्यते।

## मायोद्भूतो महम्मदो हिरण्यगर्भो वा

### दाराशिकोहमतम्

ग्रन्थकारेणोक्तं– **'मायायाः सकाशात् जीवात्मा प्रादुर्बभूव। ... अयमेव वैदिकमुनिभिर्हिरण्यगर्भ इत्युच्यते। एष एव व्यञ्जनया अमा इत्युच्यते।'**[6] इति।

### तौलात्मिकी समीक्षा

महम्मदीयदर्शने महम्मद ईश्वरप्रेरितदूतरूपेण गृहीतः, यस्य सृष्टिप्रक्रियायां नास्ति किमपि कार्यम्। भारतीयदर्शने तु हिरण्यगर्भो दूतो न, स तु व्याप्त्यर्थकविष्णुशब्दव्यापकस्य परमात्मनो वाचकः। स एव प्रथमो जातः सन् सर्वभूतानामधिपतिरूपेण विराजते। स एव आकाशपृथिव्यन्तरीक्षाणां धारकः। यथार्थमेव श्रुतौ श्रूयते–

**''हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।**
**स दधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।''7** इति।

प्रसङ्गतः बृहदारण्यकोपनिषद्यप्याम्नातम्– **'नैवेह किञ्चिनाग्र आसीन्मृत्युनैवेदमावृतमासीत्।'**[8] इति।

मन्त्रेऽस्मिन् हिरण्यगर्भो बुभुक्षारूपमृत्युशब्दस्य वाचकः। ततस्तस्मिन्नेव उपनिषदि मृत्योरर्थः तमोरूपेणापि स्वीकृतः– **'असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृतं गमयेति।'**[9] इति। मन्त्रेऽस्मिन् असत् इति शब्दः अन्धकारमृत्योर्वाचकः। सत् इति पदञ्च अमृतज्योतिसोश्च  पर्यायवाचकम्।

जीली-मते शुद्धेश्वर आन्तरबाह्यिकभेदेन इति द्विधा विभक्तः। तत्र आन्तर इति रूपस्य नाम घनान्धकारः **( आल् अमा )**। अस्यामेवावस्थायां परब्रह्म पूर्णरूपेण अनभिव्यक्तं सम्बन्धहीनञ्च भवति। सूफीवादे **आल् अमा** इति शब्दो भारतीयदर्शनस्य तमसा साकमुपमातुं शक्येत।

## पृथिव्याः सर्वभूतोत्पत्तिः

### दाराशिकोहमतम्

दाराशिकोहो वदति यत्– **'वायुर्नाम परमात्मनो निःश्वसितमिति वदन्ति ...**

**अतो वायोस्तेजस उत्पत्तिः ... तेजसः सकाशात् जलस्योत्पत्तिः ... जलानन्तरं पृथिवी। इयं पृथिवी जलस्य शरस्थानीया ... महाप्रलये व्युत्क्रमेण लयः। प्रथमं पृथिव्या जले लयः। ततो जलं तेजसा शुष्यत्तेजसि लीयते। ततो तेजो वायौ लीयते। ततो वायुः चिदाकाशे लीयते।''**[10] पृथिव्या भौतिकोपादानानामुत्पत्तिः पृथिव्यामेव तेषां विलयो भवतीति तात्पर्यार्थः।

**तौलात्मिकी समीक्षा**

वस्तुतः पञ्चसु भूतेष्वन्तिमोपादानं पृथिवी। यद्यपि भारतीयदर्शने सर्वभूतानामुत्पादिकेयं पृथिवी शुद्धा न, सा खलु अन्यच्चतुर्णां भौतिकोपादानानां संमिश्रणम्। कोराणेऽपि कथितं–

'मानवानां सृष्टिः पृथिव्याः मृत्पिण्डाद्वा संघटिता' इति। (अनूदितम्)

अत एव युक्तिरियं दर्शनद्वये समर्थिता। प्रसङ्गतः उपनिषदि व्याख्याता सृष्टिप्रक्रिया उल्लेखितव्या। बृहदारण्यकोपनिषदि प्राप्यते– **''आपो वा अर्कस्तद् यदपां शर आसीत् तत् समहन्यत। सा पृथिव्यभवत् तस्यामश्राम्यत् तस्य श्रान्तस्य तप्तस्य तेजोरासो निर्वर्तिताग्निः।''**[11] इति।

मृत्योः जलं जातम्, जलस्योपरि स्थितः शरः पृथिवी अभूत्। पृथिव्याः सृष्टौ प्रजापतिः श्रान्तो भवति। तस्मात् तोजोरूपः रसो भवति निर्गतः, स एवाग्निः।

तैत्तिरीयोपनिषद्यपि सृष्टिक्रमः प्राप्यते। तत्र आत्मन आकाशः, आकाशात् वायुः वायोः अग्निः, अग्नेः जलं, जलात् पृथिवी, पृथिव्या औषधयः, औषधिभ्योऽन्नं, अन्नात् पुरुषः जायते।

वेदान्ते पञ्चभूतानां संमिश्रणमेव पञ्चीकरणम् इति। तत्र इत्थंभूतेन जगत् सृष्टम्। ब्रह्मसूत्रस्य विपर्य्ययाधिकरणे दृश्यते– **'विपर्ययेण तु क्रमोऽतः उपपद्यते च।'**[12] इति।

प्रलयकाले उत्पत्तेः व्युत्क्रमेण भूतानां लयो भवतीति।

**उपसंहृतिः**

उपर्युक्तेभ्यो विवरणेभ्यो ज्ञायते यत् भूतव्याख्यानावसरे सृष्टिध्वंसप्रक्रियायां वेदान्तेन सह सूफीमतवादस्य बाहुल्येन सादृश्यं लक्ष्यत इति। यदि केनचिद् विशेषवेदान्तसम्प्रदायेन समं कस्यचिद् विशेषसूफीसम्प्रदायस्य तौलात्मिकी समीक्षा क्रियते, तदा समेषां तत्त्वानां मिथः सादृश्याविष्करणं सुतरामेवासम्भवपरं स्यादिति मन्ये। तथापि तुलनात्मकालोचनस्यास्य

पश्चात् ग्रन्थकृतः औदार्य्यं पुनः पुनः अनुभूयते। एतदेव भारतीयसंस्कृतेः परिचितिः। सत्यमेवाम्नातम् ऋग्वेदे– **'एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।'**[13] इति। ज्ञानिनस्तु एकमेव भिन्नमिति वदन्ति। अस्य वाक्यस्य प्रतिध्वनिः श्रूयते कालिदासस्य रघुवंशे–

**''बहुधाऽप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः।**

**त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे।।''**[14] इति।

हे भगवन्! यथा समस्ताः गङ्गाप्रवाहाः सागरे पतन्ति तथैव वर्णिता मोक्षप्रापका विविधा मार्गा भगवति विष्णौ एव प्रविशन्तीत्यलं पल्लवितेनेति शिवम्।

*

**सन्दर्भाः–**


1. छान्दोग्योपनिषद्, 1.9.1
2. समुद्रसङ्गमः, पृ.69
3. श्वेताश्वतरोपनिषद्, 4.9-10
4. ब्रह्मसूत्रम्, 2.1.32
5. तैत्तिरीयोपनिषद्, 3.6
6. समुद्रसङ्गमः, पृ.69
7. ऋग्वेदः, 10.121.1
8. बृहदारण्यकोपषिद्, 1.2.1
9. तदेव, 1.3.28
10. समुद्रसङ्गमः, पृ.69-70
11. बृहदारण्यकोपषिद्, 1.2.2
12. ब्रह्मसूत्रम्, 2.3.14
13. ऋग्वेदः, 1.64.46
14. रघुवंशम्, 10.26


*

# संस्कृतसाहित्ये गणिकापरम्परा

**डॉ. शुभ्रजित् सेनः**

## 1. भूमिका

**'नह माता, नह कन्या, नह वधू, सुन्दरी रूपसी, हे नन्दनवासिनी'** इति विश्वकवी रवीन्द्रनाथठक्कुरः स्वरचितायां 'उर्वशी'ति कवितायां स्वर्गीयाप्सरसः उर्वश्याः सुन्दरतया रूपचित्राङ्कनं विहितवान्। यासां गृहं तथा संसारबन्धनञ्च न स्तः, याः सर्वदा स्वर्गीयदेवेभ्यः मर्त्यस्थान् मनुजान् यावत् सर्वान् विमोहयन्ति, ता एव अप्सरःपदवाच्याः। एता बहुगामिन्यः तथा स्वेच्छाचारिण्यो भवन्ति। एतासां वाराङ्गनानां किमपि सांसारिकबन्धनं न विद्यते तथा च एताः बहुपुरुषाणां जीवनसङ्गिन्यो भवन्तीति। सामाजिकदृष्ट्या ताः वाराङ्गनाः गृहस्थनारीभ्यो भिद्यन्ते।

मानवचरित्रस्य प्रवृत्तिद्वयम् – क्षुधा जैविकताडनञ्चेति। प्रवृत्तिद्वयं मनुष्येषु विशेषतया लक्ष्यते। समाजस्वीकृतेन पथा मानवाः यदा यौनक्षुधां निवारयितुं न शक्नुवन्ति, तदा मानवानां जैविकताडनं मानवान् अन्यायमार्गं प्रति नयति। पुरुषाः यथा यौनक्षुधां चरितार्थयितुं स्वभार्यां विना अन्यनार्य्या सह सम्पर्कं स्थापयन्ति, तथैव नार्योऽन्नवस्त्रार्थं स्वशरीरं विक्रीणन्ति। एवं रूपेणानेनार्थिकविनिमयेन परस्परयोरेकोऽवैधयौनसम्पर्कः स्थापितो भवति। इदमेव गणिकावृत्तेरुद्योगात्मकरूपम्। कामाचार-गणिकावृत्तयोर्मध्ये भेदः परिलक्ष्यते। कामाचारे रतिसुखमेव मुख्यं किन्तु गणिकावृत्तावर्थोपार्जनमेव प्रधानम्। वात्स्यायनः 'कामसूत्रम्' इति ग्रन्थे चतुर्थाधिकरणे प्राह– ''**वैश्यानां पुरुषाधिगमे रतिवृत्तिश्च सर्गात्।**''

प्राचीनकालादेव तासां वाराङ्गनानां विषये समाजे तथा साहित्ये बहुशश्चिन्तनं प्रकटितम् आसीत्। अस्मिन् प्रबन्धे संस्कृतसाहित्ये वर्णितानां वाराङ्गनानाम् अवस्थानं निरूपयितुमिष्यते। संस्कृतस्य संस्कृतकाव्यप्रपञ्चस्य सुविपुले परिसरे पञ्चषाः काव्यान्युपजीव्य तत्र तत्र वर्णितं गणिकाजीवनप्रसङ्गोऽत्र संक्षेपेणालोच्यते मया। गणिकापरम्परेति पदेनायमर्थो बोध्यते यत् वैदिकसाहित्यात् प्रभृति निरवच्छिन्नत्वेन लौकिकसंस्कृतदृश्यकाव्यानां कालं यावत् (दशमशताब्द्यन्तं) गणिकासम्प्रदायस्य महती परम्परासीदिति।

## 2. गणिकाशब्दस्यार्थः

गणिकाशब्दः प्रायेण बहुजनभोग्या नारी इत्यस्मिन् अर्थे व्यवह्रियते। सामूहिकरूपेण याः नार्यः उद्योगत्वेन स्वशरीरम् अन्येषां यौनलिप्सां चरितार्थयितुं गच्छन्ति अथवा अर्थविनिमयेन अन्येभ्यः यौनतृप्तिं ददति, ताः गणिका इत्युच्यन्ते। गणिकाशब्दस्य बहवः पर्यायवाचकाः शब्दाः सन्ति, यथा 'वेश्या', 'रण्डी', 'वारस्त्री', 'क्षुद्रा', 'शूला', 'लज्जिका', 'बन्धुरा', 'कुम्भा', 'वर्व्वटी', 'भोग्या', 'भुजिष्या', 'पतिता', 'वाराङ्गना', 'देहापसारिणी', 'देहोपजीविनी', 'रक्षिता', 'वावरणिता', 'देवदासी', 'उपपत्नी', 'जारिणी', 'साधारणी', 'महानग्नी', 'अतीत्वरी', 'विजर्जरा', 'कुटला', 'स्वैरिणी', 'स्वतन्त्रा', 'स्वाधीनयौवना' चेति।

वात्स्यायनः स्वकीये 'कामसूत्रम्' इति ग्रन्थे त्रिविधानां गणिकानां[1] प्रसङ्गमुल्लिलेख, यथा एकपरिग्रहा, अनेकपरिग्रहा, अरिग्रहा चेति।

वात्स्यानेन गणिकाया नामान्तरविषये उक्तम् – **'कुम्भदासी परिचारिका कुलटा स्वैरिणी नटी शिल्पकारिका प्रकाशविनष्टा रूपाजीवा गणिका चेति वेश्याविशेषाः।'**[2] आचार्येण धनञ्जयेन स्वकीये 'दशरूपकम्' इति ग्रन्थस्य द्वितीयेऽध्याये गणिकाविषये उक्तम् – **'साधारणस्त्री गणिका कन्या प्रागल्भ्यधौर्तयुक्।'**[3] पुनः विश्वनाथकविराजः स्वकीये 'साहित्यदर्पणः' इति अलङ्कारग्रन्थे साधारणी-सामान्यभेदात् नायिका द्विविधेति उक्तवान् – **'धीरा कला प्रगल्भा स्याद्वेश्या सामान्यनायिका।'**[4]

साधारणतया गणिकाः रूप–यौवन–शिक्षासु अन्यनार्य्यपेक्षया श्रेष्ठाः भवन्ति।[5] ताश्च नार्यः अर्थकामुकाः सन्ति। यतो हि नायकानां सर्वं धनम् एताभिर्नारीभिः ह्रियते। स्पृश्याः कामयुक्ताश्च गणिकाः वृद्धावस्थायामपि वेश्यावृत्तेः स्वात्मानं न निवर्तयन्ति।

### 2.1. वैदिकसाहित्ये गणिकास्वरूपम्

भारतवर्षस्य प्राचीनतमे वैदिकसाहित्ये गणिकावाचकाः केचन शब्दाः समुपलभ्यन्ते। यथा ऋग्वेदे 'हस्रा' (1.124.7) 'अग्रू' (4.19.9), 'साधारणी' (1.176.4), 'व्रा' (1.124.8), 'नग्ना' (5.7.8), 'वेश्या' (5.6.8), शुक्लयजुर्वेदस्य वाजसनेयी-संहितायां 'व्रजयित्री' (30.1), 'पुंश्चली' (30.5), 'साधारणी' 'सामान्या' च (30.12), 'अतिवारी' (30.15), 'अतिष्कद्वरी' (30.15), कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायां नामद्वयं लभ्यते (3.47), तैत्तिरीयब्राह्मणे 'अपस्कद्वरी' (3.4.11.1) इति शब्दव्यवहारः गणिकार्थे परिलक्ष्यते।

पालिभाषायाः विनयपिटके मुत्थुत्तियां (संस्कृतमुहूर्तिक, 3.138) जातके च रूपदासी-वन्नदासी-वेश्यानारिषेर-गामनी-नगरशोभिनी-इत्थि-जनकल्याण्यादिशब्दानां गणिका-पर्यायवाचकत्वेन उल्लेखः अस्माभिः दृश्यते।

ऋग्वेदस्य प्रथममण्डलस्यैकस्मिन्नेव ऋषिः आमन्यते– **'सुबन्धवो ये विश्या इव व्रा अनस्वन्तः श्रव ऐषन्त प्रजाः।'**[6] इतिहासविद् विण्टरनित्स इत्यस्य मते, मन्त्रस्थात् विश्वाशब्दादेव वेश्याशब्दोत्पत्तिरिति।[7] ऋग्वेदे वेश्यावृत्तेः अस्तित्वविषये आम्नायते– **'परा शुभ्रा अयासो यव्या साधारण्येव मरुतो भिभिक्षुः।'**[8] ऋग्वेदे जारपतेः अवैधसन्तानस्य चर्चा कृतास्ति–

**सेनेव सृष्टामं दधात्यस्त्तर्न दिद्युत्त्वेप्रतीका।**

**यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम्॥**[9]

विवाहितया अन्यस्त्रिया सह यौनमेलनं तदानीन्तनकाले स्वीकृतमासीत्। विवाहितयोः पतिपत्न्योर्मध्ये पारस्परिको यौनविश्वासो रक्षितो भवेदित्येतदेव संहितायुगे आशासितम्। किन्तु विवाहितस्य स्त्रीलोकस्य प्रणयिना सह मेलनस्य प्रसङ्गोऽप्युल्लिखितः–**'अहं प्रजां अजनयं पृथिव्यामहं जनिभ्यो अपरीषु पुत्रान्।'**[10] न केवलम् ऋग्वेदे, अपि तु यजुर्वेदे आर्यशूद्रयोर्नरनारीणामवैधमेलनस्य प्रसङ्गोऽप्याम्नातः–**'शूद्रा यजर्यजारान पोषाय धनायति।'**[11]

### 2.2. आर्षमहाकाव्ययोः गणिकास्वरूपम्

पुराण–रामायण–महाभारतेषु बह्वीनां गणिकानां परिचयः उपलभ्यते, ताः **स्वर्गवेश्या** इति नाम्ना परिचिताः आसन्। यथा– उर्वशी, मेनका, तिलोत्तमा, घृताची, विश्वाची, पञ्जिकास्थला, मञ्जुघोषा, अलम्बुषा, सुप्रिया चेत्यादीनि प्रमुख्यनामानि। एताः स्वर्गवेश्याः **'अप्सरा'** इति उच्यन्ते। भरतो नाट्यशास्त्रे द्वात्रिंशदप्सरसामुल्लेखं कृतवान्।

रामचन्द्रस्याभिषेककाले वेश्यानामुपस्थितिरपि वाल्मीकेः 'रामायणम्' इति आर्षकाव्ये परिलक्षिता। ताः समृद्धानां जनानामवलम्बनं कृतवत्यः, दरिद्रान् परित्यजन्ति स्म।[12] महाभारते आरट्टदेशीयाः स्त्रियः वेश्या इति उक्ताः। वाह्लीकदेशस्यैकां सतीं आरट्टदस्यवः अहरन्। तस्माद् अभिशापबलाद् आरट्टदेशीयानां प्रत्येकस्मिन् परिवारे एकैका वेश्या जनिमलभत।[13] महाभारते बहूनि नारीचरित्राणि समुपलभ्यन्ते, याः बहुचारिण्यो बहुगामिन्यः आसन्। महाभारतस्यार्षकाव्यस्यादिपर्वणि दृश्यते यत् गान्धार्य्याः गर्भावस्थायां धृतराष्ट्रार्थं वेश्याः आहूताः –

**'गान्धार्यां क्लिश्यमानायामुदरेण विवर्धता।**

**धृतराष्ट्रं महाराजं वेश्या पर्यचरत्किल॥'**[14]

पुनश्च, उद्योगपर्वणि युधिष्ठिरः वेश्यानां कृते शुभाशयान् निवेदितवान्। एवञ्च कौरवराज्ये श्रीकृष्णस्यागमनावसरे वेश्याभिः अभिवादकरणमपि वर्णितम्।[15] अस्मिन्नेव पर्वणि कौरवपाण्डवयोः युद्धकाले पाण्डवानां सेनामण्डल्यां वेश्यानामुपस्थितिः अवर्तत।[16]

पुनश्च वात्स्यायनेन तस्य 'कामसूत्रम्' इति ग्रन्थस्य वैशिकाधिकरणस्य पञ्चमाध्याये त्रिविधानां वेश्यानामुल्लेखः कृतः– **'त्रिविधा वेश्या-गणिका रूपाजीवा कुम्भदासी च। ताः प्रत्येकमुत्तममध्यमाधमभेदास्त्रिविधाः।'**[17]

## 2.3. रूपकसाहित्ये गणिकायाः स्थानम्

प्राचीनसंस्कृतसाहित्यं पश्यामश्चेद् विविधेषु संस्कृतकाव्य-रूपकादिषु गणिकानां प्रसङ्गः उल्लिखितः। तत्रादौ कालिदासेन कुमारसम्भवे यथा पार्वत्याश्चित्राङ्कनं कृतमिति प्रमाणीभवति यत् महाकविः स्वयमेव तस्याः कल्पिताया नायिकायास्तथा तत्समृद्धयौनतायाश्च प्रसङ्गेऽवहितो बभूव। कालिदासः साक्षादेव गणिकाजीवनमवलम्ब्य काव्यान्यरचयत्।

'मेघदूत'स्य पूर्वमेघे तदानीं नगरस्थानां वेश्यानां यौनाचारस्य चित्रं प्रस्फुटितम्।[18] अस्य ग्रन्थस्य पञ्चत्रिंशत्तमे श्लोके मन्दिरगणिकानां वर्णनपुरस्सरमुज्जयिनीनगरस्य देवदासीनामवस्था समुद्धृता। कालिदासकालात् प्रागेव भारतवर्षे देवदासीनामस्तित्वत्वमवर्तत।

अष्टमशतके नवमशतके वा दामोदरगुप्तविरचिते 'कुट्टनीमत'मिति काव्ये वाराणसीनगर्याः पटभूमिकायां प्राचीनभारतीयगणिकासमाजस्य साङ्गोपाङ्गं विवरणमस्ति। इह ग्रन्थे गणिकाया मालत्याश्चरित्रमपि वयं विस्तरशो ज्ञातुं शक्नुमः। तस्मिन् पतितालये वृद्धाया गणिकाया उक्तिषु गणिकाजीवनस्य दुरवस्था वर्णिता। तत्र मालती नाम्नी काचिद्गणिका अवर्तत। सा गणिकावृत्तेरुपदेशलाभाय विकरवालानामिकायाः वृद्धायाः सकाशं जगाम। तया विकरवालया समुपदिष्टं सर्वं तथ्यजातं ग्रन्थस्यास्य विषयमूलम्।

भासरचिते 'चारुदत्तम्' इति नाट्ये द्वयोर्गणिकयोर्विवाहकथोल्लिखिता। एकत्र ब्राह्मणेन चारुदत्तेन समं गणिकायाः वसन्तसेनायास्तथा चान्यत्र ब्राह्मणशर्विलकेन सह गणिकायाः मदनिकायाः अवैधसम्बन्धः सुचारुतया वर्णितः। परम् अत्रोल्लेख्यं यदत्र आर्थिकसम्बन्धो न हि मुख्यः। उभयत्र सम्बन्धे स्निग्धप्रेमैव काशितं नाट्यकृता।

आसीत् कालिदासस्य 'विक्रमोर्वशीय'मिति नाटके नायिका उर्वशी एका सुपरिचिता गणिका। सा खलु स्वर्गस्था अप्सराः तस्याः सखी अपि तादृशी गणिकासीत्। अस्मिन्

नाटके महाकविकालिदासो याम् उर्वशीं नायिकात्वेनोपस्थापितवान्, सैका बहुभोग्या वेश्या रमणी आसीत्।

शूद्रकविरचिते 'मृच्छकटिकम्' इति प्रकरणे नायकस्य चारुदत्तस्य साधारणी स्त्री आसीदेव। तथापि सोऽभूद् वसन्तसेनायामत्यासक्तः। अस्मिन् प्रकरणे गणिका वसन्तसेना स्वस्याः वैभवपूर्णजीवनविधानार्थं परिचितासीत्। शूद्रको मृच्छकटिके प्रकरणे गणिकाया वसन्तसेनायाश्चरित्रम् उज्ज्वलरूपेणोपस्थाप्य राजवध्वाः पदमर्यादां ददौ। एतन्न केवलं संस्कृतसाहित्येऽपि तु विश्वस्य सर्वेषु प्राचीनसाहित्येषु विरलमेवासीत्। मृच्छकटिकस्य चतुर्थाङ्के वसन्तसेनाया गृहवर्णनमुपलभ्यते। विदूषकेणोक्तम् **'...सत्यं खलु नन्दनवनमिव मे गणिकागृहं प्रतिभासते।'**[19] विदूषकस्य अनयोक्त्यास्माभिः वसन्तसेनायाः वैभवपूर्ण-जीवनमनुमातुं शक्यते।

भारते विशेषतया मौर्ययुगे तत्परवर्तिनि बौद्धयुगे च तक्षशिलायाम्, उज्जयिन्यां, वैशाल्यां, पाटलीपुत्रे च प्रशिक्षणप्राप्ताः बह्व्यः विषकन्याः आसन्। एतासां प्रसिद्धिः अखिलभारते आसीत्। इदानीन्तनकाले शत्रुभयकारणात् नेतृ-मन्त्रिणश्च च देहरक्षिभिः गमनागमनं कुर्वन्ति, तथैव तत्कालीना राजानः विषकन्यानां भीतिकारणात् विषवैद्येन सह बहिरागमनमकुर्वन्। कौटिल्यः अर्थशास्त्रस्य प्रथमखण्डस्यैकविंशतितमस्याध्यायस्याष्टा दशतमे प्रकरणे राज्ञः आत्मरक्षणविषयं तथा निरापत्ताविधानञ्चोल्लिखितवान्।

विशाखदत्तस्य 'मुद्राराक्षसम्' इति नाटकस्य प्रथमद्वितीयाङ्कयोरेकस्याः विषकन्यायाः कथास्ति। सा विषकन्या नन्दराजस्य मन्त्रिणा राक्षसेन मौर्यसम्राजः चन्द्रगुप्तस्य हननार्थं नियुक्तासीत्। एवञ्च आयुर्वेदकृतः सुश्रुतस्य सुश्रुतसंहितायां (1/6) तस्याः विषकन्यायाः उल्लेखः वर्तते। विषयकन्यया सह यौनसंसर्गेण पुरुषः क्षणाभ्यन्तरे म्रियते। विषकन्याः स्वशरीरस्योपभोगनिमित्तं परपुरुषान् प्रलोभयन्ति स्म। तेनैव ताः स्वकार्यसिद्धिं चक्रुः। तस्मात् ते गणिकानार्यः इत्युच्यन्ते। अपि च, (चतुर्थ-पञ्चमशताब्द्योः) तात्कालिकगणिकाभिः नृप-साधारणनागरिकयोरासीत् सम्बन्ध इति परिज्ञायते।

भवभूतेः 'मालतीमाधव'मिति रूपके माधवनामा एको ब्राह्मणः सिंहले व्यापारं कृत्वा धनिकोऽभवत्। अनन्तरं कुवलयावतीनाम्न्यां सुन्दर्यां वारवनितायामासक्तः सन् निर्धनो जातः। ततः परं तस्याः नासिका-कर्णोच्छेदनं कृत्वा अन्यतमां प्रेमिकां मालतीं समागच्छत्। अपि च, कुवलयावतीनामिकायाः सुन्दर्याः गणिकायाः परिचयो लभ्यते। सा गणिका छलेन ब्राह्मणमाधवस्य सर्वं धनं लुण्ठितवती।

भाणजातीयं साहित्यं मूलतया गणिकानिर्भरम्। स्वाभाविकतया 'चतुर्भाण्यां' प्रियङ्गुषष्टिका,

वारुणिका, चतुरिका, रतिसेना, सुनन्दा, मदनसेना चेत्यादिगणिकानां चरित्रमुपवर्णितम्। एवञ्च चतुर्भाणी[20] इति भाणजातीये रूपके वेश्यायाः पर्यायवाचकाः शब्दाः परिदृश्यन्ते, यथा 'पुंश्चली', 'कामिनी', 'बन्धकी', 'वेशयुवतीगणिका', 'वेश्या', 'वेशवधूः', 'मदनदूती', 'चेटिका', 'शम्भली', 'वेशकन्यका', 'पताकायोग्या', 'दासी', 'वारस्त्री','कुट्टनी' चेति।

**3. उपसंहारः**

गणिकाश्रेणीया रमण्यो मादृशरक्तमांसैर्निर्मिता मनुष्या इव। अस्मिन् समाजे सुदीर्घकालं यावत्ताः हीनजातिरूपेण जीवन्ति। गणिकाविषये विविधकालेषु विविधभाषासाहित्येषु बहवो ग्रन्थाः रचिता। तेषु ग्रन्थेषु तासां जीवनवैचित्र्य-सामाजिकावस्थान-सामाजिकावक्षया उद्धृताः। अस्माभिः गणिकानां समाजदृष्ट्या हीनास्पदं, घृण्यम्, अस्वच्छं, कुत्सितं, जीवनयापनं व्यक्तीकृतम्। बहुषु क्षेत्रेषु समाजस्य सन्दूषणकरणे गणिकानामुपरि दोषारोपः क्रियते। किन्तु एताः गणिका अपि मनुष्या इति भाव्यम्। तास्वपि मनुष्यत्वं, जीवनपीडा, व्यथा, वेदना, सांसारिकी आकाङ्क्षा, अन्यबालिकावत् स्वाभाविकजीवनयापनस्याधिकारः, स्वप्रदर्शनाधिकारश्चेति विद्यन्ते। एते विषयाः प्राचां साहित्यिकानां रचनायां प्रायो न प्राधान्यं लभन्ते।

*

**सन्दर्भाः–**


1. 'त्रिविधा वेश्या एकपरिग्रहा अनेकपरिग्रहा अपरिग्रहा चेति' (कामसूत्रम्, वैशिकाधिकरणम्, प्रथमं वृत्तम्)
2. तदेव, सूत्रम् 3.5.27
3. दशरूपकम्, 2.11
4. साहित्यदर्पणः (वृत्तिः)
5. कामसूत्रम्, 1.3.2
6. ऋग्वेदः (वैदिकसंशोधनमण्डलम्), 1.128.5
7. पतितावृत्तिर उत्स सन्धाने, रावा चक्रवर्ती लिटलम्याग आनएडिटेड, 25 अप्रैल 1999
8. ऋग्वेदः, 1.167.4
9. तदेव, 1.66.4
10. तदेव, 10.183.3
11. तैत्तिरीयसंहिता, 7.4.19.3
12. रामायणम्, 3.15.5
13. महाभारतम्, 8.30.57-59
14. तदेव, 115.39
15. तदेव, (उद्योगपर्व, 30.38,86.15)
16. तदेव, 151.58
17. कामसूत्रम्, 28 वृतिः
18. मेघदूतम्, (पूर्वमेघः), 26
19. मृच्छकटिकम्, (चतुर्थोऽङ्कः)
20. संस्कृत साहित्य सम्भार (16 खण्डः), पृ.249


*

# निम्बार्कवेदान्ते मोक्षस्वरूपविमर्शः

**डॉ. रुम्पा सरकार**

सर्वप्रथमं भगवता हंसस्वरूपेण अस्य सम्प्रदायस्य सिद्धान्ताः सनकादीनुद्दिश्य 'पुनश्चोपदिष्टानां मतानामुपदेशः सनकादिना कुमारं प्रति कृतः, कुमारान्नारदः, नारदोऽपि मतमिदं निम्बार्काचार्यमुपदिदेश।'[1] अत एवाऽयं हंससम्प्रदायस्तथा निम्बार्कसम्प्रदाय इति द्वाभ्यां नामाभ्यां प्रसिद्धिमगात्। निम्बार्काचार्यो हि भगवतो नारायणस्य सुदर्शनचक्रावताररूपेण लोकमान्यतां लेभे। अस्य महापुरुषस्य पिता अरुणमुनिः, जननी च जयन्ती देवी आसीत्। कस्यचिन्मतेऽस्य पितरौ सरस्वतीजगन्नाथौ बभूवतुः। आचार्योऽयं निम्बापुरीयो वा निम्बियो वा नैदुर्यपत्तनीयो वा तैलङ्गीयब्राह्मणो बभूव। डॉ. भण्डारकरमतानुसारेण अस्य तिरोभावकालः द्विषष्टितमाऽधिकैकादशशतखीष्टाब्दः (1162 खीष्टाब्दः) अत एव तदीयस्थितिकालोऽपि द्वादशशताब्द्याः प्रथमभागेन भवितव्यमिति निर्णयस्य परिपाटी। निम्बार्काचार्यो महान् वैदुष्यसम्पन्नः, तत्रालौकिकप्रतिभाऽसीत्। श्रूयते यदेकसमये स्वशक्त्या निम्बवृक्षोपरिभागेऽस्तमपि सूर्यनारायणं संन्यासिनमेकं दर्शितवानाचार्यस्तेन निम्बार्काचार्यनाम्नैव लोके ख्यातिं लब्धवान् इति नाभादासरचितभक्तमालग्रन्थादध्यवसीयते।

निम्बार्काचार्या ब्रह्मजीवयोर्मध्ये द्वैताऽद्वैत(भेदाऽभेद)पक्षं समर्थयन्ति। तन्मते जीवो ह्यवस्थाभेदेन ब्रह्मणा साकं भिन्नोऽभिन्नश्च भवति। भारतीयदर्शनपरम्परायां विचारोऽयमतीव प्राचीनकालाद् गङ्गाऽदिधारावत् प्रभवति। नह्याचार्यशङ्कराद् अपितु महर्षिबादरायणात् प्राक्कालेऽपि भेदाऽभेदसिद्धान्तपोषका बहव आचार्या आसन्निति ब्रह्मसूत्रेषूल्लेखाज्ज्ञायते, तत्राचार्यौडुलोमिस्तथाऽऽश्मथ्यः एतावुभावपि द्वैताऽद्वैतसिद्धान्तसमर्थककोटौ मुख्येन परिगणितौ बादरायणाऽऽचार्येण ब्रह्मसूत्रे। अनयोश्च मध्ये औडुलोमिमते किलाऽवस्थाविशेषेण जीव-ब्रह्मणोर्भिन्नत्वाभिन्नत्वञ्च सिध्यति। संसारदशायां हि नानास्वरूपवत्सु जीवेषु 'एकाऽत्मक-ब्रह्मस्वरूपे च भिन्नता स्वाभाविकरूपेण वर्तते, किन्तु मुक्तिदशायां तयोर्जीवब्रह्मणोश्चैतन्याऽत्मना विद्यमानेन सर्वथाऽभेदः प्रकाशते।'[2] आचार्याऽश्मरथ्यीयसिद्धान्तोऽयं यत् कारणात्मना जीवब्रह्मणोरैक्येऽपि कार्यात्मना हि तयोर्मध्ये चैतन्याऽतिरिक्ताभ्यां जीवत्वेश्वरत्वाभ्यां

क्षुद्रत्वबृहत्त्वाभ्यां सर्वज्ञत्वाल्पज्ञत्वाभ्याञ्च परस्परविरुद्धविविधधर्माभ्यां सुतरामनयोर्भेदः इयञ्चाऽवस्था कार्यात्मिका संसारदशाऽपन्नजीवब्रह्मस्वरूपमाश्रित्य वर्णिता भवितुमर्हति। कार्याऽत्मना खल्वनयोरनेकरूपत्वं मुक्तिदशायाञ्चाऽनयोरभिन्नत्वमेतादृशमेव यादृशं च सुवर्णस्य कारणाऽवस्थायामेकस्वरूपत्वम्, तथा कार्यस्वरूपायां कटककुण्डलाऽदिरूपेण विविधाऽऽकारनामादिधारणदशायां विभिन्नता, स्वाभाविकरूपेणैवाऽविर्भवति। निम्बार्कमते जीवात्मा परमात्मा जडस्वरूपा प्रकृतिरिति रामानुजसिद्धान्ततुल्यं त्रिविधं तत्त्वं विद्यते, यतोऽस्यैव चिदचिदीश्वरनाम्ना विशिष्टाऽद्वैतसिद्धान्ते वर्णना मिलति। तत्र चित्पदवाच्यो जीवः, '**एषोऽणुरात्मा चेतसा वेदितव्यः**'[3] इत्यादि श्रुत्यनुसारेण निम्बार्कमताऽनुयायिनो जीवस्याणुपरिमाणत्वं स्वीकुर्वन्ति। प्रतिशरीरं जीवानां भिन्नत्वम्, अतो हि तदीयसुखदुःखादीनां वैचित्र्यव्यवस्थायाः समाधानं निष्कटतयोपपन्नं भवति। अयञ्चानन्तो गुणमय्या मायया बद्धश्च ज्ञानाऽऽश्रयोऽपि ज्ञानस्वरूपः, अत एवात्र ज्ञानप्रकाशकमिन्द्रियं विनापि ज्ञानस्य विरहात्मता नैव सिध्येत्। अर्थात् चित्पदवाच्यो जीवो ज्ञानस्वरूपः, तदीयस्वरूपो ज्ञानमयः। इन्द्रियसहाय्यं विनैव इन्द्रियनिरपेक्षविषयकज्ञानाऽवाप्तौ समर्थः, तथा '**प्रज्ञानघनः**'[4] '**न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः**'[5] इत्यादि-श्रुतिद्वारा ज्ञानात्मकस्य जीवस्वरूपस्यैव प्रकाशो जायते। ज्ञानाऽऽश्रयत्वेन ज्ञातृत्वमप्यस्य घटते। अतो 'जीवस्यैककालाऽवच्छेदेन ज्ञानस्वरूपता, ज्ञानाऽश्रयताख्यज्ञातृता च सिध्यति।'[6] यथा सूर्यः प्रकाशस्वरूपोऽपि प्रकाशाऽश्रयः, यथा वा मणिः स्वरूपद्वयविशिष्टः, तद्वज्जीवस्याऽप्युभयरूपत्वे न काऽप्यनुपपत्तिः। जीवस्य स्वरूपभूतं ज्ञानं, तथा गुणभूतञ्च ज्ञानं यद्यपि ज्ञानाऽऽकारत्वेन अभिन्नस्वरूपतां भजति, तथाप्यनयोर्धर्मधर्मिभावेन भिन्नता सिद्धत्येव। जीवस्य कर्तृत्वं निराबाधमेव, यतः संसारदशायां तत्त्वं तु तस्य सर्वैरनुभूयते, मुक्तिदशायान्तु तत्र कर्तृत्वस्य सत्त्वं श्रुतिप्रतिपादितं भवति। '**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः**'[7] '**स्वर्गकामो यजेत**'[8] इत्यादिश्रुतयो यथा संसारदशायां तावदात्मनि कर्तृत्वं प्रतिपादयन्ति, तथैव 'मुमुक्षुर्ब्रह्मोपासीत' '**शान्त उपासीत**'[9] इत्यादयः श्रुतयो मुक्तावस्थायामप्युपासनायाः प्रतिपादकत्वेन मुक्ताऽत्मनोरपि कर्तृत्वं बोधयन्ति।[10] किञ्च जीवः स्वीयज्ञानभोगप्राप्तये परमेश्वराश्रित एव न तु स्वतन्त्रः। तेन चैतन्यात्मकत्वेन, ज्ञानाऽऽधारतया च परमेश्वरतौल्येऽपि, जीवे खल्वेको ब्रह्मव्यावर्तको धर्मो भवति नियम्यत्वरूपः, परमेश्वरे च नियामकत्वरूपः, तेनैव जीवः सर्वास्वप्यवस्थासु परमेश्वरनियम्य एव भवितुमर्हति परमेश्वरपरतन्त्रश्च, परमेश्वरस्तु सर्वदैव स्वतन्त्रः स्वेच्छया जीवनियामकश्च, अतो मुक्तिदशाऽपन्नस्यापि जीवस्य परमेश्वरनियम्यतया तदधीनत्वं स्वाभाविकमेव परमेश्वरस्यापि

नियामकता निमित्ताऽनपेक्षत्वेन नित्या, एवं स्वातन्त्र्यादिधर्मोऽपि निरङ्कुश एवेति मन्तव्यम्। यत्तूक्तं जीवस्याणुपरिमाणत्वं, तत्रत्यं तत्त्वमित्थं वेदितव्यम्– जीवो हि हरेरंशः, नात्रांशो नामाऽवयवः, किन्तु कौस्तुभग्रन्थाऽनुसारेण खल्वंशः शक्तिस्वरूपः, उक्तञ्च **'अंशो हि शक्तिरूपो ग्राह्यः'**[11] सर्वशक्तिमत्तया परमेश्वरस्यांशित्वं, जीवो हि शक्तिमत्तया परमेश्वरांशः। अघटनघटनापटीयस्या गुणमय्या प्रकृतिस्वरूपिण्या माययाऽवृतत्वाद् जीवस्य धर्मरूपज्ञानं संकुचितं भवति। भगवत्कृपया च 'जीवस्य शुद्धस्वरूपस्य विज्ञानमुत्पद्यते'[12] मुमुक्षुबुभुक्षुभ्याञ्च जीवानां द्वैविध्यं सिध्यति। तत्र बुभुक्षुः नाम विषयाऽऽनन्देच्छुश्च, मोक्षेच्छु मुमुक्षुपदार्थार्थः।

मुक्तजीवस्य द्विविधो भेदो भवति – 'अनन्ताऽदिभगवत्पार्षदरूपेण नित्यमुक्तः यो हि पूर्वकालिकबन्धसम्पृक्तत्वेऽपि तदनन्तरकालिकबन्धाभाववान् भवति स मुक्तोऽपर उक्तः। इत्थञ्च मुक्तनित्यमुक्तभेदेन मुक्तस्य द्वैविध्यमुक्तं भवति।' अध्यात्मसुधातरङ्गिण्यामपि जीवानां त्रैविध्यं प्रमाणपुरस्सरं वर्णितमस्ति। तथा हि– नित्यमुक्ता बद्धमुक्ता बद्धाश्चेत्युद्देशाः तानेवोद्दिष्टान् तावल्लक्षणप्रमाणाभ्यां श्रुतिमुखेन विवेचयन्नादौ नित्यमुक्तं लक्षणमाह– 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' इत्यादिश्रुतिप्रमाणेन त्रैकालिकसंसारदुःखसामान्या-ऽत्यन्ताऽभावत्वे सति सदैव स्वभावतो भवदनुभाविततत्स्वरूपगुणाऽदिविषयकाऽनुभवानन्दवत्त्वं नित्यमुक्तलक्षणम्। बद्धमुक्तेष्वतिप्रसङ्गवारणाय नित्यमुक्तलक्षणकुक्षौ 'त्रैकालिक' इति, समाधिनिष्ठेष्वतिप्रसङ्गवारणाय 'सदैव स्वभावतः' इति, श्रीपुरुषोत्तमेऽतिप्रसङ्गवारणाय 'भगवदनुभाविते'त्यादिपदसन्निवेशः, तथैव श्रुतावपि पदसंग्रहप्रयोजनमनुसन्धेयम्।

बद्धमुक्तलक्षणं तरङ्गिण्यनुसारेणोच्यते– 'जहात्येनां भुक्तभोगामजोऽन्यः'[13] इत्यादिश्रुतिः 'अनादिकमात्मिकाऽविद्याकृतप्रकृतिसम्बन्धतत्कार्यदुःखादि तत्साधनदेहादिरूपबन्धविनिर्मुक्ता इति तेऽपि द्विविधे विश्वात्मभगवद्भावाऽपन्ने एके।' अपरे तु प्रत्यक्स्वरूपाऽपन्ना बद्धजीवमधिकृत्य विमृश्यते– **'अजो ह्येको जुषमाणोऽनुशेते'**[14] इति सनातनी श्रुतिः खलु बद्धान् जीवस्वरूपान् प्रकाशयति, तदनुसारेण हि-अनादिकर्मजन्यतिर्यङ्मनुष्यादि-देहतत्सम्बन्धवत्सु आत्मात्मीयाभिमानवन्तो बद्धा उच्यन्ते, तेऽपि द्विविधाः मुमुक्षवो बुभुक्षवश्चेति, तत्र 'मुमुक्षु वै शरणमहं प्रपद्ये' इति श्रुतेराध्यात्मिकाऽदिविविधसांसारिक-दुःखानुभवजातक्लेशान्निर्विण्णस्ततो मोक्षमिच्छवो मुमुक्षुवः। तेऽपि द्विविधाः तत्रैके भवगद्भावाऽपत्तिकामाः, उक्तञ्चाऽत्र विषये गीतायाम् –

**मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।**
**कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥**[15]

स्वरूपाऽपत्तिकामाश्चाऽन्ये मुमुक्षवो भवन्ति। **'स्वेन रूपेणाऽभिनिष्पद्यते'**[16] इति

श्रुतिस्तत्र प्रमाणम् । बुभुक्षवश्च वैषयिकभोगेच्छवो हि ते भवन्ति। बद्धा अपि द्विविधाः, तत्रैके भाविश्रेयस्काः, तद्भिन्नाश्च नित्यसांसारिकाः, किन्तु तेषां बन्धमोक्षार्हताख्या योग्यता शास्त्रप्रमाणेनैव विज्ञायते, पराभिधानात्तु तिरोहितं ततोऽस्य बन्धविपर्ययाविति न्यायात्।

श्रीनिम्बार्कमतानुसारेण वेदान्तशास्त्रफलं भगवद्भावापत्तिरूपं मोक्षस्वरूपं निरूप्यते। यथा– **'तद्भावापत्तिलक्षणं श्रेयः प्रयोजनम्।'**[17] भगवद्भावापत्तिलक्षणं श्रेयः प्रयोजनमिति। तदपि मोक्षो नाम। **'भगवद्भावमाप्नोति पुनरावृत्तिवर्जितः।'**[18] भगवद्भावमाप्नोति मोक्षं प्राप्नोतीत्यर्थः।

**अयं हि सर्वकल्पानां सध्रीचीनो मतो मम।**
**मद्भावः सर्वभूतेषु मनोवाक्कायवृत्तिभिः॥**[19]
**नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात्।**
**स्पर्धासूयातिरस्काराः साहङ्कारा वियन्ति हि॥**[20]
**सर्वभूतेषु मद्भावो मद्भक्तिं विन्दते दृढाम्॥**[21]
**अन्तकाले च मामेव स्मरन् मुक्त्वा कलेवरम्॥**
**यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥**[22]

भावपदं च श्रीमुखेन स्वयमेव व्याख्यातं भगवता श्रीपुरुषोत्तमेन। अथ तत्प्राप्तिमार्गं निर्दिश्यति –

**अर्चिरादिकया गत्या प्राप्य विष्णोः परं पदम्।**
**भगवद्भावमापन्नो मोदते तेन सर्वदा॥**[23]

जीवोऽर्चिरादिकेन मार्गेण परं सम्पद्यस्वाभाविकेन रूपेणाविर्भवतीति परं ज्योतीरूपं सम्पद्य स्वेन रूपेणाभिनिष्पद्यते इति वाक्येन प्रतिपाद्यते स्वेनेति शब्दात्। जन्मादिविकारशून्यं स्वाभाविकाऽचिन्त्याऽन्तगुणसागरं सविभूतिकं ब्रह्मैव मुक्तोऽनुभवति। तथाहि मुक्तस्थितिमाह श्रुतिः– 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दतेऽथ सोऽभयं गतो भवति रसो वै सः, रसं ह्येवायं लब्ध्वा आनन्दीभवति इत्यादिका।'[24] श्रुत्यर्थस्तु यदा यस्मिन् भगवन्निर्हेतुककृपाकटाक्षसमये एषोऽनन्यशरणो विद्वान् एतस्मिन् भगवति श्रीपुरुषोत्तमे अभयं यथा स्यात् तथा प्रतिष्ठाम् = अव्यभिचरितनिष्ठां तत्कृपयैव विन्दते लभते, अथ = अनन्तरमेवाभयं गतो भवति भयकारणान्यनिष्ठाभावात्। किम्भूते? दृश्ये जडवर्गः तद्विलक्षणे आत्मना समूह आत्म्यं क्षराक्षरजातीये। पुनश्च अनिरुक्ते। इयत्तावच्छिन्नविषयकशब्दानुदिते।

पुनश्च अनिलयने अनाधारे अनन्ताचिन्त्यशक्तिमतीत्यर्थः। विद्वान् रसं लब्ध्वैव पूर्णानन्दमानन्दमयं भगवन्तं श्रीपुरुषोत्तमं प्राप्यैव आनन्दी = आनन्दवान् भवति। **'तद्भावापत्तिलक्षणमोक्षोपदेशात्।'**[25] विद्याप्राप्तौ पापपुण्ये अप्रवृत्तफले एव क्षीयेते। कुतः तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये इति शरीरपातावधिश्रवणात्।[26] विद्वान् आरब्धकार्ये तु सुकृतदुष्कृते भोगेन क्षपयित्वा ब्रह्म सम्पद्यते। तदमृतत्वं देहसम्बन्धमदग्ध्वैव बोध्यम्।

'कुतः? तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये इति आविमुक्तेः संसारव्यपदेशात्। पुण्यस्य काम्यकर्मणोऽपि अघवन्मुक्तिविरोधित्वाद् स उत्तरस्याश्लेष-पूर्वस्य निशा एव, उत्तरपूर्वयोराश्लेषविनाशानन्तरं देहपाते सति मुक्तिरेव।'[27]

तत्त्वमसीति मुमुक्षोः कारणात्मकत्वानुसन्धानमुपदिश्य 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये'[28] इति ब्रह्मभावापत्तिलक्षणमोक्ष उपदिश्यते। मुमुक्षुर्यावच्छरीरान्न विमोक्ष्यते प्रारब्धकर्मफलभोगप्रतिबन्धात् तावदेवास्य मुमुक्षोः चिरं भवति भुक्ते तु कर्मफले प्रतिबन्धाभावादयं ब्रह्मभावं सम्पत्स्ये। विमोक्ष्ये सम्पत्स्ये इत्युभयत्रोत्तमपुरुषप्रयोगः प्रथमपुरुषे छान्दसत्वाज्ज्ञेयः।

प्रकृते तु उक्तलक्षणं ब्रह्म तत्पदवाच्यम्। तस्य शक्त्यपरपर्यायांशभूत उक्तलक्षणो जीवस्त्वम्पदार्थः। तत्र चांशाशिनोः सर्वलोकवेदप्रसिद्धगुणगुणिवद्भेदाभेदः सम्बन्धः।

तत्र स्वरूपेण जीवस्य ब्रह्मभिन्नत्वेऽपि पृथक्स्थितप्रवृत्त्यभावाद् ब्रह्माभिन्नत्वम्। तस्यानादिमायावृतत्वात् तादृशाभेदज्ञानं नास्ति। तत्रोच्यते– तत्त्वमसीति तत्पदार्थादभिन्नोऽ-सीत्यर्थः। मोक्षावस्थायामपि भिन्नस्वरूप एव ब्रह्मभावापन्नः तदतिरिक्तस्थितिप्रवृत्त्यभावात् तदभिन्नो ज्ञेयः। 'विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति'[29] इति श्रुत्या गम्यगन्तृभावावगमात्। 'रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति'[30] इति श्रुत्या परमात्मनो लब्धव्यत्वेन जीवस्य लब्धत्वेन भेदव्यपदेशः, न हि लब्धैव लब्धव्यो भवति। 'जीवब्रह्मणोः स्वरूपतो हि भेदोऽन्यथा गुणसाङ्कर्यापत्तिः।'[31] पुरुषार्थः प्रयोजनं ब्रह्मभावापत्तिः, अतो विद्यातो भवति कुतः? शब्दात् 'तरति शोकमात्मवित्।'[32] 'ब्रह्मविदाप्नोति परम्'।[33] सम्प्रति मोक्षावस्थायां जीवब्रह्मणोर्भेदं दर्शयति। मुक्तः परस्मादात्मानं भागाविरोधिना-ऽविभागेनानुभवति। ब्रह्मोपासकस्य शरीरवियोगकाले सर्वकर्मक्षयेऽपि पन्था उपपन्नः। कुतः? 'परं ज्योतीरूपं सम्पद्य स्वेन रूपेणाभिनिष्पद्यते, स तत्र पर्येति जक्षन् = क्रीडन् रममाणः।'[34] इत्यादिषु देहादिसम्बन्धलक्षणार्थोपलब्धेः। 'यथा भूपसेवकस्य भौमार्थसिद्धि-स्तद्वत्। स स्थूलशरीरमनुवर्त्तते तद्वियोगान्तरं युक्तं श्रुतिप्रोक्तं रूपं विद्वान् प्राप्य ब्रह्मभावापन्नो

भवतीति भावः।'[35] मुक्तैश्वर्यं किं जगत्सृष्ट्यादिव्यापाररूपमुत परमात्मस्वरूपगुणाद्यनुभवरूपमिति संशये किं तावद्युक्तम्? साम्यश्रुतेर्जगत्सृष्ट्यादिव्यापाररूपमिति प्राप्य आह– 'जगत्। मुक्तस्यैश्वर्यं जगत्सृष्टिस्थितिनियमनरूपव्यापारेतरं भवितुमर्हति। कुतः? प्रकरणात्। 'सृष्ट्यादिनिर्णयेषु सर्वत्र परस्यैव प्रकृतत्वात्।'[36]

पूर्वोक्तब्रह्मभावाद् अपहतपाप्मत्वादिगुणाष्टकसम्पन्नविज्ञानस्वरूपाविर्भावादविरोधं मोक्षस्वरूपं भगवान् बादरायणो उपन्यासात् मन्यते। प्रजापतिवाक्येऽपहतपाप्मत्वादीनामपि विज्ञानघनस्वरूप एव मुक्तजीव उपन्यासात् प्रतिपादनात्। अपहतपाप्मत्वादिसम्पन्नज्ञानघनीभूतस्वरूपाविर्भावपूर्वकत्वे सति श्रीभगवत्स्वरूपगुणादिविषयकाऽनवच्छिन्नानुभूत्या स्थितिर्मोक्षः इति श्रीसूत्रकारसिद्धान्तः। एवं च न केनापि वाक्येन विरोधः। तथा हि–परं ज्योतीरूपसमपद्य इति वाक्यं यावदात्मवृत्त्यनवच्छिन्नब्रह्मानुभवितृत्वं ब्रह्मभावपदार्थं वदति। परं ज्योतिः शब्दाभिधेयं परब्रह्मभूतं श्रीपुरुषोत्तममुपसम्पद्य साक्षात् स्वात्मत्वेनानुभूय स्वेन रूपेण तत्स्वरूपगुणादिविषयकानवच्छन्नानुभवितृत्वरूपेण तदात्मकतयाऽवतिष्ठते इति श्रुत्यर्थः। निरञ्जनः परमं साम्यमुपैति इत्यत्र परमं साम्यं भावपदेनाभिधीयते। परमसाम्यं च स्वरूपेण गुणादिना च सादृश्यम्।

तथा च ज्ञानस्वरूपत्वात् स्वरूपसादृश्यम् अपरिच्छिन्नज्ञानधर्मकत्वाद् गुणसादृश्यं च। तत्त्वं नाम तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। नियन्तृत्वस्वातन्त्र्यवत्त्वाभावेन ब्रह्मभिन्नत्वे सति सार्वज्ञाद्यपहतपाप्मत्वादिभूयाब्रह्मगतधर्मवत्त्वाल्लक्षणसमन्वयः।

**'नारायणे सायुज्यमाप्नोति।'**[37] सह युज्यते इति सयुक् सयुजो भावः सायुज्यम्। नित्यसम्बन्ध इत्यर्थः। भगवता सह नित्यसम्बन्धोऽत्र। भावपदार्थः।[38]

**सततं कीर्त्तयन्तो मां यतन्तश्च दृढव्रताः।**
**नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते॥**[39]
**मच्चित्ता तद्गतप्राणा बोधयन्तः परस्परम्।**
**कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥**[40]

प्रवेशोऽत्र स्वयं चेतनाचेतनात्मकविश्वस्य च ब्रह्मात्मकानुभवपूर्वकविश्वरूपे भगवति तच्छक्त्यात्मनाऽवस्थानम्। तत्त्वं च श्रीपार्थसारथिना दर्शितमर्जुनाय, येन तथैवानुभूय विस्तरेणोक्तम् -

**पश्यामि देवांस्तव देव! देहे सर्वांस्तथाभूतविशेषसङ्घान्।**
**ब्रह्मणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान्॥**[41]

इत्यादिना विश्वरूपब्रह्मणः श्रीपुरुषोत्तमस्य विश्वात्मत्वेन विश्वजगतोऽधिकरणत्वात् विश्वं जगत् तत्रावतिष्ठते शक्त्यात्मना। परापरात्मकशक्तिरूपत्वाच्च निर्विवादः। तथा च गीयते–

**अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।**
**जीवभूतां महाबाहो ययेदं धार्यते जगत्॥**[42]

तथैव सर्वाधिकाररूपाश्शक्तयस्तस्यैव तत्र तिष्ठन्ति सृष्टिसमये तत्तदधिकारार्हाणां ब्राह्मरौद्रादिपदारोहणयोग्यानां तत्तज्जगत्स्रष्टृसंहर्तृत्वादिशक्तिभिर्युनक्ति। प्रलये च तान् विश्वाधिकारिणस्ताभिर्वियुनक्ति।

परन्तु सर्वावस्थानस्य सर्वादिकत्वाविशेष एव, तथा मुक्तानामपि विश्वरूपे भगवति तदात्मकतयाऽऽवस्थानमविरुद्धम्। स एव भगवद्भावापत्तिलक्षणमोक्षः सायुज्यादि-शब्देनोच्यते।

**मुकुन्दभावसम्प्राप्तिः शास्त्रे प्रोक्तं परं फलम्।**
**सैव सायुज्यसाधर्म्यब्रह्मसाम्यादिसंज्ञिका॥**[43]

तस्मात् पूर्वोक्तलक्षणः भगवद्भावापत्तिरेव मोक्ष इति सिद्धम्। स च मोक्षो भगवदनु-ग्रहैकफलः तत्साक्षात्कारैकलभ्यः। साक्षात्कारश्च प्राप्तध्रुवस्मृतीनां भुक्तप्रारब्धकर्मणामेव। 'यमेवैष वृणुते तेन लभ्यः।'[44] 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।'[45] विद्वान् स्वाभाविकस्वरूपगुणाशक्त्यादिभिरपरिच्छिन्नेन परब्रह्मणा श्रीपुरुषोत्तमेन साकं साम्यं प्राप्नोति। तत्र प्रमाणमाह –

**यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिम्।**
**तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति॥**[46]

पश्यः इति श्रीभगवत्साक्षात्कारानुभूत्याश्रयः। ईशमिति चेतनाचेतनान्तर्यामिणं सर्वात्मनं पश्यते अपरोक्षेण स्वान्तरात्मतयाऽनुभवति। तदेति अव्यवहितकाल एव। त्रिविधकर्मतन्नि-मित्तकदेहेन्द्रियसूक्ष्मप्रकृतिसम्बन्धाख्यत्रिविधाञ्जनेन वियुक्तः सन् परमं साम्यमुपैति इति योजना। निधर्मकवस्तुज्ञानाद् मोक्षमभ्युपगच्छतां दुराग्रहवतां वाग् विसर्गस्तम्भनार्थं विशेषणानि वक्ति भगवती श्रुतिः। रुक्मवर्णमिति विग्रहवत्त्वसूचकं विशेषणं सौन्दर्यलावण्य-सौकिशोर्यमाधुर्यमार्दवसौगन्ध्यसौरभ्यानन्तकल्याणगुणाश्रयपरमयोगिध्येयं ध्यातृकर्मभर्जिष्णु-सर्वपुरुषार्थसुरद्रुमसच्चिदानन्दमूर्तिकमित्यर्थः।

*

**सन्दर्भाः–**


1. गीता वेदान्तपारिजातसौरभः व्याख्या, 1.3.8
2. ब्र.सू. निम्बार्कभाष्ये, 1.4.21
3. मुण्डकोपनिषदि, 3.1.9
4. बृहदारण्यकोपनिषद्, 4.15.13
5. मुण्डकोपनिषद्, 2.2.10
6. दशश्लोकी, 1
7. ईशावास्योपनिषदि, 2
8. यजुर्वेद
9. छान्दोग्योपनिषदि, 3.14.1
10. ब्र.सू. पारिजातसौरभे, 2.3.32
11. ब्र.सू. 2.3.42
12. वेदान्तरत्नमञ्जूषा, 20-23
13. श्वेताश्वतरोपनिषदि, 4.5
14. श्वेताश्वतरोपनिषदि, 4.5
15. श्रीमद्भगवद्गीता, 10.9
16. छान्दोग्योपनिषदि, 8.12.3
17. मन्त्ररहस्यषोडश्यां, श्लो.14
18. प्रपन्नकल्पवल्ल्यां, श्लो.22
19. श्रीमद्भागवते, 11.29.19
20. श्रीमद्भागवते, 11.29.15
21. श्रीमद्भागवते, 11.18.44
22. श्रीमद्भगवद्गीता, 8.5
23. वेदान्तकारिकावल्यां, श्लो.2
24. ब्र.सू. निम्बार्कभाष्ये, 4.4.19
25. ब्र.सू. निम्बार्कभाष्ये, 1.1.7
26. ब्र.सू. निम्बार्कभाष्ये, 4.1.15
27. ब्र.सू. निम्बार्कभाष्ये, 4.1.14
28. छान्दोग्योपनिषदि, 6.8.7
29. छान्दोग्योपनिषदि, 6.8.7
30. तैत्तिरीयोपनिषद, 2.7
31. ब्र.सू. वेदान्तकौस्तुभभाष्ये, 2.1
32. छान्दोग्योपनिषदि, 7.1.3
33. तैत्तिरीयोपनिषदि, 2.1
34. छान्दोग्योपनिषदि, 8.12.3
35. ब्र.सू. निम्बार्कभाष्ये, 3.3.30
36. वेदान्तकौस्तुभप्रभाख्यब्रह्मसूत्रभाष्ये, 4.4.17
37. नारायणोपनिषदि, 5
38. वेदान्तकौस्तुभप्रभाख्यब्रह्मसूत्रभाष्ये, 4.4.7
39. श्रीमद्भगवद्गीता, 9.14
40. श्रीमद्भगवद्गीता, 10.9
41. श्रीमद्भगवद्गीता, 11.15
42. श्रीमद्भगवद्गीता, 7.5
43. वेदान्तकारिकावल्याम्, श्लो.1
44. कठोपनिषदि, 1.2.23
45. मुण्डकोपनिषदि, 2.2.10
46. मुण्डकोपनिषदि, 3.1.3


*

# संस्कृते दर्शनसंग्रहपरम्परा

**अञ्जली कुमारी**

भारते वर्षे दर्शनस्योदयो वेदकालादेव मन्यते। ऋग्वेदे सृष्टिविचारणायां **''नासदासीन्नो सदासीत् तदानीम्''**[1] इत्यादौ सृष्टिपूर्वावस्थायाः वर्णनानि क्रमशो जगदुत्पत्ति-विकाश-प्रलयादि-निरूपणानि बहुषु सूक्तेषु लभ्यन्ते। तदनु दर्शनधारायाः अनेका मुख्या उपमुख्याश्च धाराः काले-काले समुत्पन्नाः अद्यावधि तां मुख्यां धारां पोषयन्ति। ऐतिहासिकक्रमेण दर्शनविकासविचारे तु सप्त कालखण्डा अभियुक्तैर्निरूपिता इति पश्यामः-वैदिकसंहिताकालः, उपनिषत्कालः, वेदविरोधकालः, आस्तिकप्रस्थानोदयः, व्याख्याकालः, मध्यकालिकसन्तकालः, आधुनिककालश्चेति।[2] नाद्यावधि कोऽपि ग्रन्थः तान् कालान् दर्शनेतिहासलेखने व्याप्नोतीति दुःखावहो विषयः।

आधुनिके युगे ये भारतीयदर्शनग्रन्था लघुकाया बृहतो वा आंग्ल-हिन्दी-भाषयोः लभ्यन्ते ते मुख्यतः आस्तिक-नास्तिक-दर्शन-विवरणपराः परिचयात्मकाः सन्ति। तत्र वेदनिन्दकनास्तिकदर्शनानि त्रीणि-चार्वाकजैनबौद्धरूपाणि समालोच्य आस्तिकानि न्यायवैशेषिक-सांख्ययोग-मीमांसावेदान्तरूपाणि वर्णयन्ति। तेषां विवेचनमैतिहासिकं सिद्धान्तव्याख्यापरं चेति। तेषां दर्शनानां परस्परं तारतम्यं तु न खण्डनात्मकं प्रत्युत औत्सुक्यनिवारकमात्रम्। एतादृशानां भारतीयदर्शन-ग्रन्थानां प्रारम्भः जर्मनदेशीयविदुषा रचितेन The Six Systems of Indian Philosophy (1899) इत्यभिधानेन विशालग्रन्थेनाभवत्। तदनु राधाकृष्णन्-सुरेन्द्रनाथदासगुप्त-चन्द्रधरशर्म-प्रभृतिभिः रचितैः ग्रन्थैः एष विषयः प्रपूरितः।

वस्तुतः मध्ययुगे एव दर्शनानां पर्याप्तो विकासो जातः, तेन दर्शनसंग्रहस्य आवश्यकता कैश्चित् दार्शनिकैरनुभूता, यतः सामान्यो जिज्ञासुः स्वकीये दर्शने आस्थावानपि स्वगृहाद् बहिः किमस्ति इति जानीयात्। सौभाग्यादष्टमशतकस्यैव दर्शनसंग्रहद्वयं पुस्तकं सम्प्रत्युपलभ्यते विशिष्टैः विद्वद्भिर्विरचितम्। तदनु चतुर्दशशतके सर्वदर्शनसंग्रहो नाम ग्रन्थः सर्वेषु संग्रहग्रन्थेषु प्रसिद्धतमः प्रमेयबहुलश्चेति न संशयः।

दर्शनसंग्रहेषु इदंप्रथमतया उपलब्धः ग्रन्थः जैनविद्वद्वरेण हरिभद्रसूरिणा रचितः षड्दर्शनसमुच्चयो नाम बहुभिः संस्करणैः प्रकाशितो वर्तते। सप्ताशीति (८७) श्लोकात्मको ग्रन्थोऽयं नानाजैनमुनिभिः स्वस्वटीकयालंकृतो विद्यते। मूलग्रन्थः काव्यात्मकमानन्दं जनयन् जैनसम्प्रदाये लोकप्रियोऽस्ति। अत्र षडेव दर्शनानि सिद्धान्तनिरूपणपुरस्सरं परिचयमात्रेणोपस्थापितानि तथाहि-

**बौद्धं नैयायिकं सांख्यं जैनं वैशेषिकं तथा।**
**जैमिनीयं च, नामानि दर्शनानाममून्यहो।।**[3]

यद्यपि षड्दर्शनसंख्या एतैः पूर्यते तथापि सर्वैः दर्शनप्रस्थानैः निरस्यमानतया लोकायतमपि अन्ते समुपस्थापितम्। तथाचष्टे हरिभद्रसूरिः-

**षष्ठदर्शनसंख्या तु पूर्यते तन्मते किल।**
**लोकायतमतक्षेपात् कथ्यते तेन तन्मतम्।।**[4]

एवमन्ते लोकायतमतप्रतिपादनात् वर्तते अस्य ग्रन्थस्य वैशिष्ट्यम्। सर्वदर्शनसंग्रहे तु सर्वैः दार्शनिकैः निरस्यमानः लोकायतसिद्धान्तः प्रथममेवोपस्थपितः इति तयोः वैषम्यम्। षड्दर्शनसमुच्चयस्य श्लोकाः कण्ठस्थीकरणयोग्यत्वात् अतिसरलत्वात् संक्षिप्तत्वात् च जैनेतरसम्प्रदायेष्वपि लोकप्रियाः सन्ति। ग्रन्थेऽस्मिन् प्रसङ्गाद् हरिभद्रः स्वग्रन्थस्य युक्तियुक्तत्वेऽपि अवहितो वर्तते। तथाहि षड्दर्शनसमुच्चयस्य चतुश्चत्वारिंशत्तमे श्लोके टीकायामस्याभिप्रायं प्रस्तौति –

**पक्षपातो न मे वीरे न द्वेषः कपिलादिषु।**
**युक्तिमद्वचनं यस्य तस्य कार्यः परिग्रहः।।**[5]

हरिभद्रसूरेः कालः 750 ई. इति अनुमानितः इतिहासविद्भिः। प्रायेण पञ्चाशद्वर्षानन्तरमेव आदिशङ्कराचार्येण हरिभद्रवत् अनुष्टुप्छन्दसा पद्यात्मकः अपरः दर्शनसंग्रहग्रन्थः व्यरचि। अस्य नाम सर्वदर्शनसिद्धान्तसंग्रहः यश्च संक्षेपेण सर्वसिद्धान्तसंग्रहोऽपि कथ्यते। अयं ग्रन्थः माधवाचार्यस्य सर्वदर्शनसंग्रहरचनायां महान् प्रेरको बभूव। स्वकीयप्रकरणग्रन्थानां समानत्वेन आचार्यः शंकरः स्वशिष्य-ज्ञानवृद्धयेऽस्य रचनामपि चकार। तस्य लक्ष्यं विशिष्टरूपेण वेदान्तज्ञानवतां प्रज्ञाविवेकोपलब्धिरासीत्। यथा भर्तृहरिणोक्तम् –

**प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः।**
**कियद् वा शक्यमुन्नेतुं स्वतर्कमनुधावता।।**[6]

विभिन्नानां प्रस्थानानां ज्ञानं सर्वथावश्यकं भवति स्वप्रस्थानस्य सम्यग्बोधाय इत्यर्थः।

शङ्कराचार्यस्य वेदान्तकेसरिणः संग्रहग्रन्थेऽस्मिन् अतीव लालित्यं वर्तते। तत्र उपोद्घातरूपेण प्रथमं प्रकरणं विद्यते पञ्चदशश्लोकात्मकं तदनु लोकायतदर्शनम् (15 श्लोकात्मकम्), आर्हतदर्शनम् (15 श्लोकात्मकम्)। बौद्धदर्शनं तु चतुर्षु प्रकरणेषु पृथक् - पृथक् निरूपितमस्ति यथा माध्यमिकः (17 श्लोकेषु), योगाचारः (9 श्लोकाः), सौत्रान्तिक; (7 श्लोकाः), वैभाषिकः (40 श्लोकाः) इत्येते नास्तिकवादाः वर्णिताः। शंकाराचार्यः कथयति उपोद्घातप्रकरणे-

**वेदाप्रामाण्यसिद्धान्ता बौद्धलोकायतार्हताः।**
**युक्त्या निरसनीयास्ते वेदप्रामाण्यवादिभिः॥**[7]

पुनः वेदानुकूलदर्शनसिद्धान्तेषु क्रमेण वैशेषिक-नैयायिक-प्रभाकर (मीमांसा)-भट्टाचार्य (भाट्टमीमांसा)-सांख्य-पतञ्जलि (योग)-वेदव्यास (महाभारतीय)-वेदान्तप्रकरणानि इत्यष्टौ तथैव परिचयमुखेन प्रतिपादितानि। वेदान्तप्रकरणे विशालं वर्तते एकोनशत-श्लोकात्मकं यस्यारम्भे शङ्करः कथयति-

**वेदान्तशास्त्रसिद्धान्तः संक्षेपादथ कथ्यते।**
**तदर्थप्रवणाः प्रायः सिद्धान्ताः परवादिनाम्॥**[8]

शङ्कराचार्यस्य अन्यप्रकरणग्रन्थानां यादृशी लालित्यमयी भाषा वर्तते तादृश्येव भाषा सर्वसिद्धान्तसंग्रहस्यापि वर्तते, हृदयं चावर्जयति। क्वचित् अनुप्रासस्यापि क्रीडा वर्तते यथा आर्हतपक्षप्रकरणारम्भे आचार्यः कथयति-

**लोकायतिकपक्षोऽयमाक्षेप्यः सर्ववादिभिः।**
**स्वपक्षेण क्षिपत्येष तत्पक्षं क्षपणोऽधुना॥**[9]

चत्वारो बौद्धसिद्धान्ताः कथं भिद्यन्ते इत्यपि सरलभाषया शङ्कराचार्यो निरूपयति-

**चतुर्णां मतभेदेन बौद्धशास्त्रं चतुर्विधम्।**
**अधिकारानुरूपेण तत्र तत्र प्रवर्तकम्॥**[10]

सप्तमप्रकरणे वैशेषिकदर्शनपक्षः प्रारभते। तत्र स्पष्टरूपेण नास्तिकानां साकल्येन खण्डनं कुर्वाणः वेदार्थवादिपक्षतः आचार्यः शङ्करो ब्रवीति-

**नास्तिकान् वेदबाह्याँस्तान् बौद्धलोकायतार्हताम्।**
**निराकरोति वेदार्थवादी वैशेषिकोऽधुना॥**[11]

वैशेषिकदर्शनस्य सूत्रविशेषं अतिसरलतया इह श्लोकितमस्ति। तथाहि-

**षट्पदार्थपरिज्ञानान्मोक्षं वैशेषिका विदुः।**[12]

एवमेव पतञ्जलिमतेन यदा पुरुषः गुणरहितो जायते तथा पुनः तत्र गुणस्यावकाशो न भवति, कैवल्यावस्थायां तत्र रमणीयामुपमां ददाति-

**क्षीरात् समुद्धतं त्वाज्यं न पुनः क्षीरतां व्रजेत्।**
**पृथक् कृतो गुणेभ्यस्तु भूयो नात्मा गुणी भवेत्॥**[13]

वेदव्यासस्य दर्शने तु सांख्यपक्षादेव मुख्यतः प्रवर्तते आचार्यः। तस्य निष्कर्षः-

**एक एव परो विष्णुः सुरासुरनिशाचरान्।**
**त्रिगुणानुगुणं नित्यमनुगृह्णाति लीलया॥**[14]

एवं सरलभाषाया सर्वसिद्धान्तसंग्रहग्रन्थः नास्तिकानाम् आस्तिकानां च दर्शनसिद्धान्तानां परिचयं जिज्ञासूनां कृते सामान्यतो ददाति। साकल्येनात्र चतुर्दश प्रकरणानि सन्ति। प्रथमं प्रकरणं तु भूमिकारूपमेव।

दर्शनसंग्रहग्रन्थेषु बृहत्तमो वर्तते माधवाचार्यकृतः सर्वदर्शनसंग्रहः। अयं माधवाचार्यः 1336 ई. वर्षे कर्णाटके संस्थापितस्य विजयनगरराज्यस्य संस्थापकस्य बुक्करायस्य गुरुरासीत्। माधवाचार्यस्यानुजः सायणाचार्यः वेदभाष्याणां महान् निर्माता आसीदिति विदितमेव विदुषाम्।

सर्वदर्शनसंग्रहस्य लेखने प्रेरणां प्राप माधवाचार्यः आदिशङ्करकृतात् उपर्युक्तात् सर्वसिद्धान्तसंग्रहादेव। तथापि अयं प्रौढः ग्रन्थः शास्त्रार्थपरम्परानुकूलश्च। पद्यं विहाय गद्यमेवाश्रित्य शास्त्रीयभाषायां षोडश दर्शनानि यथायथं मुख्यसिद्धान्त-समालोचनविधिना गम्भीरेण विवेचनेन पुरस्कृत्य प्रस्तुतम्। अद्यापि ग्रन्थरत्नमिदं दर्शनानां तत्त्वविवेचनविषये निकषीभूतमेव मन्यते, यतः परं तादृशो ग्रन्थः न समागतः संस्कृतभाषायाम्। नासौ संग्रहः आधुनिकदर्शनेतिहासवत् वर्तते। किन्तु प्रतिदर्शनं निरसनीयविषयेण पर्यवसानं जायते यस्य खण्डनेन अपरदर्शनं प्रारभते।

संग्रहग्रन्थेऽस्मिन्नारम्भतः षोडश दर्शनप्रस्थानानि समालोचितानि प्राप्यन्ते। अत एव प्रस्थानानां भूयसी संख्येह समाविष्टा। कतिपयानामल्पज्ञातानां प्रस्थानानामपि निरूपणमिह वर्तते। यथा- पाशुपतदर्शनम्, शैवदर्शनम्, प्रत्यभिज्ञादर्शनम्, रसेश्वर-दर्शनम्, पाणिनिदर्शनं चेति।

वेदान्तस्य रामानुजमाध्वदर्शनप्रस्थाने पृथक् विवेचिते। शाङ्करदर्शने तु माधवाचार्यस्य विशिष्टाऽभिनिवेशः, अतः आपेक्षिकविस्तरेणास्य प्रतिपादनं कृतम्।[15]

**दर्शनमेतदसौ सकलदर्शनशिरोऽलंकाररत्नमिति च कथयति।**[16]

सर्वदर्शनसंग्रहस्य शैली शास्त्रीया वर्तते, न संग्रहान्तरयोरिव परिचयात्मिका। अत्र सिद्धान्ताः पूर्वपक्षोत्तरपक्षपद्धत्या सम्यगालोचिताः क्वचित्तु अतीव गम्भीरतया विषयस्फोरणपराः। यथा-बौद्धदर्शने क्षणिकत्वभावनाविमर्शः (पृ.33-47), आर्हतदर्शने सावयवत्वस्य विवेचनं नैयायिकमतखण्डनं च (पृ.111-115), औलूक्यदर्शने वैशेषिकत्वसिद्धये द्वित्वोत्पत्तिविवेचनम्, पाकजोत्पत्तिः, विभागजविभागविवेचनं च (पृ.360-375)[17], पाणिनिदर्शने च स्फोटविवेचनेऽन्यमतनिरसनम् (पृ.507-513), सांख्यदर्शने कार्यकारणसम्बन्धनिरूपणम् (पृ.539-546), जैमिनिदर्शने च स्वतः प्रामाण्यसिद्धिः (पृ.476-485)[18] इत्यादि।

माधवाचार्यः शाङ्करदर्शनम् अन्तिमत्वेन इह स्थापयति। सर्वदर्शनसंग्रहस्य आरम्भस्तु सर्ववादिनिरसनीयस्य चार्वाकदर्शनस्य विवेचनाद् भवति। एवं चार्वाक-शाङ्करदर्शनयोः मध्ये एव अन्यानि चतुर्दश प्रस्थानानि सन्ति। सर्वं विवचनं तु गद्यभाषायामेव वर्तते किन्तु उद्धरणानि प्रमाणरूपेण पद्यात्मकानि एव। आधुनिक-शोधकार्यस्य पद्धतिमाश्रयते माधवाचार्य इति न संशयः। स्वकीयं सर्वं कथ्यं प्रमाणसहितमेव प्रस्तौत्यसौ। पूर्वपक्षस्य स्थापनम् उत्तरपक्षेण तस्य खण्डनं च स्थाने स्थाने वर्तते।

सर्वाणि दर्शनप्रस्थानानि नाटकस्याङ्कवत् परस्परसम्बद्धानि वर्तन्ते। एकस्य प्रस्थानस्यान्ते यन्मुख्यं कथ्यं तस्य निरसनेनैव अपरं प्रस्थानं प्रारभते। यथा चार्वाकदर्शने अनुमानप्रमाणखण्डने व्याप्तिसिद्धिः असंभवेति कथितम्। तस्याः व्याप्तेः सम्भाव्यतां पुरस्कृत्य बौद्धदर्शनं प्रारभते। तत्र व्याप्तिसम्बन्धः अविनाभाव इति कथितः। बौद्ध-दर्शनस्य मुख्यः सिद्धान्तः क्षणभवादः। अपरस्मिन् आर्हतदर्शनप्रस्थाने क्षणभङ्गखण्डनमेव प्रथमं विवेच्यम्। हेमचन्द्रस्य श्लोकः प्रसङ्गेऽस्मिन् उद्धृतः-

**कृतप्रणाशाकृतकर्मभोग भवप्रमोक्षस्मृतिभङ्गदोषान्।**
**उपेक्ष्य साक्षात् क्षणभङ्गमिच्छन्नहो महासाहसिकः परस्ते।।**[19]

एवमेव दर्शनप्रस्थानानि क्रमशः सम्बद्धानि एव दर्शितानि। यथाधुनिके शोधप्रबन्धे विषयाणां परस्परसम्बन्धः प्रदर्श्यते, प्रमाणपूर्वकं किमपि कथ्यते, क्वचित्-क्वचित् प्रसक्तानुप्रसक्तविषयोऽपि समालोच्यते तथैव माधवाचार्यस्य सर्वं विवेचनं शोधात्मकमेव। नास्य समकक्षः कोऽपि दर्शनग्रन्थः विद्यते। दर्शनसंग्रहेषु सर्वथायं सर्वदर्शनसंग्रहोऽमृतायते।

*

**सन्दर्भाः—**

1. ऋग्वेदः, 10.120.1
2. भारतीयदर्शनसिद्धान्तप्रभा, पृ.2-3
3. षड्दर्शनसमुच्चयः, श्लोकः - 3
4. षड्दर्शनसमुच्चयः, श्लोकः - 79
5. षड्दर्शनसमुच्चयः, श्लोकः - 42
6. वाक्यपदीयम्, 2.486
7. सर्वसिद्धान्तसंग्रहः, 1.25
8. सर्वसिद्धान्तसंग्रहः, 14.1
9. उपरिवत्, 3.1
10. उपरिवत्, 4.2
11. उपरिवत्, 7.1
12. उपरिवत्, 7.18
13. उपरिवत्, 12.51
14. सर्वसिद्धान्तसंग्रहः, 13.66
15. सर्वसिद्धान्तसंग्रहः, पृ.631-760
16. उपरिवत्, शाङ्करदर्शनस्य पुष्पिका, पृ.760
17. द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे।
    यस्य न स्खलिता बुद्धिस्तं वै वेशेषिकं विदुः।। सर्वदर्शनसंग्रहः, श्लोकः - 3
18. सर्वाः पृष्ठसंख्याः सर्वदर्शनसंग्रहस्य।
19. वीतरागस्तुतिः (सर्वसिद्धान्तसंग्रहः), श्लोकः - 18, पृ.97

*

**ग्रन्थसमीक्षा-1**

# आयुर्विज्ञानपरम्परायां 'भेसज्जमञ्जूसा'- ग्रन्थस्य स्थानं महत्त्वं च

**डॉ. प्रपुफल्लगडपालः**

आयुर्विज्ञानक्षेत्रे बौद्धपरम्परायाः महद्योगदानं वर्तते। स्वयं लोकगुरुर्भगवान् बुद्धः 'भैषज्यगुरुः' इत्याख्यया विश्वस्मिन्नपि विश्वे सुविख्यातो वर्तते।[1] भैषज्यगुरुणाऽनेन भगवता बुद्धेन न केवलं मानसिकानां रोगाणां चिकित्सा निर्दिष्टा, अपित्वनेन शारीरिकव्याधीनामपि शमनोपायाः उपदिष्टाः। वस्तुतो मनो-वचन-कर्मणां त्रिविधशिक्षा तस्य सद्धर्मस्य काचित् महती एव विशेषता वर्तते।

इदं सुविदितमेव वर्तते सर्वेषां यद् भगवतो बुद्धस्य समेऽपि उपदेशाः पालिभाषायां लभ्यन्ते। तत्र पालिसाहित्ये त्रिपिटकसाहित्ये वा प्रसङ्गवशान्नैकेषां सम्बद्धविषयाणां वर्णनमपि नैकत्र दृश्यते। अत्र खलु दुःखरूपिणो व्याधेश्च चिकित्सा भगवता निर्दिष्टा। तत्र प्रसङ्गतो ननु प्राचीनानामौषधीनां चिकित्सापद्धतेश्चापि विवरणं तत्र तत्र दृश्यते। विनयपिटकस्य भैषज्यस्कन्धे (भेसज्जखन्धके) अस्मिन् विषये विस्तरेणोपवर्णितं वर्तते। भैषज्यशास्त्रस्य शरीरविज्ञानस्य च अन्तःसम्बन्धत्वात्पश्यामश्चेन्महासतिपट्ठानसुत्त[2] शरीर-विज्ञानस्य अतीव सुष्ठु विश्लेषणं वर्तते। तद्यथा –

**''अत्थि इमस्मि काये पथवीधातु आपोधातु तेजोधातु वायोधातु'ति।**

**अत्थि इमस्मिं काये– केसा लोमा नखा दन्ता तचो, मंसं न्हारु अहि अट्ठिमिञ्जं वक्कं, हदयं यकनं किलोमकं पिहकं पप्फासं, अन्तं अन्तगुणं उदरियं करीसं मत्थलुङ्गं, पित्तं सेम्हं पुब्बो लोहितं सेदो मेदो, अस्सु वसा खेळो सिङ्घाणिका लसिका मुत्तन्ति।''**

एतदतिरिच्य महाराहुलवादसुत्ते, खुद्दकपाठे, गिरिमानन्दसुत्ते अपरेषु च पालिग्रन्थेषु शरीरविज्ञानस्य आयुर्विज्ञानस्य च विषये नैकाः सूचनाः समुपलभ्यन्ते। तत्रापि धम्म-चक्कप्पवत्तनसुत्ते तु भगवता बुद्धेन 'दुक्खं अरियसच्चं' इत्युक्त्वा 'व्याधिपि दुक्खो'

इति रूपेण व्याधिः दुःखत्वेन प्रतिपादितः। भगवता न केवलं व्याधिः उक्तः, अपितु अस्य व्याधेः शमनोपायाश्चापि समुपदिष्टाः। एवमेव त्रिपिटकस्य विविधेषु ग्रन्थेषु प्रसङ्गेषु वा भगवता बुद्धेन चिकित्साविषये उपदिष्टानि वचनानि समुपलभ्यन्ते। इत्थं भगवान् बुद्धः सर्वश्रेष्ठः चिकित्सकत्वेन विश्वस्मिन्नपि विश्वे ख्यातिं गतः। शास्तृत्वेनासौ देवमनुष्याणाम् उत्तमः चिकित्सकः आसीत्।

इदं तु सर्वे विदन्ति एव यत् संस्कृतसाहित्ये नैके आयुर्विज्ञानसम्बद्धाः भैषज्यविषयकाः च असाधारणाः ग्रन्थाः प्रणीताः अभूवन्। संस्कृते इदं विज्ञानं शास्त्रं वा 'आयुर्वेद' इति नाम्ना प्रसिद्धं वर्तते। अस्य आयुर्विज्ञानस्य आयुर्वेदस्य वा नैके ग्रन्थाः संस्कृतसाहित्यान्तर्गततया समुपलभ्यन्ते। तत्र अष्टाङ्गहृदय-अष्टाङ्गसंग्रह-सुश्रुतसंहिता-चरकसंहिता-सिद्धसारादिग्रन्थाः अतीव प्रसिद्धाः सन्ति। एवमेव तत्र आयुर्विज्ञानशास्त्रे बौद्धविदुषामपि महद्योगदानं वर्तते। बौद्धसंस्कृतसाहित्ये तु 'भैषज्यगुरुवैदूर्यप्रभराजसूत्रम्' नाम महायानसूत्र-ग्रन्थेऽपि प्राचुर्येण भैषज्यविषयाः कथिताः वर्तन्ते। प्रसङ्गानुकूलाश्च नैके चिकित्साविज्ञान-सम्बद्धाः विषयाः सौन्दरनन्दादिग्रन्थेष्वपि समुपलभ्यन्ते। तत्र च 'महाव्युत्पत्ति'[3] नामके ग्रन्थे तु सप्तदशवस्तुषु भैषज्यवस्तुनोऽपि चर्चा समागता वर्तते। तद्यथा– 1. प्रव्रज्यावस्तु, 2. पोषधवस्तु, 3. वर्षावस्तु, 4. प्रवारणवस्तु, 5. कठिनवस्तु, 6. चीवरवस्तु, 7. चर्मवस्तु, 8. भैषज्यवस्तु, 9. कर्मवस्तु, 10. प्रतिक्षयावस्तु, 11. कालाकालसम्पद् वस्तु, 12. भूम्यत्तरस्थचरणवस्तु, 13. परिकर्मणवस्तु, 14. कर्मभेदवस्तु, 15. चक्रभेदवस्तु, 16. अधिकरणवस्तु, 17. शयनासनवस्तु च।

एवमेव वयं पश्यामश्चेत् सम्पूर्णे विश्वे आयुर्विज्ञानस्याभ्युत्थाने बौद्धानां महती भूमिका विद्यते इति निश्चप्रचमेव। बुद्धकालिकं कौमारभृत्यं (कौमारभच्चं) जीवकं महावैद्यं को वा न जानाति? जीवकोऽसौ भगवतो बुद्धस्य अत्यन्तं श्रद्धालुः उपासकः आसीत्। जीवकेनानेन संघाय आम्रवनं दानरूपेण समर्पितमासीत्। जीवकोऽसौ कुमाराणां भृत्यत्वेन विख्यातस्सन् ''कौमारभृत्य'' इति नाम्ना ज्ञायते स्म। तस्यैव नाम्ना आयुर्विज्ञाने 'कौमारभृत्य' इति काचित् शाखाऽपि उत्पन्ना। चिकित्साविज्ञानं ज्ञातुमिच्छुरसौ जीवको तक्षशिलां गत्वा तां विद्यां प्राप्नोत्। तस्मिन् काले तक्षशिला चिकित्साविज्ञाने विश्वविख्यातं केन्द्रमासीत्। पालिसाहित्य–परम्परानुसारेण जीवकः नैकेषां रोगाणां ज्ञाता उपायकर्ता च आसीत्। सः बहूनां रोगाणां चिकित्सायां दक्षतां प्राप्य दूरदेशेष्वपि विख्यातो जातः इत्येवमयं जीवकः प्रसिद्धः चिकित्साविद् आसीत्। अद्य भारते विदेशेषु च महास्थविरस्य जीवकस्य विषये जनेषु महती श्रद्धा दृश्यते। इत्येवं संस्कृत-

पालिवाङ्मययोः नैके ग्रन्थाः ग्रन्थांशाः वा समुपलभ्यन्ते। तद्विषये गम्भीरस्य अध्ययनस्य अनुसन्धानस्य च आवश्यकता वर्तते।

अस्मिन् विषये स्ववैशिष्ट्यकारणात् 'भेसज्जमञ्जूसा'–नामको ग्रन्थो विशिष्यते। अयं ग्रन्थः पालिसाहित्ये भैषज्यांशसङ्कलनकारणात् कश्चित् महान् ग्रन्थः वर्तते।

### रचयिता कालश्च

श्रीलङ्कादेशे त्रयोदशशताब्द्यां रचितः 'भेसज्जमञ्जूसा'–ग्रन्थस्तु पालिचिकित्साशास्त्र-परम्परायां विशिष्टं स्थानमाप्नोति।[4] अयं 'भेसज्ज–मञ्जूषा'ख्यो ग्रन्थः पालिभाषायां रचितो जातः, यस्मात्, ननु काचित् नवीना परम्परा समारब्धा। संस्कृते रचिताः अष्टाङ्गहृदय-अष्टाङ्गसंग्रह-सुश्रुतसंहिता-चरकसंहिता-सिद्धसारादिग्रन्थाः अतीव प्रसिद्धाः सन्ति एव, किञ्च पाल्यां प्रणीतः 'भेसज्जमञ्जूसा'–ग्रन्थः नूनम् अस्मिन् वाङ्मये मुकुटायते।

अस्य ग्रन्थस्य रचयितुर्विषये पर्याप्तसूचनाः नैव लभ्यन्ते। ग्रन्थस्थ–आन्तरिकसाक्ष्यैः ज्ञायते यत् ग्रन्थलेखकः कश्चित् वरिष्ठः भिक्षुः आसीत्, यः खलु कस्मिंश्चित् ब्राह्मणपरिवारे जनिं प्राप्तवान् आसीदिति।[5] पराक्रमभुज-द्वितीयस्य काले अयमासीदिति सम्भाव्यते। अस्य कालः 1261 ई. भवितुं शक्यते इति अत्र एकं मतं विद्यते। अपरं मतम् अस्मिन् विषये वर्तते यत् जम्बूद्रोणनिवासी ब्राह्मणपरिवारे जनिं गतः कश्चित् भिक्षुः पराक्रमभुजस्य राज्यकाले 1183 शके अस्य ग्रन्थस्य रचनामकरोदिति केषाञ्चन मतम्। केचन अर्थदर्शी (अत्थदस्सी) संघराजा इति अस्य ग्रन्थस्य लेखकनाम सम्भावयन्ति।[6]

पण्डितार्यदासकुमारसिङ्घे–महोदयस्य मतानुसारेण 'भेसज्जमञ्जूसा सिंहलदेशे राज्ञः पराक्रमभुजषष्ठस्य समये राजधान्यां जम्बूद्रोण्यां वासं कुर्वता ब्राह्मणवंशे जन्म लब्धवता पण्डितशिरोमणिना सिंहलदेशवासिना आयुर्वेदाचार्येण श्रीमता अनोमदस्सी-सङ्घराजप्रवरेण सङ्कलिता' इति। विलेगोडा धम्मकित्ति–सिरि–धम्मानन्दः प्रतिपादयति यत् अस्य ग्रन्थस्य व्याख्याभूतस्य 'भेसज्जमञ्जूसा सन्नय'स्य भूमिकानुसारेण मङ्गल–सङ्घराजेन अयं ग्रन्थः प्रणीतः इति। अपरेण च पालिसाहित्यविदुषा गुणसील–पियपतन–मललसेकेरेण अधोलिखित-पालिभाषायाम् उपस्थापितं यत्–

'सीहलभेसज्जगन्थे योगरत्नाकरे पञ्चदस–ईसवीयसतके विरचिते, निगमनट्ठ–गाथायं उल्लिखितं, सो पन गन्थो भिय्यो 1267 ईसवीयसतके अनोमदस्सीथेरेन रचितस्य मञ्जूसा नाम पालिभेसज्जगन्थस्स नयानुसारेण विरचितोऽति इति।

इत्येवं प्रकारेण ग्रन्थकर्तुर्विषये नैकानि मतानि सन्ति। तत्र च यद्वा भवतु अस्य

ग्रन्थस्य प्रसिद्धिस्तु दूरदेशेष्वपि आसीत्। थाईदेशे खोमलिप्यामस्य ग्रन्थस्य लिप्यन्तरणम् अस्य महत्प्रमाणं वर्तते।

**संस्करणानि वर्तमानसंस्करण च**

भेसज्जमञ्जूसा–ग्रन्थस्य प्रकाशनस्य इतिहासः अतीव मनोरञ्जकः वर्तते। पालिभाषायाम् आयुर्विज्ञानसम्बद्धः अयमेकमात्रो ग्रन्थो वर्तते, तस्मात् पाश्चात्त्यविदुषाम् एतं ग्रन्थं प्रति स्वाभाविकी रुचिः आसीत्। बरनफमहोदयः जियनफिल्लियोजाता अन्ये विद्वांसश्च एतस्मिन् विषये महत्कार्यमकुर्वन्। यद्यपि सिंहलीलिप्यामस्य ग्रन्थस्य नैकानि संस्करणानि समुपलभ्यन्ते, किन्तु अन्यासु लिपिषु अस्य संस्करणानि न सन्ति।[7] इदमपि उल्लेखनीयमस्ति यत् रोमनलिप्यामस्य ग्रन्थस्य कानिचन संस्करणानि सन्ति। अस्य ग्रन्थस्य प्रथमादि-अष्टादश परिच्छेदाः सर्वादौ 1997 तमे ख्रीष्टाब्दे रोमनलिप्यां सिंहलीय–पण्डितः जिनदास-लियरतने महोदयः 'पालि-टेक्स्ट-सोसाईटी, आक्सफोर्ड' इत्यस्मात् संस्थानात् प्राकाश्यं नीतवान्। अनन्तरं च 2002 ख्रीष्टाब्दे एतस्य अष्टादशपरिच्छेदानाम् आंग्लभाषायाम् अनुवादः ततः एव प्रकाशितः। ततः लियरतने महोदयेन 2009 तमे ख्रीष्टाब्दे 'पालिटेक्स्ट-सोसाईटी, आक्सफोर्ड' इत्यस्मात् एकोनविंशतितः षष्टिपर्यन्तं परिच्छेदाः प्रकाशिताः।

कालान्तरेण 2015तमे ख्रीष्टाब्दे काशीस्थ-काशी-हिन्दू-विश्वविद्यालयस्य पालि-बौद्धाध्ययनविभागप्रमुखः आचार्यः बिमलेन्द्रकुमार-महोदयः नागरीलिप्यन्तरणपुरस्सरम् अभिनवं संस्करणं सम्पाद्य प्रकाशितवान्। अस्मिन् संस्करणे प्रथमतः अष्टादशपद्धतयः (18 आरम्भिकाः परिच्छेदाः) आसन्। अयं च ग्रन्थः नवदेहलीस्थ-आदित्यप्रकाशनतः (आई.एस.बी.यन. - 978-81-7742-151-4) प्रकाशितो जातः। अस्मिन् नागरी-संस्करणे कलिकाता-विश्वविद्यालयस्य विभागप्रमुखचरेण सेवानिवृत्तेन आचार्येण दीपक-कुमार-बरूआ महोदयेन अस्य ग्रन्थस्य विषये सुदीर्घा विद्वत्तापूर्णा च प्रस्तावना लिखिता। आचार्येण बिमलेन्द्रकुमारेणापि अत्र आंग्लभाषायां ग्रन्थपरिचयः प्रदत्तः।

ततश्च 2019 तमे वर्षे परिवर्धितं संस्करणम् आचार्येण बिमलेन्द्रकुमारमहोदयेन पुनरपि प्रकाशितः। अस्मिन् संस्कारणे सम्पूर्णाः षष्टिसंख्याकाः परिच्छेदाः विद्यन्ते। अस्मिन्नपि संस्करणे आचार्यस्य दीपक-कुमार-बरूआ-महोदयस्य विस्तृता प्रस्तावना दृश्यते। आचार्येण बिमलेन्द्रकुमारेणापि अत्र आंग्ल-हिन्दीभाषयोः महत्त्वसंयुक्तः ग्रन्थपरिचयः प्रदत्तः, येन ग्रन्थस्य-सूचना सारल्येन प्राप्तुं शक्यन्ते। वस्तुतः ग्रन्थे आंग्ल-हिन्दीभाषयोः विस्तरेण प्रदत्तः परिचयः सम्बद्धाः सूचनाश्च अतीव मूल्यवत्यः सन्ति। रोमनलिप्यां

प्राप्तस्य ग्रन्थस्य नागरीलिप्यन्तरणेन अयं ग्रन्थः अतीव महत्त्वपूर्णः सञ्जातः। नूनमनेन लिप्यन्तरीकरणस्य परम्परा अबाधरूपेण सरन्ती नूतनां सम्भावनां समुद्घाटयन्ती प्रतीयते।

अस्मिन् ग्रन्थे सर्वादौ विषयसूची प्रदत्ता वर्तते, यत्र षष्टिसंख्याकानां पद्धतीनां परिच्छेदक्रमेण सूची दृश्यते। 'भेसज्जमञ्जूसा'–ग्रन्थः षष्टि-परिच्छेदेषु विभक्तः वर्तते इति पूर्वमपि उल्लिखितम् एव। पालिसाहित्यपश्चाद्वर्तिनी रीतिः ग्रन्थादौ मङ्गलाचरणस्य आसीत्। तदनुसारेण अत्र '**अभिवादिय सत्थारं मनोरोगतिकिच्छिकं**' इति मङ्गलाचरणं कृतं वर्तते। ततः ग्रन्थस्य आरम्भः भवति।

**ग्रन्थपरिचयः विषयवस्तु च**

ज्ञायते एव यत् अयं 'भेसज्जमञ्जूसा' इति औषधिविज्ञानविषयकः आयुर्विज्ञानसम्बद्धो वा ग्रन्थः वर्तते इति। इत्यपि सुविदितमेव यद् अयं भेसज्जमञ्जूसा-ग्रन्थः षष्टिपरिच्छेदेषु विभक्तो वर्तते। एतेषु परिच्छेदेषु सर्वेषां रोगाणां तन्निदानानां च विषये विस्तरेण वर्णनं समुपलभ्यते। ग्रन्थस्यारम्भिकेषु अष्टादशपरिच्छेदेषु पारम्परिकचिकित्साविद्यायाः सिद्धान्ताः उपवर्णिताः सन्ति। अवशिष्टाः सर्वेऽपि परिच्छेदाः रोगपरीक्षणेन उपचारेण वा सम्बद्धाः सन्ति। अत्र च एकोनचत्वारिंशत् परिच्छेदतः अग्रे विविधरोगाणां चिकित्सा निर्दिष्टा वर्तते। इदमपि अत्र ध्यातव्यं यत् अन्तिमेषु त्रिषु परिच्छेदेषु औषधादिनिर्माणकौशल्यम् उपवर्णितं वर्तते। अस्मिन् ग्रन्थे विविधानाम् आयुर्विज्ञानसम्बद्धानां ग्रन्थानामपि उल्लेखः जातः वर्तते। तद्यथा– आश्विनसंहिता, खरनादः, वररुचः, हारितो, महाकाश्यपीयः, अमृतमाला इत्यादि। भारतीय-आयुर्विज्ञानग्रन्थानां पर्याप्तः प्रभावः अस्मिन् ग्रन्थे लक्ष्यते। यदि अस्य ग्रन्थस्य संस्कृतच्छायानुवादः क्रियेत, तर्हि आयुर्विज्ञानसम्बद्ध-संस्कृतग्रन्थैः सह अस्य तुलनात्मकमध्ययनं कर्तुं शक्यम्। अस्य ग्रन्थस्य यदि हिन्दी-अनुवादः भवति, तर्हि नूनम् अतीव लाभकरः भवितुं शक्नोति।

अयं ग्रन्थः गाथासु उपनिबद्धो वर्तते। तत्रापि प्रायेण अनुट्ठभ (अनुष्टुप्) छन्दसि ग्रन्थः रचितो दृश्यते। क्वचित् पथ्यावृत्तानि अपि समागतानि वर्तन्ते। कानिचन अन्यानि छन्दांसि अपि अत्र दृश्यन्ते। इन्द्रवज्रा, मालिनी, शार्दूलविक्रीडितम्, आर्या इत्यादीनि छन्दांसि अपि अत्र प्रसङ्गतो वर्तन्ते। इत्येवं प्रकारेण अस्मिन् ग्रन्थे विविधानां छन्दसां सुन्दरः प्रयोगः जातः।

ग्रन्थान्ते आचार्येण बिमलेन्द्रकुमारमहोदयेन परिशिष्टत्वेन षट् सूच्यः दत्ताः सन्ति। तद्यथा– सामान्यसूची (1-22 पर्यन्तम्), वनस्पतिसूची (1-18 पर्यन्तम्), पशुसूची (1-18 पर्यन्तम्), रोगसूची (1-18 पर्यन्तम्), भेसज्जविवरणसूची (1-18 पर्यन्तम्)

च। सर्वान्ते मन्ये गाथापठमपाद–अनुक्कमणिका (अकारादिक्रमणिका) (पद्धति 1-18 पर्यन्तम्) दत्ता वर्तते। आचार्यः बिमलेन्द्रकुमारवर्यः अत्यन्तं परिश्रमेण दक्षतया च अस्य ग्रन्थस्य लिप्यन्तरणं सम्पादनं चाकरोत्। तस्य प्रयासेन नूनं किञ्चित् सुन्दरं संस्करणं विदुषां करकमलयोः समागतमिति कारणाद् अस्य महोदयस्य प्रयासाः अभिनन्द्याः विद्यन्ते।

## महत्त्वं प्रासङ्गिकता च

'आरोग्यपरमा लाभा, सन्तुट्ठिपरमं धनं'[8] अर्थात आरोग्यं परमो लाभः वर्तते इति धम्मपदे सुखवग्गे समुपलभ्यते। तदनुसारेण भेसज्जमञ्जूसा-ग्रन्थः बौद्धधर्मस्य सामाजिकपक्षं व्यवहारिकतां च प्रदर्शयति। बौद्धधर्मस्य आध्यात्मिकपक्षाणां सन्दर्भे अस्य ग्रन्थस्य सिद्धान्ताः समालोचयितुं शक्यन्ते। भोजनविषये अस्माकम् आचार-विचारयोर्मध्ये च सामञ्जस्यस्य केचन अत्यन्तं महत्त्वपूर्णाः पक्षाः अस्मिन् ग्रन्थे समुद्घाटिताः वर्तन्ते। वस्तुतोऽयं ग्रन्थः आचार्येण बिमलेन्द्रकुमारहाशयस्य सम्यक्प्रयासैः रोमनलिपितः नागरीलिप्याम् अन्तरितः सन् अधुना सर्वेषां कृते उपयोगी जातः। एवमेव नैके उपयोगिनः ग्रन्थाः सिंहली, बर्मी, थाई, कम्बोज, वियतनामी इत्यादिलिपिषु वर्तन्ते तत्तद्देशेषु। ते च ग्रन्थाः अस्माभिः प्राप्तव्याः, लिप्यन्तरणीयाः, सम्पादनीयाः प्रकाशनीयाश्च सन्ति–इति काचित् दिक् अस्मात् ग्रन्थरत्नात् प्राप्तुं शक्यते, इदं कार्यं वस्तुतोऽत्यन्तम् आवश्यकं वर्तते। अनेन कार्येण पालिसाहित्यस्य संवर्धनं भवितुं शक्नोति।

*

## सन्दर्भाः–

1. भेसज्जमञ्जूसा, भूमिका
2. महासतिपट्ठानसुत्त, पृ.8
3. महाव्युत्पत्ति
4. भेसज्जमञ्जूसा, भूमिका
5. भेसज्जमञ्जूसा, भूमिका
6. भेसज्जमञ्जूसा, भूमिका
7. भेसज्जमञ्जूसा, भूमिका
8. धम्मपद, गाथा, 204

*

**ग्रन्थसमीक्षा-2**

# सूर्यदूतकाव्यम् : एकमालोचनम्

**डॉ. देवराज पाणिग्राही**

**पुरोवाक्**

गत्यर्थकस्य ''दु-धातोः'' वर्तमानकाले 'क्त' प्रत्यये दूतशब्दस्य निष्पत्तिः। राजनीतिशास्त्रानुसारम् एषः दूतः खलु एकः सेवकः यस्तु वार्तावहरूपेण कार्यं करोतीति।

उपलभ्यमानेषु दूतकाव्येषु कालिदासकृतं मेघदूतमेव प्राचीनतमं रचनापटुतया प्रधानतममेव काव्यपदमध्यास्ते सुरभारत्यामिति तु निर्विवादमेव। महाकविना कालिदासेन च ईदृशकाव्यनिर्माणकल्पना स्वयमेव उद्भाविता पुराणादिषु उपवर्णिताद् आख्यानाद् वा समधिगता इत्यत्र विषये न किमपि पार्यते प्रतिपादयितुं निःसंशयम्। श्रूयते नागार्जुनग्रन्थस्य कस्यचित् चैनिक (Chaina) भाषायामनुवादकर्ता Hsil Kan इति नामधेयः चैनिककविः ख्रिष्टीयद्वितीयशतब्द्यामेव मेघस्य दूतत्वं कल्पयामास। परन्तु कालिदासात् प्राक्तने काले अचेतनानां दूतत्वं कल्पितमेव तथा च ऋग्वेदे प्रथममण्डले अग्निः दूतरूपेण वर्णितः दृश्यते। सः देवान् प्रति ऋषीणां वार्तां नयति– ''**अग्निं दूतं वृणीमहे**'' (1.12.3) अथवा ''**अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे**'' (8.44.3) इति। पर्जन्यसूक्ते पञ्चमण्डलेऽपि वर्षर्तौ मेघः वृष्टेः दूतरूपेण कल्पितः–

**रथीव कशयाश्वा अभिक्षिपन्नाविर्दूतान् कृणुते वर्ष्या अह।**
**दूरात् सिंहस्य स्तनथा ऊदीरते यत् पर्जन्यः कृणुते वर्ष्यं नभः॥** (ऋक. 5.8.3)

तत्रापि दशममण्डले पणिनः सविधे कुक्कुररूपायाः सरमायाः दूतीरूपेण प्रेषणमुपनिबद्धम्, यथा– ''**इन्द्रस्य दूती रिषिता चरामि मह ईछन्ति पणयो निधीन् वः**'' (10.108.2)। इत्यादि ऋग्वेदीयं प्रमाणम्।

एवप्रकारेण रामायणे दूतश्रेष्ठः हनुमान् , महाभारते भगवान् श्रीकृष्णः, निषधराजः नलः, भागवतपुराणे श्रीकृष्णं प्रति भ्रमरः आदि दूतानां दौत्यं सर्वजनविदितमेव।

दूतनिर्वाचनविषयेऽपि दूते के के गुणाः अपेक्षन्ते इति महाभारते उद्योगपर्वे शान्तिपर्वे च वर्णितं दृश्यते–

**अस्तब्धमक्लीबमदीर्घसूत्रं सानुक्रोशं श्लक्ष्णमहार्यमन्यैः।**
**अरोगजातीयमुदारवाक्यं दूतं वदन्त्यष्टगुणोपपन्नम्॥** (उद्योगपर्व 37.29)
**कुलिनः शीलसम्पन्नो वाग्मी दक्षः प्रियंवदः।**
**यथोक्तवादी स्मृतिमान् दूतः स्यात् सप्तभिर्गुणैः॥** (शान्तिपर्व 86.29)

कौटिल्यार्थशास्त्रे विनयाधिकारिकनामकप्रथमाधिकरणेऽपि ''निसृष्टार्थ-परिमितार्थ–शासनहरः'' इति त्रिविधाः दूताः दृश्यन्ते। कामन्दकीयनीतिसारेऽपि प्राप्यते यथा–

**निसृष्टार्थो मितार्थश्च तथा शासनवाहकः।**
**सामर्थ्यात् पादतो हीनो दूतस्तु त्रिविधः स्मृतः॥** (कामन्दकीयनीतिसारः 13.3)

मनुसंहितायामपि– **दूत एव हि सन्धत्ते भिनत्त्येव च संहतान्।**
**दूतस्तत् कुरुते कर्म भिद्यते येन मानवः॥** (मनुसंहिता 7.66)

आधुनिककालेऽपि भारतसर्वकारस्य पक्षतः राष्ट्रदूतरूपेण विभिन्नेषु राष्ट्रेषु भारत-सर्वकारस्य गतिविधिं निर्णेतुम् अधिकारिणः नियुक्ताः वर्तन्ते। एवंप्रकारां दूतपरम्परां स्वीकृत्य कविः दयानिधिः अस्य खण्डकाव्यस्य प्रणिधानं कृतवानिति।

पवित्रे 1969 (एकोनसप्तत्युत्तरे एकोनविंशतितमे) अब्दे महामानवस्य अद्भुतमहिम्नः तत्रभवतो मोहनदासगान्धेः आविर्भावस्य स्मरणाय तद्गुणमुग्धा विश्ववासिनः यदा गान्धिजन्म-शतवार्षिकोत्सवम् अतीवसमारोहेण परिपालयन्ति, तदा एषः कविः दयानिधिमिश्रः अस्य काव्यस्य ''सूर्यदूतस्य'' रचनां कृतवान् आसीत्।

अस्मिन्नवसरे विशालविश्वस्य क्षुद्रजीवो गान्धिविचारदर्शनोऽपि तद्दर्शनानभिज्ञः साहित्याचार्यः उत्कलप्रदेशस्य गञ्जाममण्डलार्गन्तो अष्टदुर्गग्रामवास्तव्यः कविदयानिधिमिश्रः भारतीयत्वात् जातिभर्त्तुः परमपुरुषस्य वैकुण्ठविहारिणो गान्धेश्चरणयोः भक्त्यर्घ्यस्वरूपं यत् ''सूर्यदूतम्'' इति खण्डकाव्यं विरचितवान् तत्सरस्वतीवरपुत्रस्य महाकवेः कालिदासस्य मेघदूतमनुकृत्यैवास्ति।

अत्र कवेः कल्पना भवति यत्– सत्याग्रही महात्मागान्धिः सान्निध्यमुक्तिं लभमानः सत्यरूपिणं भगवन्तं नारायणं निकषा वैकुण्ठधामाधिवसति। हिंसाद्वेषविमूढान् जातिधर्म-भाषादिकमधिकृत्य परस्परं विवदमानान् भारतीयान् विश्ववासिनोऽपि पुनः सुविमलान्

सत्यानुरागिणश्च कर्तुं गान्धेरन्यः न समर्थो भवेदिति धिया कविः पुनस्तं मर्त्यमण्डलमवतारयितुं चिन्तितवान्नस्ति।

गान्धेः जन्मशतवार्षिकोत्सवः तदानीन्तनसमये समग्रभारते तथा च पृथिव्यामपि प्रचलित आसीत्। अस्मिन्नुत्सवावसरे भारतस्य विभिन्न–भाषाभाषिणः मानवाः स्वकीयाभिस्तथा परकीयाभिर्भाषाभिस्तस्य महात्मनः प्रशस्तिं विरचयन्ति स्म। परन्तु तासु प्रशस्तिषु काव्येऽस्मिन् वर्णिता प्रशस्तिः सर्वतोभावेन रुचिरतरा भविष्यतीति मन्ये। भारतेऽस्मिन् विद्वद्भिस्तं महापुरुषमवलम्ब्य गद्यपद्यनाटकादिरूपेण विपुला प्रशस्तिः आञ्चलिकभाषया लिखितासीत्। एतस्या बोधः केवलं स्व–स्वप्रदेशेषु तद्भाषाभाषिषु आसीदिति मत्वा एषः कविः सर्वभारतीयार्यभाषाणां जननीस्वरूपया संस्कृतभाषया यदिदं ''सूर्यदूतम्'' काव्यं विरचितं भवेत्तर्हि सर्वेषां भारतीयानाम् अन्येषां च विश्ववासिनामपि आदरणीयं भविष्यतीति कवेरभिलाषेति मन्ये।

**नामकरणम्**

यद्यपि सूर्यो वैज्ञानिकैर्निश्चलस्तेजोराशिर्नान्य इति प्रतिपादितः तथापि भारतीयपुराणेषु काश्यपर्षेर्वरपुत्रः सूर्यः ज्येष्टभ्रातुर्विष्णोः आदेशक्रमेण रथमारुह्य जगदुपकर्तुं निर्दिष्टमार्गेण चलतीति वर्णितमस्ति। तानि पुराणान्यनुसृत्य एव मित्रः काश्यपस्य ज्येष्ठभ्रातुर्विष्णोः निवासस्थानं वैकुण्ठं लीलया साग्रहं च गच्छेदिति मनसि कृत्वा गान्धेः अवतरणाय सूर्यं दूतरूपेण निर्वाचितवान् प्रेषितवांश्चेति मन्ये –

**अद्यास्माकं सकलमनुजैः पूजनीयस्य गान्धे-**
**राविर्भावोऽभवदिति सुधीः कोऽपि भक्त्या विमूढः।**
**प्रातःकाले सरसिजसुमैः पूजयित्वाऽर्घ्यमाण-**
**दौत्यार्थं तं विनयवचनैः स्तोतुमारब्धवांश्च॥**[1]

काव्यस्यास्य 'सूर्यदूतम्' इति नामकरणे कवेरभिप्राय एवं भवितुमर्हति यत्– भगवान् सूर्यदेवः सृष्टिस्थितिलयानां कारणीभूतो जगद्व्यापकश्च परलोकगतस्य महात्मनो गान्धेः पुनरवतारणाय स्तौति। काव्ये यथा–

**कृष्णा जाता भरतधरणी कल्मषैर्वर्वराणां**
**हिंसाद्वेषप्रमथितहृदो दुःखभाजो मनुष्याः।**
**इत्यालोच्यारुण! सहृदय किंन्नु वैकुण्ठधाम**
**त्यक्त्वा श्यामोऽवनितलगात्साग्रहं यं विमन्ये॥**[2]

संदेशं प्रापयितुं सूर्यादन्यः वैकुण्ठधाम गन्तुं न कोऽपि भवेदिति धिया कविर्भक्त्या तं प्रणतिपुरःसरं दौत्यकरणाय प्रार्थितवान् प्रेषितवांश्च। यथा ग्रन्थकारेण –

**एवं प्रीत्या भरतधरणीवासिनस्त्वद्गुणज्ञा**
**आसेवन्ते चरणकमले मित्र! ते भक्तिमुग्धाः।**
**तस्मादेष त्वदनुटिकितो बद्धपाणिः कपाले**
**याचे ज्ञानिन् दिवसकर! मे दूतकार्यं कुरुष्व॥**[3]

**महामानवसम्बन्धिविवरणम्**

काव्येऽस्मिन् गान्धेः जन्मनः आरभ्य[4] वैकुण्ठप्राप्तिं यावत् सेवाधर्म-स्वाधीनतादीनां महनीयकर्त्तव्यानां सम्यग्रूपेण वर्णनमस्ति।[5] अपरं च कुष्ठरोगनिराकरणे सूर्यस्य तथा महत्मनो गान्धेः धर्मसादृश्यं वर्णितमस्ति।[6] अन्यच्च सत्याहिंसारूपमूलमन्त्राश्रितस्य महात्मनो नीतिमसहमानः हिंसादेवः असत्याधर्मरूपिणं नाथुराममाश्रित्य[7] तं परलोकं प्रेषयन्नपि अधुना तस्य जन्मशतवार्षिकोत्सवे तदीयजन्मभूमौ माहात्म्यं प्राकटयत्। अत्र विषये कविना तस्य कर्त्तव्यं सम्यक् सम्पादितम्।

**वर्णनाकौशलम्**

कवेः वर्णनाकौशलम् अतीव मनोहरं हृद्यं च वर्तते। कथमिति चेत् आध्यात्मिकविषय-मधिकृत्य काव्यस्य वर्णनं जातं परन्तु काव्यं यदि सरसं न भवेत् तर्हि लोकेषु आदृतं न स्यादिति धिया वर्णनापरिपाट्यामुद्यानवनपर्वतकासारनदीप्रभृतीनां वर्णने भक्तिवात्सल्य-शृङ्गारादीनां रसानां समावेशः कृतः।

**वर्णितविषयवस्तु**

अत्र काव्ये पूर्वदिशातः पश्चिमदिशं यावत् अर्थात् भारतस्योत्कलप्रान्तस्य कोणार्कतः गुर्जरप्रदेशस्थं पोरवन्दरं यावत् मार्गप्रदर्शनप्रणाल्यामुत्कलप्रदेशस्य कोणार्क[8]-पुरी[9]-भुवनेश्वर[10]-चिलिका–दयानदी[11]-राजाराणीमन्दिर[12]-बिन्दुसरोवर[13]-लिङ्गराज[14]-एकाम्रकानन[15]-राज्यचिकित्सालय (Capital Hospital)[16]-सचिवालय (Secretariat)[17]-इन्द्रिरागान्ध्युद्यान-विधानसभा[18]-खण्डगिरि-उदयगिरि[19]-नराजशैल[20]-महानदीतीर[21]-हीराकुदजलबन्ध[22]-विन्ध्यपर्वत[23]-यमुनानदी[24]-दिल्ली[25]-लोकसभा[26]-राजघाट[27]-नेहेरुशास्त्रिसमाधिस्थल[28]-राष्ट्रपतिभवन[29]-अहम्मदावादनगरी[30]-साबरमती-आश्रम[31]-पोरबन्दर[32]-राजकोटादीनां[33]-वर्णनं जातम्। परन्तु उत्कलस्य राजधान्याः प्राचीननूतनस्थानादीनामैतिहासिकीं पौराणिकीं वार्त्तामवलम्ब्य यद्वर्णनं तदतीव मनोरममेव।

तदनन्तरं सूर्यं विन्ध्याचले लौकिक्या रीत्या संस्थापयन् स्वदुहितरं कालिन्दीम् उत्सवमुखरां दिल्लीनगरीं प्रति कृपया दृष्टिं पातयेति संप्रार्थ्य मार्गस्य असामञ्जस्यदूरीकरणाय कविः यथाशक्ति चेष्टितवान्। ततः विन्ध्यात् कलिकवलितम् अहम्मदावादं तं प्रेषितवान्। तत्र शान्तेरवतारभूतस्य महात्मनः प्रचलित–कलिकवलितान् जनान् आश्वास्य तदीयसत्याग्रहाश्रम-राजकोट-पोरबन्दरादीन् दर्शयन् वैकुण्ठं प्रेषितवान्। यथा काव्ये –

**तीरे तीरे विहर जलधेर्द्वारकानाथपूते**
**वारं वारं भरतधरणीं दृष्टिमार्गे निधाय।**
**रागारक्तः सकलमनुजान् रञ्जयन् स्वर्णहस्तै-**
**स्त्यक्त्वेमां त्वं चल पतग भो रम्यवैकुण्ठधाम॥**[34]

तत्र वैकुण्ठे सपत्नीकं[35] सशिष्यं (नेहरुशास्त्र्यादिकम्)[36] समालोकयन् भारतस्य आत्यन्तिकीं दुरवस्थां विज्ञापयितुं संप्रार्थ्य पुनः ''भवान् अवतारं स्वीकरोतु'' इति सन्देशं सूर्यदेवाय दत्त्वा कविः तं प्रेषितवान्। यथा कविना उक्तम् –

**अस्मिन्कालेऽवतर भगवन्! कर्मचन्द्रस्य पुत्र!**
**पृथ्वीयं त्वां स्मरति विकला हिंसया पीड्यमाना।**
**भूताऽनीतिस्त्वदुपरि तु या विस्मरंस्तां दयार्द्रो**
**भ्रान्तांल्लोकान् कुरु सुविमलान् स्नेहभावानुबद्धान्॥**[37]

**उपसंहारः**

काव्यलक्षणानुसारं यद्यपि काव्यमिदं निर्मितमस्ति, तथापि काश्चन त्रुटयः परिलक्ष्यन्ते। तास्त्रुटयः कवेः प्रथमकाव्यकरणाद् इति मन्ये। यस्मादयं कविः तरुणः परन्तु जातीयता-भावनोद्दीपितः आत्मानं तत्र नियुज्य महात्मनो गान्धेः शतवार्षिकोत्सवं प्रतिकाव्यमिदं निर्मितवान्। यथा महात्मनो गान्धेः जनसमाजे आदरो भवति तथैव तदीयगुणगणैरलंकृतमिदं काव्यं सर्वजनादृतं भवेदिति आशासे। यद्यपि अस्मिन् काव्ये माधुर्यं मनोहारिणी शैली अर्थगौरवादिविषयाः न विद्यन्ते तथापि महात्मनो गान्धेः कियत् कार्यजातमवश्यं वर्णितमस्ति। अतः एषा कृतिर्विदुषां न सुरसा नानालंकारभूषिता कामिनीव मनोहारिणी भविष्यति, अपितु अनभिव्यक्तरसा कन्येव आदरणीया भवेदिति आशासे।

*

**सन्दर्भाः—**

1. सूर्यदूतम्, श्लोकः - 1
2. तत्रैव, 9
3. तत्रैव, 5
4. यः पूताख्यो जनुरलभतादित्य! पुण्येऽत्र राज्ये
   को वा गान्धेः सुभगतनयो मोहनाख्यः सदासः।
   बाल्यारभ्यारुण! निजधिया सत्यनिष्ठो य आसीद्
   यस्मिन्मातुः सुविमलगुणा बिम्बभावं च जग्मुः।। सूर्यदूतम्, 8
5. सूर्यदूतम्, श्लोकः - 11-26
6. कुष्ठव्याधिप्रशमनधिया सानुरागो महात्मा
   देशे देशेऽभ्रमदनुदिनं स्वार्थहीनो दयालुः।
   लुप्तोत्साहान् परमघृणितान् कौष्ठिकान् सेवमान-
   स्त्वत्सादृश्यं खलु विलभते स्मार्क! योऽहं विमन्ये।। सूर्यदूतम् - 19
7. सोऽयं दुष्टो हृदयनिलयाधिष्ठितायाः प्रभावैः
   हिंसादेव्याः कलुषितमना लुप्तबोधोऽविवेकः।
   ज्ञानालोकोद्वितरणपटुं यं प्रदीपं स्वजाते-
   र्निज्ज्वालं हाऽकुरुत तरणे! दीप्तिमन्तं चिराय।। सूर्यदूतम् - 27
8. कोणार्कस्योद्भटचतुरता पूर्णभास्कर्य्यजालं
   धर्मान्धैस्तैर्यवननिचयैः सृष्टभङ्गावशेषम्।
   आद्यं स्पृष्ट्वा प्रथमकिरणैर्दीप्तकार्त्तस्वराभै-
   स्त्वं श्रीक्षेत्रं प्रचल जगतां स्वामिनं तं दिदृक्षुः।। सूर्यदूतम् - 31
9. सूर्यदूतम्, श्लोक - 32, 33
10. तत्रैव, 36, 37
11. स्पर्शं स्पर्शं विमलचिलिकातुङ्गकल्लोलजालं
    रौप्याकारं कुरु पतग हे! भावुकैर्दर्शनीयम्।
    पीत्वा नीरं श्रममपहरन् प्रीतिदाया 'दया'या
    एकाम्रेऽस्मिन् विचर मधुरे पादपातं विधाय।। सूर्यदूतम् - 35
12. सूर्यदूतम्, श्लोक - 39
13. तत्रैव, 42-42
14. तत्रैव, 43-47
15. तत्रैव, 48-54

16. तत्रोद्याने विचर ललिते मित्र! वैचित्र्यपूर्णे
घ्रात्वा रम्यं कुसुमसुरभिं क्लान्तिशान्तिं विदध्याः।
तत् पश्चात्त्वं त्वरितचरणैरा चिकित्सालयाद् वै
गच्छेस्तत्र व्यथितहृदयारोगिणो यत्र सन्ति।। सूर्यदूतम् - 55

17. तस्मिन्मार्गे सचिवनिलयो नाम सौधश्चकास्ति
नानालोकैः स्फुटितहृदयः पुष्पमाल्याढ्यगात्रः।
तं सम्पश्यन्नतिसुललितोन्नीतजातीयकेतुम्।
गर्वोत्फुल्लैः स्पृश निजकरैर्ध्वान्तनाशं च कुर्याः।। सूर्यदूतम् - 57

18. सूर्यदूतम्, 58-59
19. तत्रैव, 60-65
20. तत्रैव, 66, 67
21. तत्रैव, 67-73
22. तत्रैव, 74, 75
23. तत्रैव, 76-80
24. तत्रैव, 83-84
25. तत्रैव, 85-92
26. चक्राकारं खलु जनसभागेहमत्यन्तरम्यं
चक्राङ्केणारुण! सुरुचिना केतुना मण्डिताङ्गम्।
स्वाधीनस्योन्नतनयततेर्गर्वदं भारतस्य
नूनं यत्र प्रशमितभयं विद्यते शान्तिकामम्।। सूर्यदूतम् - 87

27. तत्पश्चात्त्वं त्वरितो नयनो राजघाटं प्रतीमं
दृष्टिं दद्याः परमरुचिरो यत्र गान्धेः समाधिः।
नेतृव्रातैस्तदनुटिकितैर्दत्तसूनात्तशोभं
स्पृष्ट्वा प्रीत्या परममुदितो धन्यतां याहि भानो!।। सूर्यदूतम् - 90

28. सूर्यदूतम् - 91
29. तस्माद्भानो! स्वनयनयुगं राष्ट्रनाथस्य गेहे
केन्द्रीकृत्य प्रियपरिसरे मन्दिराणां गरिष्ठे।
भक्त्या नम्रं भरतधरणीनायकं त्वं निरोक्ष
नूनं दद्यास्तवगुणगणान् सर्वजीवात्मभावान्।। सूर्यदूतम् - 92

30. सूर्यदूतम् - 93-96
31. तत्रैव, 97, 98
32. तत्रैव, 98

33. मार्गे तावत्पतति तरणे! राजकोटोऽनवद्यो
यस्मिन्गान्धिस्तरुणवयसि व्यक्तविद्यानुरागः।
पाठाभिज्ञैर्विविधविषयान् शिक्षकैः पाठ्यमानो
दिव्यं ज्ञानं व्यलभत मुदा तं प्रपश्यन् प्रयाहि।। सूर्यदूतम् - 99
34. सूर्यदूतम् - 101
35. तत्रैव, 104
36. तत्रैव, 106-108
37. तत्रैव, 116

*

# फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग<br>आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग<br>आरा (विहारः) |
| 6. | तेषां जनानां नामानि<br>सङ्केताश्च ये समाचारपत्रस्य<br>स्वामिनः स्युः तथा च ये<br>समस्तव्ययस्य एकप्रतिशतात्<br>अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मौलाबाग<br>आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

## *संस्कृतप्रसारपरिषद्, आरा*

### *प्रकाशनम्*

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि